न्ति महात्मानः ॥ ॥ कथाश्रवणतत्पराः ॥११॥ कालः समः सत्ययुगे कलावपि हि नान्यथा ॥ अधिष्ठात

षु वैषम्यं युगादिषु भवेत्पुनः ॥ १२॥ सत्ये ज्ञानं तपो धर्मस्त्रेतायां द्वापरे मखाः॥ कलौ व्यवस्था काचिन्न

दृश्यते व्याकुलात्मनाम् ॥१३॥ देह एव कलावात्मा सुखं देहस्य लालनम् ॥ यथा कथं चिद्धि धनस्य सं

ग्रहः" कलौ नृणां पुरुषार्थः परो ऽयम् ॥१४॥ धनं कुलं धनमायुर्धनेन "मान्या लोकाः स्युः पाप रूपातिनीचाः

॥ कलौ द्विजाः शूद्रवदाचरन्तो हसन्ति वेदान् विषयेषु सक्ताः ॥ १५॥ शूद्रा रहस्यं प्रविचारयन्ति श्रुतेः

श्रुतिं धर्मपरास्त्यजन्ति ॥ कृत्वा बहूनि पापानि काश्यामेव कलौ यदि ॥ १६॥ म्रियते यातनां ते हि शुद्धो

मोक्षमवाप्नुयात् ॥ कलावन्यत्र पापानि करोति यदि पापकृत् ॥१७॥ तत्रैव मानवं पापे प्रेरयन्ति पुनः पु

नः॥ तैः प्रेरितो विभ्रान्त्यं(?)थं तमः शोकभयावहम् ॥ १८॥ न पारं संसृतेर्याति कलौ पापकृदुन्मदः ॥ गुरु

रुवाच ॥ एवं विधा सुबहवो धर्मा सूतेन संसदि ॥ मुनीनां कथितावत्स कलिदोषगणैः सह ॥१९॥ तत्रैव

श्रुतवानस्मि द्वापरान्ते बहुस्ततः ॥ तत्कृत्वा काशिकां प्राप्तस्त्वया सह विकंपितः ॥ २० ॥ दीपक उवाच ॥ कृपाक
र कले दोषान् उमान्वेद विदांबर ॥ सूतोक्तान् काशि संवस्थान् धर्मांश्च कलि नाशकान् ॥ २१ ॥ जितेन्द्रियाः
 पाप विवर्जकाश्च शान्ता महान्तो मधुसूदनाश्रयाः ॥ अन्येषु तीर्थेष्वपि मुक्तिभाजो भवन्ति काश्यामपि कोवि
शेषः ॥ २२ ॥ श्रीगुरुरुवाच ॥ कामक्रोधादयो दुष्टाः सूक्ष्म छिद्र निरीक्षकाः ॥ प्रविशन्ति च सर्वासु क्रिया
सु महता मपि ॥ २३ ॥ वद वः शत्रवो दुष्टा बाह्यान्तः करणेषु च ॥ प्रविश्य धीरमप्याशु न धीरं कारयन्तिहि ॥
२४ ॥ एकेन बहवो धूर्ता निवार्यन्ते कथं वद ॥ महानपि महामोहं याति धीरतरोऽपिहि ॥ २५ ॥ यैर्वंचितः
प्रपतति व्यग्रः संस्कारतोऽवशी ॥ विशेषं शृणु वक्ष्यामि काश्याः कथयतो मम ॥ २६ ॥ जितेन्द्रियस्त्वं धीर
स्त्वमंतः करण निग्रहः ॥ ततो जपः स्वधर्मश्च दानं यागादिकाः क्रियाः ॥ २७ ॥ निर्वाण सुख पूगस्य सा
धनानि भवन्त्युत ॥ तथापि वासनाजालं न विमुंचति मानवम् ॥ २८ ॥ कृतानि साधनान्यत्र स्वल्पान्य-

१(क) "युगेषु"—"योगेषु"

पि महामते ॥ भवन्ति काशि माहात्म्या त्सिद्धान्येव न संशयः ॥ २९॥ अन्यत्र साधु सुकृतैः कृतैर्मुच्येत वानवा

॥ भोगेच्छा ग्रस्त हृदयः सापीच्छात्र निवर्तते ॥३०॥ मुमुक्षोः प्राणि मात्रस्य पापाद्ङ्घ्रेः शिवात्मनः ॥ जाते

साधन वैकल्ये काशि पूर्णं प्रकल्पयेत् ॥३१॥ तीर्थान्तरेषु वैकल्याद्विघ्नः संजायते नृणाम् ॥ मुमुक्षवः श्रद्द

धानाः पाप संसर्ग वर्जकाः ॥३२॥ पश्यन्ति शीघ्रं मनुजा स्तद्विष्णोः परमं पदम् ॥ अत एव विचित्रेयं का

2 शी शीघ्र फल प्रदा ॥३३॥ सेव्या धीरै र्मोक्षपरै र्न पापैः पापसंगिभिः ॥ कलौ न काशीं विसृजेत्कथंचिन्मु

मुक्षुरव्यग्र मना मनागपि ॥ धैर्यं विधायात्र यथा कथंचित्स्थेयं विचार्याशु कलि प्रभावम् ॥ कालस्तु भगवा

न्विष्णुः समः सत्यादि नामसु ॥ ३५॥ युगेषु प्राणिनो वत्स विषमाविषम ग्रहाः ॥ प्राप्नुवन्ति फलं तत्र यथा

यथ्वदनुष्ठितम् ॥ ३६॥ कलिकाल स्तथा काशी पापाद्भीतं मनो यदि ॥ एतत्त्रय समासक्तो नरो जीवन्वि

मुच्यते ॥३७॥ अत्र ते वर्णयिष्यामि कथां पापापनोदिनीं ॥ यां श्रुत्वा मुच्यते जन्तुः संदेह विषमै र्ग्रहैः ॥

काशी अस्ति माहिष्मती नाम नगरी नर्मदातटे ॥ तत्र कश्चिद् द्विजवरो विष्णुशर्मेति विश्रुकीर्तितः ॥ ३९ ॥ वेदयज्ञतपोदा २८:
न स्वधर्मैः संयुतो वशी ॥ तस्य पुत्रौ महात्मानौ वीतरागौ मनस्विनौ ॥ ४० ॥ अग्निशर्मा भवज्ज्येष्ठः सोमशर्मा तयो
॥२५॥ वन्च ॥ गतावुभौ प्रत्यहं तीरे शुभं श्रवण तत्परौ ॥ ४१ ॥ रेवायाः शिव विष्णुर्वा कथा पूर विराजते ॥ ब्रह्मवादः
सम भवत्कदाचित्तत्र वंथ्यनुत् ॥ ४२ ॥ कथं बंध विनिर्मुक्तः कथं शांतिसुखं नृणाम् ॥ कथं निर्विघ्नता भूया-
त्तपसस्तापहारिणः ॥ ४३ ॥ यत्र तीर्थे विशेषेण स्वल्पं बहुकृतं भवेत् ॥ यत्र नारायणः साक्षाद्दृश्यते चानु
भूयते ॥ ४४ ॥ यत्र देवो महादेवः सोमः साक्षात्कृपानिधिः ॥ साक्षात्क्रियेत सर्वात्मा विघ्नविघ्नो गणाधिपः
॥ ४५ ॥ यत्र तु द्वादशादित्या ब्रह्माद्या देवता गणाः ॥ भजतां सर्वलोकानां सिद्धिं यच्छन्ति मानिताः ॥ ४६ ॥
एवं प्रश्न समावाप्य कथयन्तु द्विजातयः ॥ सूत उवाच ॥ एवं परस्परं दृष्ट्वा तूष्णीं भूतान् द्विजर्षभान् ॥—
दृष्ट्वा मृकंडतनयः स्मृत्वा वचनमब्रवीत् ॥ ४७ ॥ मार्कण्डेय उवाच ॥ अहो माया भगवती विष्णोर्मोहकरी ॥२५॥

^१ "को वा विचारस्तुतयोः फलं वा किं समागतुः॥ सूत उवाच॥ इति शिष्येण स गुरुः पृष्टः प्राह फलं तयोः॥"

श्रीनणाम॥ अविमुक्ते विद्यमाने ब्रह्म विष्णु शिवाश्रये॥ ४९॥ मृगयंत्यस्य नाशंच भोग मोक्ष विमोहिताः॥ शृण्वन्तु ऋषयस्सर्वे श्रुति स्मृति निरूपितम्॥ ५०॥ रहस्यं कथयाम्यत्र ब्रह्मात्मैकत्व लक्षणम्॥ महापातक संयुक्तो महापुण्य समन्वितः॥ ५१॥ सम्मां गति मवाप्नोति शरीर व्यय मात्रतः॥ ब्रह्मानंदस्य जननीं ब्रह्मादि परिसेविताम्॥ ५२॥ सुकृतैः सर्वतः पूर्णां पाप द्वेषिं श्रयेन्नरः॥ रागादि मलनिर्मुक्त धियां शीघ्रलयप्रदां॥ ५३॥ काशी कोन सेवेत वर्णाश्रम विधादिवत्॥ इत्यादि बहु सारस्य गुणाः प्रोक्ताः महर्षिणा॥ ५४॥ श्रुता महर्षिभिः श्रेष्ठैः विष्णु शर्म सुतैरपि॥ ते च्चाग्नि शर्माच तथा सोम शर्मा विचारकः॥ ५५॥ प्राप्तौ फलं विलंबेन शीघ्रेणच विचारतः॥ दीपक उवाच॥ विचार निष्ठौ द्वौ प्रोक्तौ फल भेदः कथं तयोः॥ ^१ शीघ्रं विलंबेन यथा सोमाग्नि शर्मणोः पृथक्॥ ५६॥ वेद धर्मोवाच॥ भ्रातरौ परम स्निग्धौ कदाचिन्नर्मदा तटे॥ उपविष्टौ मोक्ष परा वूचतुस्तौ परस्परम्॥ ५७॥ अग्नि शर्मोवाच॥ सोम शर्मन्मरा प्राज्ञ गमिष्यामि हरेः पुरीं॥

वाराणसीं मोक्षकामो विश्वेशादि भिरर्चिताम्॥ ५८ ॥ त्वमप्या गच्छ शीघ्रेण यत्र मोक्षः प्रलभ्यते ॥ न्यूनाति
रिक्तं तपसो धर्मस्यान्यस्य शंकरः ॥५९॥ त्रिगुणं सद्गुणं कुर्यात् परमात्मा जनार्दनः॥ सोम शर्मोवाच ॥ मयारेवा २८:
॥२६॥
मोक्षादि सिद्धयो येन प्राप्यन्ते विजितेन्द्रियैः॥
तटे भ्रात स्तप्तव्यं तप उत्तमम् ॥ रागद्वेष विहीनाना न्चिन्ता चाञ्चल्य वर्जिनाम् ॥६०॥ सर्वत्र काशी विज्ञेयाव्र
स ज्ञान रतात्मनाम् ॥६१॥ अग्निशर्मोवाच ॥ मार्कण्डेय मुखाच्छ्रुत्वा रहस्यं काशि संश्रयम्॥ तथापि स्वब
लेनत्वं मोक्षं साधितु मुद्यतः ॥ ६२॥ गन्तव्या काशि का नौका मज्जतां पार दायिनी ॥ मया धर्मा समर्चेन
वीतरागेण धार्मिक ॥६३॥ न काशी सदृशी माता गर्भवास प्रदायिनी ॥ गर्भवासादि दुःखानि पापानि च्चम
हान्त्यपि ॥६४॥ क्षालयत्येव निर्दग्धा दुष्टानामपि सेविता॥ कलिकालस्त्वयं तीक्ष्णः कृतपः कृपरात्म दृक्॥
॥स्कन्द उवाच ॥वेदधर्मोवाच॥
॥६५॥ काश्येव शरणं शुद्धा शुद्धिदा मलिनां नृणाम् ॥ इत्युक्त्वा भ्रातर विद्वान ग्निशर्मा महामतिः ॥६६॥
जगाम काशीं धर्मादि साधनैः पूर्ण विग्रहाम् ॥ काश्या मागत्य धर्मेशं नत्वा धर्मपरो वशी ॥६७॥ सथ

मं वित् धर्म परो महात्मा सुमानदो मान विवर्जितः स्वयम् ॥ शृण्वन्कथाः श्रावयन्काशिकायाः कुर्वन्स्वधर्मं कारय
न्वास माप ॥६८॥ यन्यो मनः काय गुणैः परेशं धर्मेश्वरं प्रीणयन्प्राप्ततत्वः ॥ वसत्यवश्यं शिवनाम तत्परः
पापान्निर्दुःखाधि विवर्जितः कृती ॥६९॥ एवं स्वधर्म निरतो सोऽग्निशर्मो शिवार्चकः ॥ प्राप वाराणसीं
शुद्धः शुद्धिदां साधु संम्मतः ॥७०॥ प्राणोत्क्रमण कालेतु भवान्यातु भवः स्वयम् ॥ व्याचष्टे तारकं ब्रह्म
स्पितिं तस्य सुवर्णयन् ॥७१॥ ईश्वर उवाच ॥ अहो निश्चय वान्विप्रः काश्यां सद्भिः समादृतः ॥ प्राप मां परमात्मानं
शास्त्र कल्लोल्य वर्जितः ॥७२॥ ईश्वर उवाच ॥ एवमेव महाभागा मम क्षेत्र निवासिनः ॥ अग्निशर्मोव
त्प्राप्ताः प्राप्स्यन्ति परमंपदम् ॥७३॥ रागद्वेष विवर्जिता दृढधियो धर्मेषु पापेष्वपि न्यासान्यास विचार
तः सुमनसः सिद्धिं परां यांतिते ॥ येन प्राप्य मनुष्यदेह ममृतं निः काश्य, हाला हलम् संपूर्यात्र पत्रयांति वि
षमां तां भैरवीं यातनाम् ॥७४॥ अत एव वसेत्काश्यां यावज्जीवं जितेन्द्रियः ॥ यथाग्नि शर्मणा ब्रह्म

काशी प्राप्तं ब्रह्म सनातनम् ॥७५॥ वेदधर्मोवाच ॥ इत्युक्त्वा भगवाञ्छंभु रानन्द गहने चरन् ॥ देव्यै संदर्शयामास सौ २८
भाग्यं काशिवासिनाम् ॥७६॥ दीपक उवाच ॥ भगवन् श्रोतुमिच्छामि सोमशर्मकथां पुनः ॥ यथा तप्त्वा तपः
॥२७॥ प्राप गतिं तां कथय प्रभो ॥७७॥ गुरुरुवाच ॥ सोमशर्मा विप्रवर्य श्चचार विपुलं तपः ॥ अद्रिकूटेषु तीर्थेषु
तथा क्षेत्रेष्वप्यात्मवान् ॥७८॥ शाकाहारः फलाहारो वायुभक्षो जलाशयः ॥ जितेन्द्रिय मनोबुद्धि र्विजिता
त्मा सचात्मवान् ॥७९॥ बहुप्रकारां महतीं सिद्धिं प्रापय दृच्छया ॥ दूरदर्शनं, दूरस्य श्रवणं, दूरगामतिः ॥
८०॥ अन्याश्च सिद्धयः प्राप्य तत्परः सम जायत ॥ मानयन्ति ततो लोका ऋषयो देवता गणाः ॥८१॥ सोम
शर्माख्य मत्युग्र शासनागर्व गर्वितम् ॥ कंचिच्छपति विश्व स्तमनु गृह्णात्यनुकंचन ॥८२॥ कंचिद्दरिद्रं
कुरुते धनिनं कंचिदेवतु ॥ पुत्र पौत्रादि संपन्नं करोति कमपि स्फुटम् ॥८३॥ निगृह्णात्यनु गृह्णाति लोका
न्लोकैश्च सेवितः ॥ गर्वपर्वत मारूढो न पश्यति पुरः सतः ॥८४॥ नाना विषय संभार संपन्न स्त्रीभिरन्वितः ॥

॥२७

दिवानिशं विस्मृतात्म गति स्तापस सत्तमः ॥ ८५॥ भक्ष्य भोज्य परो नित्यं भोग सौभाग्य गर्वितः॥ जातोनमा
नयत्येव पितॄन्देवान् गुरूनपि ॥ ८६॥ कदाचिद्भ्रातरं काश्यां स्थितं दीन धियास्मरन् ॥ नाशितं जन्म मद्भ्रात्रा
दीनेनानित्यदर्शिना ॥ ८७॥ तपः फलं मया भाग्य यस्य सर्वं वशे जगत् ॥ भोगान् भुक्त्वा ततश्चान्ते यास्यामि परमां
गतिम् ॥ ८८॥ अल्पकाल उपावृत्ते कालधर्म मुपेयिवान् ॥ स्मरन्नाना विधान् भोगान् पंचत्वं प्रापतापसः
॥ ८९॥ जातो म्लेच्छ महीपालः सिन्धुतीरेति लोलुपः॥ पुनर्यथेच्छाचरणान् नरके परिपातितः ॥ ९०॥ अत एव
तयोर्भ्रात्रो र्विरूद्धा मति रादितः॥ ज्ञानात्वया काशिवासिन् विचारय बलाबलम् ॥ ९१॥ यः स्वात्मनि समारो
प्य वर्तते कामकारतः ॥ कृतत्वं स महापापो वर्तते सोम शर्मवत् ॥ ९२॥ सोम शर्मा महाभाग तपस्वीकुल
शीलभुक् ॥ तपसा सिद्धि मासाद्य सिद्धा भोगान् समाप्य च ॥ ९३॥ भोगे विषय तादात्म्यं तादात्म्यान्नरकं
गतः ॥ अतः कलौ तपो मिथ्या यज्ञदानादिकाः क्रियाः ॥ ९४॥ सांगा भवन्ति न कृताः कुशलैरपि देहिभिः॥ त

काशी स्मात्काश्ये वटि कलौ सुकृता पूर्त्ति कारिणी ॥ ९५॥ आत्मा संभावितो यस्मात्तस्मात्स नरकं गतः॥ नरके पच्यमान २८
स्तु भ्रान्तः स्मरण मागतम्॥ ९६॥ मद्भ्राता काशिकायां यस्तिष्ठत्येव विरक्तिभाक्॥ सधन्योयेन महता परलोकःसु
॥ २८॥ साधितः ॥ ९७॥ इति स्मरन्नेव स सोमशर्मा शान्तः सुखं प्रापमनो नुकूलम् ॥ विचारयामास किमेतदद्भुतं कस्यप्र
भावात्सुखमुत्थितं त्विह ॥ ९८॥ अहो मयात्मा परितापितोवृथा तपोभिरुग्रै र्नियमै र्यमैश्च ॥ नभ्रातुरज्ञास
कृता दुरात्मना महाभिमाना त्पततीतमोन्धम् ॥ ९९॥ महासिद्धि प्रदां काशीं नसेवन्ते दुरात्मनः ॥ महत्तपो
भिरुग्रैश्च साधयामो वदन्ति हि ॥ १००॥ साभिमाना पतन्त्यन्धे यथाहं तेपि मानवाः॥ नतपो न जपः शौचं
तीर्थदान व्रतादयः ॥ १॥ नाशयन्ति महाज्वालां मुभिमानानलैर्युतां ॥ अहो लोकाःकाशिकाया माहात्म्यं न
विदुः परम् ॥ २॥ अज्ञातेनापि येनाशु मोचितो स्म्यभिधानतः ॥ ज्ञात्वा काशीं श्रद्धया ये वदन्ति तेषां
ण्यं वेत्ति नो कश्चिदत्र ॥ ३॥ नाना तापै स्तापमानैः सुभीमैः यन्नाम्ना हं मोचितो गर्व [redacted] राशिः॥ काशी ॥ २८॥

काशीति काशीति वहुधा संस्मरन् द्विजः ॥ नपश्यतीह नरकान् वर्त्तमानान् स्वयंकृतान् ॥ १०५ ५॥ गुरुरुवाच ॥यम
दूतैस्तदाश्चर्यं दृष्ट्वा विज्ञापितोयमः ॥ शास्यमानोप्ययं विप्रो न शास्तिं परि पश्यति ॥ १०६ ६॥ आक्रंदरहितोजा
तः प्रसन्न वदनः सुखी ॥ केन पुण्य विशेषेण मप्याश्चर्य कारिणा ॥ १०७ ७॥ धर्मराजउवाच ॥ नजानाम्यहम
॥१०८॥ नेऽद्धर्मोवाच॥
प्याशु सूक्ष्मपुण्यं विचारयन् ॥ आनीयतां सोमशर्मा ममाग्रे सत्वरं भटाः ॥ इत्युक्ता यम दूतास्ते यमेनयात
नागरात् ॥ आनिन्युर्ब्रीसणं शीघ्रं काशी काशीतिजापकम् ॥ १०९ ९॥ यम उवाच ॥ अभिमान निश्चेविप्र
किं स्मरस्यत्र मद्गृहे ॥ वदते यातना वह्व्यः समासिं कथ मागताः ॥११०॥ सोम शर्मोवाच ॥ ताड्य मानोह
मनिशं यातनाशु विचित्रधा ॥ स्मृतवान् भ्रातरं स्वीय मग्निशर्माण मस्मिभोः ॥ तेनोक्तं पूर्वमेवाशु काशी
मागच्छया म्यहम् ॥ मया पापात्मना काशी निन्दिताहं कृतात्मना ॥११२॥ स्व सामर्थ्यं प्रकटितं तयावस्तु
स्वरूपया ॥ अभिमान कृते धर्मैस्तपोभिस्तीर्थ सुव्रतैः ॥११३॥ म्लेच्छत्वं प्रापयित्वाहो नरके विनिपातितः ॥

काशी नपायं ब्रह्महत्या स्यान्न पापं गोवधः स्मृतः ॥१४॥ देहाभिमान पापस्य कलां नार्हन्ति षोडशीम् ॥ नाश्वमेध परं पु रह:
ण्यं तुलादानादि संभवम् ॥१५॥ गोसहस्रादि जनितं यथाहंकार वर्जनात् ॥ अहं तपस्वी पुण्यात्मा जितेन्द्रिय ग
॥ २९ ॥ णस्त्वहम् ॥१६॥ अहं धीरो व्रती शान्तः साधयिष्ये परं पदम् ॥ गुरुरुवाच ॥ धर्मराजा यथा जातो विप्रः कोलापु
रे शुभे ॥ मनस्यभिमतिं कृत्वा त्यक्त्वा भ्रातरमात्मनः ॥१७॥ स्थितोऽसत्संग निरतः प्राप्ताश्चोग्राहि यातनाः ॥ धर्म
राज उवाच ॥ गच्छ काशीं मुक्तिदात्रीं भजस्वांबा युतं शिवम् ॥ स्नाहि भागीरथीं रम्यां संप्राप्स्यसि परं पदम् ॥१८
गुरुरुवाच ॥ धर्मराजा यथा जातो विप्रः कोलापुरे शुभे ॥ तारुण्यं प्राप्य सर्वात्मा गतो वाराणसीं पुरीम् ॥१९॥ सु
शर्मणः सुतः सोऽथ सर्वात्मा शिवभक्तिमान् ॥ धर्मेश्वर प्रसादेन प्राप्तः काशीं विमुक्तिदाम् ॥२०॥ अहंकारादि
श्लोक २१-२४ यहा चाहिये
दोषाणां नाशकर्त्री नृणामिह ॥ धर्मज्ञः को न सेवेत कृतज्ञः साधुसत्कृतः ॥२१॥ सोमशर्म कथां दिव्यां सुख
१२२॥
मोक्षफलप्रदाम् ॥ श्रुत्वा विमुच्यते जन्तुरहंकारादि बंधनात् ॥ इति श्री ब्रह्मवैवर्ते अग्निशर्मा सोमशर्मा- ॥२९॥

ख्यानं नाम चतुर्थोऽध्यायः ॥ ४॥ गुरुरुवाच ॥ सन्ध्या सन्ध्यांशयोस्तात कलौ धर्मो हि दृश्यते ॥ मध्ये क्रमात् क्षयं
पाति दीनैर्विषयिभिर्हतः ॥ १॥ दीपक उवाच ॥ संध्यायां पूर्वसंस्कारात् विध्यते हि कृषः क्वचित् ॥ सन्ध्यांशे तु
कलौ कुत्र धर्मः स्यात्स्यति सद्गुरो ॥ २॥ गुरुरुवाच ॥ जनार्दनः कल्किरूपोऽवतरिष्यति दीपक ॥ तेन प्रवर्तितो
धर्मः संध्यांते संभविष्यति ॥ ३॥ कलेस्तु प्रथमे पादे धर्मो भवति कश्चन ॥ तत्र श्चतु दिनं धर्मः सत्यं शौचं
दया तथा ॥ कालेन बलिना विप्र न श्यत्यायुर्बलं स्मृतिः ॥ वित्तं गुणा चार कुलादि हेतुर्न्याय व्यवस्था सुबलं प्रयु
ज्यते । दांपत्य मेवात्र रुचिं करोति पूज्याश्च पारवंडन मेव सर्वे ॥ यज्ञोपवीतं द्विजहेतुरेव लिंगं हि वर्णाश्रम
कारणं स्यात् ॥ ६॥ अनाढ्य एवात्र कलाव साधुराढ्यस्तु साधुः कृत दंभ एव ॥ अभ्यंग एवात्र परस्परं सदा सु
लंकृतिः श्मश्रु कर्माति सौख्यम् ॥ ७॥ तीर्थ प्रदेशे वसतां नराणां नहि श्रद्धा स्वतीर्थेषु कदाचिदत्र ॥ देशां
तरे कामदं वर्णयन्ति गत्वा च तत्राप्यपराध युक्ताः ॥ ८॥ कलौ कलुष चित्तानां पुरुषार्थ परो हि सः ॥ यथाक

काशी यंचित्पुरुषः कुटुम्ब भरणोद्यतः ॥ ९॥ सत्यवादी जनैर्धृष्टः प्रोच्यते पापवानपि ॥ कलौधर्मः सुविस्तोय २९

शों ऽर्चे यत्रतिष्ठति ॥१०॥ राजानो निर्घृणा लुब्धाः परदारधनारताः ॥ न ब्राह्मणा वेदवेदार्थ निष्ठाः प्रति

॥ ३०॥ ग्रहार्थं कृति धर्मयुक्ताः ॥११॥ विक्रीय कन्याश्च सुतान्परस्परं कुलाद्युपेक्ष्यैव विवाहकारिणः ॥ वद

न्ति धर्मं न तु धर्मनिष्ठा निन्दन्ति पापं खलु पापकारिणः ॥१२॥ देवान् गुरून् पितृयज्ञादि सर्वान् प्रपं

चयन्ते धनलोलुपा द्विजाः ॥ क्षत्रियाः परमदुर्लभाः कलौ धर्मशास्त्रगुरुदेवपूजकाः ॥१३॥ कल्पय

न्ति सुकृतं यथेष्टतो निन्दका द्विज सतामधार्मिकाः ॥ आहार मैथुन रताः परमादरेण ब्रह्मस्व संग्रहपराः

परवादरताः ॥१४॥ न प्राणि रक्षण पराः परमादरेण कुर्वन्ति धर्म हननं द्रविणार्थमेव ॥ पैशून्य वंच

न परा वणिजो न तु पापधा धर्मादि कार्य करणे परमात्म निष्ठाः ॥१५॥ आहार मैथुन धनानि सदादरेण र-

क्षन्ति शास्त्र विमुखाः पलमद्यभक्षाः ॥ वैश्याः कलौ नहि भवन्ति कुलादि युक्ता ये वा भवन्ति नहि तेषु- ॥ ३०

वषः कदाचित ॥ १६॥ शूद्रादि वर्त्तय इमे द्विजदेव निन्दश विप्र द्विषः परम दारुण कुद्धयश्च ॥ शूद्रास्त्वन्नं स्वल्प मेव दत्वा विप्रेभ्य एव हि कारयिष्यन्ति महती सेवां सेवा विवर्जिताः ॥ १७ ॥ अन्नादिभि र्व्यवहरन्ति न ये मनुष्याः वैश्या भवन्ति खलु ये व्यवहार दुष्टाः ॥ शिष्यास्त एव धनिन स्तु यतः सुपूज्या लोके धनं सुखकरं ननु तिष्य काले ॥ १८॥ शूद्रा विशुद्धा नहि तिष्य काले द्विजादि वेषाः श्रुति तत्परा श्च ॥ शास्त्रार्थ वादे जैन वंचकाश्च क लौ भवि ष्यन्ति निरंकुशास्ते ॥ १९॥ कलौ लब्धा दुराचारा निर्दयाः शुष्क वैरिणः ॥ दुर्भगा भूरि तर्षा श्च सर्वे वर्णा स्तथा ऽक्षमाः ॥ २०॥ नदा मायानृतं दंभं निद्रा हिंसा विषादनं ॥ शोको मोहो भयं दैन्यं लोकानां प्रचुरं भवेत ॥ २१॥ क्षुद्राः क्षुद्र सुख प्रदाः कलियुगे मर्त्या महाभोजनाः ॥ क्षुद्र प्राण धनादि पोषण पराः कामाधि काः क्रोधिनः ॥ २२॥ लोभाविष्ट मनोजुषः परदया हीना स्सदा वंचकाः रागद्वेष परा परापर विचारार्थैः सदाचो ज्झिताः ॥ विनै हीनाः स्वैर वर्त्ति प्रसंगाः स्वैरण्यश्च स्त्रीषु ये ऽप्येष वर्णाः ॥ २३॥ दस्युत्कृष्टा लोकसंख्यास-

काशी पापा वेदः क्षीणा ब्राह्मणाः सेवकास्ते ॥ कलौन विप्रा समयस्थिताः क्वचित् नृपाः प्रजा भक्षण वित्तलोलुपाः ॥२४॥ ८८

ब्रतादि हीना बटवोन शुद्धा गृहस्थ रूपाः खलु तस्करा मताः ॥ वनेन वासो वनवासिनां हि धनार्थिनः प्रव्रजि ५

॥३१॥ ताःकलौ युगे ॥ २५ ॥ दुस्वाः स्त्रियो विपुलं भक्षयन्ति थाल्नाः क्षुधार्त्ताबहवो कदर्याः ॥ वचांसि तिक्तानिव

दन्ति नित्यं चौर्यादि बीभत्स निषिद्धकर्म्मः ॥ २६ ॥ पाखंड प्रचुरा विप्राः क्षत्रिया वणिजो मताः ॥ वणिजः कूट

कर्त्तारः संपदः पापहेतवः ॥ २७ ॥ पतिं त्यक्ष्यन्ति निर्द्रव्यं भत्या अप्यखिलोत्तमम् ॥ भृत्यं विपन्नं पतयः

कौलांगाश्चा पयस्विनीम् ॥ २८ ॥ पितृपक्षं परित्यज्य भार्यापक्षं भजन्ति हि ॥ गुरु वाक्यं न कुर्वन्ति स्त्रीणां

दास्य परा नराः ॥ २९ ॥ शूद्राः प्रति ग्रहपरा निर्भय ज्ञास्तपस्विनः ॥ नाना वेषै र्वंचयन्तो लोकान्वाक्यादवैः

शनैः ॥ ३० ॥ प्रायश्चित्तं करिष्यन्ति पापं कृत्वापि नो जनाः ॥ धर्मे वस्यन्त्यधर्मज्ञा अधिरुह्योत्तमासनम् ॥ ३१

स्वमानार्थं यत्नपरा महत्सु द्विजसाधुषु ॥ प्रजाः कलौ पापशीला अतो दुःख समन्विताः ॥ ३२ ॥ नित्यमुद्विग्न ॥३१॥

मनसो दुर्भिक्षकर कर्षिताः ॥ निरन्ने भूतले मर्त्त्या व्याधि दस्यु भयार्दिताः ॥ ३३॥ वासोऽन्न पान शयन व्यवाय स्नानभू
षणैः ॥ हीनाः पिशाचासंदर्शी भविष्यन्ति कलौयुगे ॥ ३४॥ काकिण्यर्थे जीवनं संत्यजन्ति स्नेहं हित्वा बन्धुभिस्ता
ड्यमानाः॥ रागद्वेषा क्रीत देहाः पतन्ति कूपे भक्ष्यंभक्षयन्तो म्रियन्ते ॥ ३५॥ पितरं मातरं चैव न सेवन्ते कदाञ्चन
॥ पुत्राः स्थन पराधीना मैथुनादि प्रियाः सदा ॥ ३६॥ कलौ कृतघ्नाः पाखंडा उपकार विहिंसकाः॥ उपकारेऽपि कृप
णाः प्रतिकार विवर्जिताः ॥ ३७॥ उपकारे मतिनिच स्वल्पा प्रकृति वर्जिताः ॥ निर्लज्जा विष्णु शिवयो द्रोहिणः
काश्य संमताः॥ ३८॥ ऋषय ऊचुः॥ सूत श्रुत्वा कलेर्धर्मान्व्यसत्येव दिने दिने ॥ सर्व ग्रास समुत्पन्ने न शास्त्रं
7 न गुरुः शिवः ॥ ३९॥ स्मरणीयाति लोकस्य ग्रस्तस्य भूबुन्धेन सः ॥ त्वन्न श्चक्षुः परं पुण्यं येन पश्याम हे ध्रुवम्
॥ ४०॥ प्रकाशय परं ज्ञान मज्ञान ध्वान्त नाशनम् ॥ सूत उवाच ॥ कलौ न वर्णा श्रम धर्मे तत्पराः सच्छास्त्र सत्संग
विवर्जिता स्तथा ॥ अतो मता पाप मये हलाहले कलौ शरण्या किल काशिकैव ॥ ४१॥ यथा पराभूय जनाः शार

काशी रत्वं गच्छन्ति शीघ्रं परमार्त्तिमुक्ताः ॥ तस्मादतिशीघ्रं शरणप्रदां नृणां काशीं प्रगच्छेद्धि च राजधानीम् ॥४२॥ मनु रह.
ष्यदेहेसुर देव पूजिते सुकर्मभूमौ विविधार्तिनाशिने ॥ स्थितो हि जीवः समुपेक्षणीयो भवेन्न बाल्यादिषु वै कदाचि
॥३२॥ त् ॥४३॥ सम्यक्कृतं लालन पालनादि यदस्य देहस्य नरैः कृतज्ञैः ॥ न दोपकारः स्थिरतामुपैति देहेत्वजीर्णे यदिका
शिका स्यात् ॥४४॥ कलौ न विप्रा न च बाहुजाः क्वचिद्भजन्ति काशीं न शिवं हरिं च खम् ॥ वैश्यादयो ये च तथा
न्यगेहे देहप्रियाः पापरता न भक्ताः ॥४५॥ शृण्वन्ति लोकाः परमार्त्तियुक्ता ह्यस्यमंत्रं परमादरेण ॥ कलौ विन
ष्टवृत्तधर्मा गच्छन्तु काशीं परमार्त्तिराशिम् ॥४६॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ महासेनस्य रा
ज्ञस्य वामदेवस्य चिद्गुरोः ॥४७॥ संवादः सुमहानासीत्काश्यामेव कलौ युगे ॥ आसीच्चन्द्रान्वयो राजा महा
सेन इति स्मृतः ॥४८॥ काश्यां दुश्चरित्तः पापः पापिसंसर्गदूषितः ॥ परदार परद्रव्य परः परसको पनः ॥४९॥ क
कस्यचित् दाचित्पुंसो न संलग्नः कुसंगतः ॥ कामी कलहकृत्क्रूरः कलहप्रियवल्लभः ॥५०॥ प्रजादंडपरस्तेन श्चारुकेन
॥३२॥

चौरजनप्रियः ॥ अक्षौहिणीपतिस्सोथ गतोजेतुं नृपान्तरम् ॥ ५१॥ तेन राज्ञाभवद्युद्धं जितश्चाशुसुमेधसा
॥ प्रतिष्ठानपतिः सोथ सुमेधाः शिवभक्तियुक् ॥ ५२॥ अविमुक्तप्रियश्चैव सविमुक्तजनप्रियः ॥ सुमेधाःस्वल्प
बलवान् महासेनो महाबलः ॥ ५३॥ तथापि ताडितस्तेन धार्मिकेण सुमेधसा ॥ महासेनः पलाय्यापि भयंहृत्स्थं
न संजहौ ॥ ५४॥ काश्यां प्रभीतो दुःखार्त्तो लज्जितः पुनरागतः ॥ वामदेवं मुनिवरं पप्रच्छ भयकारणम् ॥ ५५
महासेन उवाच ॥ वामदेवस्थूलबलः कथमल्पैरहंजितः ॥ परैहिस्वबलैः सुद्रैः सूरोहं सर्वदिग्जयी ॥५६॥
वामदेव उवाच ॥ महासेन महाराज कलिदोषोयमद्भुतः ॥ येनत्वं कुलवीर्यादि सम्पन्नः पापमीहसे ॥ ५७॥
10 नच धैर्यं नच कुलं नच धर्मं यशोभगम् ॥ कलिप्रवर्त्तयेत्क्वापि विपरीतकरः सदा ॥ ५८॥ प्रविष्टोभारते
खण्डे नस्थातव्यं तदानृभिः ॥ स्थातव्यमेवन्चेत्काश्यां यत्नतो धर्मवर्त्तिभिः ॥ ५९॥ अन्यायवर्त्तिनांकाशी
कलेरपि सुदुस्सहा ॥ त्वंकाश्यां पातकरुचि र्लोकविध्वंसकः शठः ॥ ६०॥ कथंन ते पराभूतिर्देवद्रा

काशी ब्राह्मण निन्दक ॥ अथापि त्यज दौरात्म्यं भज सौशील्य मादरात् ॥ ६१ ॥ जयो यशः सुखं धर्मो जायतेऽत्र कलावपि ॥ ५
वपि ॥ महासेन उवाच ॥ कलि प्रवेशः काश्यां न क्रियते शाश्वतः सदा ॥ काशि राजस्य चमम कलि दोषात्परा
॥३३॥ भवः ॥ ६२ ॥ कथं जातः काशिकायां स्थित स्यापि विशेषतः ॥ यत्र विश्वान संत्येव तत्र विश्वासमागताः ॥ ६३
वामदेव उवाच ॥ पापात्मन् दुःख समये कलेर्वेशो भविष्यते ॥ कलि ग्रस्त मनाध्यक्ष देव ब्राह्मण निन्दक ॥ ६४ ॥
कलेःऽस्वरूपं शृणु मे यथा कालात्मकस्य च ॥ न कलिर्दंडमादाय हंति कंचन मानवम् ॥ ६५ ॥ अधर्मे रमयत्येष मा
न संमानु पस्यति ॥ पश्य काश्यां महाभागाः सत्य धर्म परायणाः ॥ ६६ ॥ दानैर्व्रतैश्च नियमैः स्वाध्याये शुचैव संयु
ताः ॥ तेषां कलिर्न प्रभवेत् विद्यमानोपि सर्वतः ॥ ६७ ॥ पापं कृतं न प्रभवेत्कलिर्मोऽस्तु कथंचन ॥ पुण्यं कृतं चा
क्षयमत्र यद्वत्तथात्र पापं न विभीषि केयम् ॥ ६८ ॥ ये शंकराज्ञा प्रति पालकाः सदा न ते ष्णु पापं न भयं पराभवः ॥ शि
वा पराध्येन कलिः समः किं भवत्यज स्रं खलु पाप रूपः ॥ ६९ ॥ शिवा पराधात् दुरितादयोऽपि न श्यन्ति तेभ्यो न नु
॥ ७० ॥

भत्यभत्यः ॥ सर्वं प्रकारैर्नेरि काशिकायां पापं प्रयुक्तं सुसुखाय भूयात् ॥७०॥ कलिर्भवतु वा मात्र पापं दुःखायके
वलम् ॥ पापाद्भीतः प्रवर्तस्व पुण्यायाजि मुखे सुखम् ॥७१॥ महासेन उवाच ॥ कदाचिद्वा समागाद्भूर्युः काश्यां
पापं न विद्यते ॥उत्पत्तिं पालकानां च कदाचित्प्रवदन्ति च ॥७२॥ अनन्वितं वदंत्येते युष्मते न मया स्मृतम् ॥
पुनर्गमिष्ये हि सुमेधसं नृपं जेतुं द्विजानां वचनेन कृत्यम् ॥७३॥ न मे स्वतंत्रस्य परो गुरुः क्वचित् राजा गुरुर्भा
ति यशास्विनां परः ॥ सूत उवाच ॥७४॥ स्वयमेव महासेनः पार्श्वस्थानाह गर्वदृक् ॥ धर्मस्व कल्पितं तात-
निरंकुशशिरोमणिः ॥७५॥ यत्र यत्र भवतां विचारणा तत्र तत्र परिपृच्छ्यता मम ॥ यानि यानि वचनान्यहं
ब्रुवे तानि तानि निगमेषु दृश्यताम् ॥७६॥ इत्युक्त्वा स महासेनः सेनां कृत्वा विनिर्गतः ॥ सुमेधसं विजेतुं प्राक्
सम्भत्य वलवाहनः ॥७७॥ अभिमान महाज्वाला दग्धदेह दुर्मोधमः ॥ नदेव गुरुवाक्यार्थो ध्वस्तोधैर्य वि
नाशनः ॥७८॥ प्रतस्थे ऽधार्मिकैर्युक्तो धार्मिकैश्च विगर्हितः ॥ अथ श्रुत्वा सुमेधाः प्राक् रिपोरुद्योगमाय

काशी तम ॥ ७९॥ स्वसैन्येन व्रतः प्रायात् महासेन वथोद्यतः ॥ ब्राह्मणान् पूज्य विधिवत् काशिनाथं समर्च्यच ॥ ८०॥ क्षे ५
॥ ३४॥ त्ररक्षाकरान्सर्वान् संपूज्य श्रद्धयान्वितः॥ प्रस्थितः शिवनामांक सन्नाहादिर्भयोज्झितः ॥ ८१॥ शिवनामांकितभु
त्वाः सैन्यलोकाः सुमेधसः ॥ सैन्योप करणं तस्य यत्किंचित्सु महात्मनः ॥ ८२॥ शिव नामांकितं भाति नकलिस्तत्र
विध्यते ॥ कलिः प्रतिष्ठान पतिं वहुकालं समीरते ॥ ८३॥ प्रवेष्टुं नसमर्थस्तं शिवरूपं महीसुराः॥ विभूति
भूषिततनुः शिव सन्नाम सन्मुखः॥ ८४॥ शिवाक्ष मालितः सौम्यः शिव कीर्तन तत्परः॥ नविस्मरति मेधावी
शिवं शिव वथूं परां ॥ ८५॥ आरम्य वहुलं कालं कलिना धीर भीरुणा ॥ प्रवेष्टुं ससमारब्धः शिवेन परिरक्षि
तः ॥ ८६॥ ऋषयऊचुः ॥ किमर्थं कलिना राजा । श्लिष्यते साधु सम्मतः ॥ किंवा कलेरपकृतं राज्ञाशिव
परेणच ॥ ८७॥ सूतउवाच ॥ कलिना द्वापरेणापि विवादः समजायत ॥ विध्यं प्रजापति क्षेत्रे द्वापरं कलिरब्र
वीत् ॥ ८८॥ अहं चतुर्युगे ष्वत्र समर्थः सर्व कृत्सकृत् ॥ नियन्तुं नच शक्योहं मात्रापवित्र मप्युत ॥ ८९ ॥ ३४॥

मयि जीवति लोकेशे वर्णाश्रमनिबन्धनाः ॥ सेतवो भीतिमागत्य पलायन्ते दिशो दश ॥ ९०॥ मच्छंदानुगतो
लोकः सुखमास्तेऽविचारकः ॥ निरंकुशोऽति गहनः सर्ववस्तुषु संश्रितः ॥ ९१॥ वर्णाश्रमेषु सौख्येषु पुरुषार्थे
निरोधकः ॥ द्वापर उवाच ॥ अहो वत महद्वाक्यं तव दुष्टस्य दुर्मतिः ॥ ९२॥ न लज्जसे वदन्नित्थं स्वमुखेन
जुगुप्सितम् ॥ एवं कः कथयेत्पापो वर्णाश्रम[illegible]रिपुर्परम् ॥ ९३॥ न शोभसे सत्सभासु धिक्कृतः प्राकृतैरपि ॥
अजितेन्द्रिय धूर्तस्त्वमधार्मिक महाग्रहः ॥ धीरान् धर्मपरान् स्प्रष्टुमपि न त्वं क्षमोऽसि ॥ प्रतिष्ठानपतीरा
जा सुमेधाः शंकरप्रियः ॥ ९५॥ तं चेत्प्रविश्य त्वद्धर्मं प्रवर्तयसि धार्मिकम् ॥ तदा तवोक्तं सत्यं स्यात् सर्वध
र्म पराप्रिय ॥ ९६॥ कलिरुवाच ॥ एष गच्छाम्यहं तावत् प्रतीक्षस्व क्षणेन तत् ॥ करिष्यामि यथा राज्ञो बु-
12 द्धिर्मम पराभवेत् ॥ ९७॥ मयि प्रवृत्ते लोकेशे क्व धर्मः क्व हरिः शिवः ॥ धर्मादीनां कथा कानु वर्णाश्रमनिबन्ध
ना ॥ ९८॥ अहं स्वतंत्रः सुखदः सुखरूपः सुखावहः ॥ इत्युक्त्वा द्वापरं सोऽथ प्रतिष्ठानपतिं गतः ॥ ९९॥ द्वि

काशी द्वारान्वेषणकृन्नित्यं नानारूपधरः कलिः ॥ न प्राप शिवभक्तस्य धार्मिकस्य निरन्तरम् ॥ १००॥ छिद्रं कलि महायत्न
माश्रितोऽपि कदाचन ॥ संवत्सरत्रयं सार्धं स्थित्वा राज्ञो गृहे कलिः ॥ १ ॥ जगाम स तु राज्ञोऽग्रे वंचनाय कृतोद्य
॥३५॥ मः ॥ नान्तरं समर्थो नाऽलेभे शंकरस्य सुमेधसः ॥ २॥ काशीं त्यक्त्वा काशिराज्ञः प्राप्तः शीघ्रं सुमेधसम् ॥ ब्रह्मब्रा
ह्मण धर्माणां दोषान् गृह्णन् गुणांस्तु त्यजन् ॥ ३॥ युद्धाय सज्जः पापात्मा मयाजितमितीरयन् ॥ अहं काशि
पतिः राजा सर्वेश्वर नमस्कृतः ॥ ४॥ अहं सुमेधसं तुच्छं जित्वाऽन्यांश्च जये परान् ॥ अभिमान महादंडस्त
ब्धो वाक् शौर्य संयुतः ॥ ५॥ युद्धं चकार किंचित्स प्रतिष्ठान नृपेण ह ॥ ध्रियतां ध्रियतां राजा प्रतिष्ठानपतिः
कृशः ॥ ६॥ न पुनर्मांस मासाद्य युद्धं कुर्यात् यथा तथा ॥ मम काशिपते स्त्वग्रे कथं स्थास्यति दुर्मतिः
॥ ७॥ वदन्नित्थं महासेनो महाबल पराक्रमः ॥ तदा सुमेधसा राज्ञा धृतः शिव पराङ्मुखः ॥ ८॥ पृष्टश्च
त्वं महाराजा मया तुच्छेन किं जितः ॥ वामदेवेन संवादं कृत्वापि त्वं सचेतनः ॥ ९॥ शिवभक्तस्य ते राजन्

कथमेवं पराभवः ॥ पापात्म स्तस्य शान्तस्य धार्मिकस्य महात्मनः ॥१०॥ द्विज देवपितृ प्राप्त पूजकस्य रणार्थिनः ॥ वाम
देवादि ऋषिभि र्योध्थितस्यापि सन्मतेः ॥११॥ प्रजापालन रक्तस्य शूरस्य विजितात्मनः ॥ नहि सत्तीर्थवासेन सत्सं
गेन श्रुतेनवा ॥१२॥ मतिः कलुषिता नृणां भवति ब्रह्मसेविनाम् ॥ नहि पापात्मनां संगो भवेत्पुण्य जुषां क्वचित्
॥१३॥ कथमेवं पराभूति स्तुच्छा, स्वेच्छा परस्य भोः ॥ तत्र ऽ जाता महाराज विचार्य वद तत्वतः ॥१४॥ सूत=
उवाच ॥ एवमुक्तः काशिराजो धार्मिकेण सुमेधसा ॥ लज्जितो ऽवाक् शिराजातः किंचिन्नोवाच तं नृपम्
॥१५॥ कलिरन्तर मासाद्य नत्वा सुमति मीश्वरम् ॥ प्रविष्टः काशिराजस्य देहं लज्जा परः सच ॥१६॥ द्वापरं नो
क्तवान् किंचित्तेनैव सह जग्मिवान् ॥ सुमतिः काशिराजं तं मोचयित्वा द्विजेर्वृतः ॥१७॥ उवाच काशि
1/3 राजं तं गच्छ काशीं नराधिप ॥ महासेनः स्वतः पापः आविष्टः कलिनापुनः ॥१८॥ तस्य किंचेष्टितं ब्रूयां पा
पात्मा पतितोयथा ॥ व्रीडितः समहातीव्र स्तीर्थव्याजेन निर्गतः ॥१९॥ यत्र यत्र महासेनः प्रयाति चिरदुःखि

काशी तः॥ तत्र तत्र महातीर्थं काशी सद्भिः प्रवर्ण्यते ॥२०॥ एवं तीर्थान्यनेकानि कृत्वा राजा सुदुर्मनाः॥ द्वारकां प्राप सक
लिस्त्यक्त्वा भीतः पलायितः॥२१॥ निष्पापो द्वारकां गत्वा कलिना च विनाकृतः॥ संस्मरन् काशिकां पुण्यां परमानन्द रह ५
॥३६॥ रूपिणीम्॥२२॥ कथं यास्ये पुनः काशीं ब्रह्मादि सुर सेविताम्॥ नय मां देवदेवेश द्वारकानाथ केशव॥२३॥ स्वर्धुनी
तीरवसतिं काशीं कामदुघां सताम्॥ प्रत्यहं पूजयित्वा तु देवं देवकी नन्दनम्॥२४॥ प्रार्थयामास नियतः काशी
विरहकातरः॥ काशीं प्रस्थापय विभो द्वारकानाथ केशव॥२५॥ अनादरः काशिकायां सत्सु श्रीगुरुषु प्रभो॥ शि
वे शिवकथायां च जातः पापविवर्द्धनः॥२६॥ अहो सुकृतमेवात्र प्रकर्त्तव्यमहर्निशम्॥ यद्दिनान्युदयं प्राप्याहं
जातस्त्वात्मघातकः॥२७॥ दास्यं कृत्वाप्यहं राजा स्थास्यामि तव सन्निधौ॥ प्रत्यहं याचमानस्तु निःपापः
पुण्य संयुतः॥२८॥ न विस्मरति काशीं स राजा विरह कातरः॥ प्राप वाराणसी देशं विह्वलः संस्मरन् शिवौ॥
॥२९॥ ऋषय ऊचुः॥ यदा सुमेधसा राजा पराभूतो विनिर्गतः॥ तदा सुमेध्यसः कृत्यमन्यतां साधु सम्मतम्॥
॥३६॥

॥३०॥ महात्मनां वदान्यानां सत्संगः कथयतां गिराम् ॥ मनस्त्यजति दौरात्म्यं बहुजन्मार्जितं क्षणात् ॥३१॥
दुग
तैरेव साधुभिः पापा द्रोहिणः शास्त्रदेवयोः ॥ यान्त्यसद्गतिमापन्ना गुरुद्रोहरताः खलाः ॥३२॥ सूत उवा
च ॥ सुमेधास्तं पराभूय तस्य पुत्रं महामतिम् ॥ स्थापयामास तद्राज्ये शिवभक्त्या समन्वितः ॥३३॥ उवाच
च महात्मानं महात्मा समरामतिं ॥ पाहि लोकान् भज शिवं तिष्ठ काश्यां वसंश्चर ॥३४॥ इत्युपादिश्य स
महान् सुमेधास्तं सुमेधसम् ॥ शिवं शिवां समाराध्य मंत्रिणश्चोपदिश्य सः ॥३५॥ ययौ प्रतिष्ठानपुरं कलिं
जित्वापि धीरधीः ॥ ऋषय ऊचुः ॥ उपदेशो मंत्रिणां कः कृतो राज्ञा सुमेधसा ॥ तं श्रोतुं वयमिच्छामो विविच्य ब्रू
1/4 हि संमतम् ॥३६॥ सूत उवाच ॥ महासेन जितं दृष्ट्वा मंत्रिणस्तु सुमेधसम् ॥ ऊचुः कथं न गृह्येत काशिराज्यं जि
तं त्वया ॥३७॥ सुमेधोवाच ॥ तदेव राज्यं ममनैव मंत्रिणः कुतः पुनः शंकरगेहमेतत् ॥ राजाधिराजः स हि शूलपा
णिर्वयं तदाज्ञाप्रतिपालकाये ॥३८॥ ब्रह्मांडकोटिप्रभवोपि ये स्युस्ते शंकराज्ञां न विचारयन्ति ॥ वयं पुनः के कृतदी

काशी नजीवाः श्रीशंकराज्ञां प्रविचारयामः ॥३९॥ नयुक्तं स्वाम्यमन्यत्र किंपुनः काशि मंडले ॥ अन्यत्र स्वामी जगन्नाथो
॥३७॥ विश्वनाथः सुमुक्तिदः ॥४०॥ देहस्यापि नमे स्वाम्यं किंपुन र्धन राज्ययोः ॥ गुरुरुवाच ॥ इत्युक्त्वा मंत्रिमुख्येभ्यः सुमेधाः रह॰
स्वगृहं ययौ ॥४१॥ महासेनो दिनैः प्राप काशिं दृष्ट्वा विमूर्च्छितः ॥ पुनरुत्थाय व्यलुठं हा काशी त्राहि मामघम् ॥ ५
॥४२॥ तवापराधीनं देव ब्रासण दूषणम् ॥ गुर्वाज्ञा भंगकं पापंमहा विषयलोलुपम् ॥४३॥ पुत्राय राज्यं निवेश्य
कृत्तिवासेश्वर सन्नि धौ ॥ स्थित्वा वैराग्य बहुलो सिद्धिं प्राप सुदुर्लभाम् ॥४४॥ कलि द्वापरयो र्वादः स्पष्टो भूव्य
वहारतः ॥ धीरो जितेन्द्रियो यस्तु तं कलिर्न प्रबाधते ॥४५॥ अजितेन्द्रिय लोकस्य कलिः स्वामी भवेदिह ॥
कलौ विवेकिनः शांता विरक्ता धर्मबुद्धयः ॥४६॥ न सन्ति तस्माद्धि कलिः पुरुषार्थ विघातकः ॥ अतोविरक्तैः शान्तै
श्च भवितव्यं कलौ बलात् ॥४७॥ यथा मंगल मप्येतु काश्यां शंकर तुष्टिदैः ॥ दीपक उवाच ॥ जयदेव महा
ज्ञान दायक श्रुति विग्रह ॥ जय माया महापाशच्छेदक ध्वांत नाशक ॥४८॥ स्वामी प्रसादाद्देवेश पार्व
॥३७॥

त्नी वल्लभः शिवः ॥ दृष्टो जनार्दनः श्रीशो ब्रह्माद्या देव सत्तमाः ॥४९॥ अहोभगवता काशी दर्शिता सर्व मुक्तिदा ॥ स्व
रूपंच महाकाश्याः श्रावितं पुरुषार्थदम् ॥५०॥ कृतार्थोऽस्मि कृतार्थोऽस्मि कृतार्थोऽस्मि जगद्गुरो ॥ नमामि देवदेवेशं त्वां
सर्वज्ञं जगद्धितम् ॥५१॥ सूत उवाच ॥ इत्युक्त्वा दीपकः सेवां गुरोः कुर्वन्व्यवस्थितः ॥ काश्याः शृण्वन् शुभाः का
श्याः कथाः पावन पावनाः ॥५२॥ इति संश्रावितस्तिष्यो ब्रह्मणा काशि सत्कथा ॥ पितामहं नमस्कृत्य भारतं प्रवि
वेशह ॥५३॥ स्वस्वरूपं काशिरूपं विष्णुशंकरयोरपि ॥ धर्माधर्म स्वरूपंच ज्ञात्वा ब्रह्ममुखात्कलिः ॥५४॥ चचार
पृथिवी मेनां दुहिणाज्ञाकरः सदा ॥ ५५॥ इति श्री ब्रह्मवैवर्ते तृतीयविभागे पंचमोऽध्यायः ॥५॥ ऋषय ऊचुः ॥ सूतसू
त महाबुद्धे श्रुतं त्वत्तः सनातनम् ॥ ब्रह्मज्ञानं जीवपाश छेदनं मुक्तिदायकम् ॥१॥ परं त्वेकन्तु पृच्छामो ब्रूहि त्वं
शुभानन ॥ विना सांख्येन योगेन विनाष्टांगैर्विनामखैः ॥२॥ विना तपोभिरत्युग्रै र्विना तीर्थ परिभ्रमैः ॥ विना
व्रतादि शारीरै र्विना दानै र्विना जपैः ॥३॥ सिध्येन्निर्वाणभोगादि सिद्धो धर्मो महामते ॥ येन साधन सारेण

काशी तं पुनर्वक्तु मर्हसि ॥४॥ सत्यादिषु युगेष्वेव समोधर्मः सनातनः ॥ यः सदा प्राणि मात्राणां सिद्धेत्सिद्धिषु यःपरः॥
॥उ८॥ ५॥ तं धर्मं श्रोतुमिच्छामः कलौ खलु विशेषतः॥ साक्षात्कार कृते दुखं ब्रह्मणः किंपुनः कलौ ॥६॥ कलावपि २८
जना जीर्णं ज्ञानं तत्फलमेवच ॥ प्राप्नुयुर्मोक्ष ममल मित्याश्चर्यं वदस्वनः ॥७॥ सूत उवाच ॥ शृण्वन्तु ऋषयः
सर्वे ब्रह्मज्ञानस्य कारणम् ॥ कपिलेनेरितं सर्वं श्रुति सारं न्तणामिह ॥८॥ कपिलःश्री हरेः साक्षात् स्वरूपज्ञः
सनातनः ॥ हरिरेव महासिद्धः सिद्धैः पूज्यः कदाचन ॥९॥ त्वया खलु महादेव महायोगेश्वरेश्वर ॥ साध
नानि बहून्यत्र प्रोक्तानि मनसः शुचेः ॥१०॥ अस कृत्तानि सर्वाणि साधनानि कृतानि भोः॥ तथापि मनसः
शुद्धिर्जायते न कथंचन ॥११॥ जीवानां मोक्षवार्त्तापि कथं स्याद्विषयात्मनाम् ॥ अहो पापच्यमानानां
नरके गर्भसंकटे ॥१२॥ यातनाविविधाः श्रुत्वा दृष्ट्वा च सभयावयम् ॥ विताप सर्वमस्माभिर्मनसश्च
कृतः श्रमः ॥१३॥ तथापि न मनः शुद्धं विषसंस्कार वासितम् ॥ मनः शुद्धिं विना ज्ञानं जायते न कथंच
॥उ८॥

न १४ज्ञानं विना न सिध्येत जनः कल्प शतैरपि ॥ तस्मान्मोक्ष कथा दूरे स्थितेति प्रतिभाति नः ॥१५॥ एक
एव शरण्यस्त्वं शरणागत वत्सल ॥ श्री कपिल उवाच ॥ साधु पृष्टं मया सिद्धाः सिद्धिः सत्यं सुदूरतः ॥१६॥
तथापि यत्नेन त्याज्यो मोक्षेच्छुभिः सदा ॥ विषयाकार रूपेयं माया विष्णोः सुदुर्जया ॥१७॥ तन्न्द्वने
विषयान्सर्वान् निक्षेनेश्वर माश्रितः ॥ विषयैर्दुष्टचित्तानां नमृतिर्नैहि जीवनम् ॥१८॥ शोकसंतापर्जनका
पेक्षेन शनैः शनैः ॥ सहसा विषयाँस्त्यक्षन् याति जीवः सुदैन्यताम् ॥१९॥ कामादयः शतशो यत्र देहे तिष्ठ
16 न्ति नित्यं प्रभवश्च सिध्दाः ॥ कृतन्न वैराग्य विवेकथ्थर्मे मोक्षेषु चिन्ता सहजेषु कृत्रिमा ॥२०॥ मोक्ष
स्य बीजं परमस्ति चैकं प्रियः परेशो भगवान्कथंचित् ॥ हरिः प्रियः स्याद्य दिवा हरो हि तथा यथा विषया
मोह रूपाः ॥२१॥ अकृत्रिमा प्रीति रुदेति सर्वदा कामेषु कामारि मुरारि वर्जिता ॥ शास्त्रैर्गुरूपासन
तोनुलब्धैः तदुक्तथ्थर्मा चरणै नराणाम् ॥२२॥ हरौ हरे वा परमात्म निर्गुणे गुरौ रतिः स्याद्धितदा कदाचित् ॥

श्रुतेषु शास्त्रेष्वपि नोकदाचिद्धि निश्चिता बुद्धिरधर्म वृद्धि वर्तिनाम् ॥२३॥ कलौ भवेद्धर्म विवर्जिते नृणाम् ॥ रद:
काशी कुतः पुनः श्रवणं नास्ति तेषाम् ॥ सिद्धाः शृणुत भद्रं वः सारात्सारं वराम्परं ॥२४॥ नारदाय पुरा प्रोक्तं नरनाराय ६
॥३२॥ णेन हि ॥ नहितत्पाप जीवानां हृदये परितिष्ठति ॥ तस्मान्मह्यं वक्तव्यं गुरुदेवेषु नित्यशः ॥२५॥ कदाचिन्ना
रदः प्राप्तो नरनारायणाश्रमम् ॥ नारायणं महात्मानं पप्रच्छ जगतो हितम् ॥२६॥ नारद उवाच ॥ भगवन्
श्रोतु मिच्छामि नृणामाशु शुभप्रदम् ॥ वद किंचि द्धि चित्रार्थं येन शुद्धिः परा भवेत् ॥२७॥ रागद्वेषैःपीड
मानाः कामक्रोधैः सुदारुणैः ॥ शोक मोहैः सु दुष्पारैर्लोभा संतोष विग्रहैः ॥२८॥ अहं ममाभिमानोत्थैर्नानावि
षय पन्नगैः ॥ भक्ष्यमाणाः महान्तोऽपि दृष्टा विषय लोलुपाः ॥२९॥ न शास्त्रं न गुरुर्देवो न सत्संगो न धीरता ॥
गुणाय शुद्ध वर्णानामपि पंडित मानिनाम् ॥३०॥ सर्व वर्णाश्रमाणां ये धर्मास्तेषां न पालनम् ॥ दृश्यते किंचि
दपिच जीवानां कथमुद्धृतिः ॥३१॥ कालावयव दोषैस्तु ग्रस्यमानाः कथं प्रजाः ॥ भोग मोक्षादि पात्रं स्यु
॥३९॥

विवाद बहुलाः सदा ॥३२॥ कश्यपस्य महाविष्णो गुरो संस्तुतरां कथाम् ॥ नारायण उवाच ॥ शृणु नारद सर्वेषां मो
क्षोपायं सुदुर्लभम् ॥३३॥ वक्ष्यामि गोप्यमपि ते त्वं मे शिष्यो जगद्धितः ॥ वाराणसीति विख्याता नगरी सुगरीय
सी ॥३४॥ मया हरेण हरिणा द्रुहिणेन नलेन च ॥ आदित्येन गणेशेन भवान्या ऋषिभिः सुरैः ॥३५॥ यक्षैः किंपुरुषै
र्नागैर्गन्धर्वैरप्सरोगणैः ॥ सिद्धचारण गंगादि तीर्थैर्यज्ञादिभिस्तथा ॥३६॥ सेवितेयं सदेशानैः परमानन्दकांक्षि
भिः ॥ मुक्तिदानामपि मुने महाप्रीतिकरी मता ॥३७॥ आनन्दवनमित्येव नामास्याः प्रथितं प्रियम् ॥ नारायणावास
मिति रुद्रावासमिति स्फुटम् ॥३८॥ ब्रह्मावासमिति प्राहुर्ब्रह्मविद्याविशारदाः ॥ शृणु तत्रत्य माहात्म्यं किंचिद्वक्ष्या
मि ते नव्य ॥३९॥ यत्र स्थितानां जन्तूनां साधनानि पदे पदे ॥ भवन्ति दृढबुद्धीनां निःपापानां न संशयः ॥४०॥ अ
हो लोकः शोके पततिहि वृथा साधनशतैः। परिक्रान्तां काशीं परिहरति देवोपहतधीः ॥४१॥ विनाक्लेशैर्यस्यां
विविधवृषसारं वृषपतिं लभन्ते यत्रत्याः पशुपतिं शास्त्रचरणाः ॥४२॥ काश्यां स्थित्वा प्रातरेवात्र ढुंढिं मावि

ढुंढेशं दंडपाणिं रविं [illegible] वा ॥ सर्वान्नत्वा काशिसंस्थान् सुनित्यं ततः कुर्यान्नित्यनैमित्तिकानि च ॥ ४३ ॥ काश्यां स्व
काशी दारेष्वपि नित्यवृत्तिः काश्यां स्ववित्तेष्वपि सुप्रवृत्तिः ॥ काश्यां कुटुंबेष्वपि यत्स्वबुद्धिर्देहे ह्यहं यस्य न तस्य शुद्धिः रह॰ ६
॥ ४० ॥ ॥ ४४ ॥ भोगेन मोक्षस्य सुखं कदाचित् मोक्षेन भोगास्तु यतो न नित्याः ॥ सुभोगमोक्षप्रद काशिकेयं न यस्य सौख्याय
सुखं न तस्य ॥ ४५ ॥ जितेन्द्रियत्वं सुतपो यतश्चोक्तं ऋतौ स्वभार्यागमनं ब्रह्मचर्यम् ॥ यथा कथंचिन्मम नाम
कीर्तनाद्वि मुच्यते सर्वदुःखे मनुष्यः ॥ ४६ ॥ शिवं शिवां प्रत्यहमर्चयन्नरस्तथा गणेशान् धृतसच्छिवव्रतः ॥
वर्तेत यः काशिकायां सदाजनो न तस्य दुःखं न च विघ्नपूगः ॥ ४७ ॥ न शक्यते तिष्ठ युगेषु कर्तुं तपो व्रतं यो
ग समाधियज्ञाः ॥ तस्मात्काश्यां संवसेच्छास्त्रयुक्त्या यथा न कामादिगणः पराभवेत् ॥ ४८ ॥ नारद उवा
च ॥ नारायण गुरो मह्यं कथयस्व महामुने ॥ का शास्त्रयुक्तिर्भगवन् यया कामादिसंजयः ॥ ४९ ॥ श्रीनारा
यण उवाच ॥ शृणु नारद वक्ष्यामि शास्त्रयुक्तिं सुदुर्लभाम् ॥ यामाश्रित्य तरेदेतत् दुर्गं विषयसंकटम् ॥
॥ ५० ॥

॥५०॥ रोगग्रस्ता निरोगाः दृश्यन्ते विविधा जनाः ॥ संसाररोग सुग्रस्ताः सदेवासुर मानवाः ॥ ५१ ॥ न विना का
शिकां केचिद् रोगाः संभवन्त्युत ॥ सहस्र कार्याणि विहाय काश्यां काशीगुणान् संश्रृणुयाद्यथावत् ॥५२॥
क्षेत्रस्वरूपं प्रतिबुध्यते यैः श्रद्धा रतिः पाप निवृत्तिरुद्भवेत् ॥ काशीकथा संश्रवणेन सम्यगतः शुद्धिर्जायते वै
नराणाम् ॥ ५३॥ स्थिति प्रकारं परमं वेत्ति सम्यक् स्थित्वा यथावत्प्रविमुच्यते भयात् ॥ काशी गुणान् शंकरो
वेत्ति सम्यक् किंचित्किंचिद्वयो ज्ञाननिष्ठाः ॥ ५४॥ ततोऽपि किंचिद्विबुधादयोऽपि ये विदुर्गुणान् स्वल्पतराणि
केचित् ॥ तेष्वेव कश्चित् दृढनिश्चयो भवेत् यः संवसेत्सर्वविषं विहाय ॥ ५५॥ विषं प्रपीतं सकृदत्र मारकं
गर्भप्रदा विषयाः पापरूपाः ॥ ते किं ममानन्द वने प्रभुक्ताः सुखं प्रयच्छन्ति सुदुर्भरायतः ॥५६॥ अतः कामः पाप
कर्मा वराकः कथं सुखायाऽस्तमदीर्घसत्वः ॥ क्रोधः पुनः क्रूरकर्मा कदर्यः सुखप्रदः कथमात्मन्य हन्ता ॥५७
लोभो दैन्यं न त्यजेत्क्वापि लोके तृष्णा भार्या संगता साधुनिन्द्या ॥ तस्मादेतैर्विघ्नरूपैर्नृशंसैः संसेव्य तेनो

काशी काशि सौख्य प्रदानैः ॥ ५८ ॥ काश्यां परानन्द मयं महत्सुखं शुद्धं कथं कामयानः काशिवासी ॥ गंगां विहायाशुचि र.टः
गर्तपायी धिग्धिक्कृतः साधुजनै र्दुरात्मा ॥ ५९ ॥ भवत्यवश्यं सुकृतै र्विहीनो मृतः सचेत्काशिकायां पिशाचः ॥ ६
॥४१॥ कामादीनां सेवया शास्त्रभंगः सच्छास्त्राणां सेवयानन्द संघः ॥ ६० ॥ तस्मात्मयोक्तं श्रवणं पुरस्तात् पुरस्कृतं
साधयेन्मोक्षमार्गम् ॥ ये संवसन्ति सततं ममालये शुद्ध भाव निरता स्तपोमयाः ॥ ६१ ॥ धन्यरूपममलं हि काशिका ॥
काशयेत्सुख करं न चान्यथा ॥ कोटि जन्म कृत पुण्य भारभृत्काशिकां समनु विश्य निर्मलः ॥ ६२ ॥ जायते
विगत भार जीवनः शांतिमाप पर शांति भाजनम् ॥ एकेन जन्मना काश्यां निर्वाणं समवाप्यते ॥ ६३ ॥ अतः
परं कः सुगम उपायः साधनै र्विना ॥ दृष्ट्वा वै दूरतः काशी ते पुण्याः पाप शात्रवः ॥ ६४ ॥ स्पर्शायै स्तेपि न्वित
नः श्रेष्ठा मोक्षैक भाजनाः ॥ एकरात्रं स्थिता येतु पुण्य संभार संततिः ॥ ६५ ॥ तेषां प्रवर्द्धते नित्यं मास संवत्सर
क्रमैः ॥ उत्तरोत्तर मायाति वृद्धिं धर्मै र्यथाकृतैः ॥ ६६ ॥ मनो यत्र निश्चलं हि रतिस्तत्र करोति हि ॥ मनसा सुवि

चार्याश्च सारं सारंग सम्मतः ॥ ६७ ॥ महासारतरां काशीं न त्यजेत्सारकामकः ॥ अतो मनः काशिकायां लग्नं मोक्षं
प्रदर्शयेत् ॥ ६८ ॥ अन्यत्र लग्नं सुदृढं दुःख मूलं प्रसेवयेत् ॥ शास्त्र युक्तिरियं प्रोक्ता मुमुक्षूणां सुखप्रदा ॥ ६९ ॥
ना शास्त्र परदृष्टीनां ज्ञानं भवति शाश्वतम् ॥ गुरु शास्त्र परो मार्गः साध्यः साधक पुंगवैः ॥ ७० ॥ न शास्त्र पर-
दृष्टीनां न विचारः कथंचन ॥ ७१ ॥ इति श्री ब्रह्मवैवर्त्ते कपिल सिद्ध संवादे मोक्षोपाये षष्ठोऽध्यायः ॥ ६ ॥ कपिल ७
उवाच ॥ एवं सिद्धाः काशिकायां वसेध्वः सर्वैर्धर्मैः संयुतः सोऽतिबंधः ॥ तस्माद्धर्माः सततं सिद्धिभूमौ सं
17 सेव्याः स्युः पातकं नाल्पमत्र ॥ १ ॥ ये ये धर्मा मानवैः संप्रयुक्ताः काश्यां ते तान् मोक्ष सिद्धिं नयन्ति ॥ तस्मा
त्सिद्धाः साधयेदात्म कार्यं सद्भिः शास्त्रैः श्रद्धया त्याग योगैः ॥ २ ॥ काश्यां कृतानां पापानां पुण्यानां वास
मृद्धयः ॥ भवन्ति सततं नूनं सुक्षेत्रे सुप्त बीजवत् ॥ ३ ॥ सिद्धाः ऊचुः ॥ देवदेवारविंदाक्ष सांख्य योग प्रव
र्तक ॥ कथं मुच्येत मनुजः काश्यामेव कृतैरघैः ॥ ४ ॥ मोक्षं चाप्नोति च कथं कथं वा जीवने सुखम् ॥ आन

काशी
॥४२॥

न्द कानने सस्मिन् कथमानन्द भाग्भवेत् ॥५॥ श्री कपिल उवाच॥ इदमेव पुरा पृष्टः पार्वत्या भगवान् भवः॥ पाप
नाशं धर्मवृद्धिमविस्तरेण मोचनम् ॥६॥ भवान्युवाच ॥ दीनानाथैक शरण देवदेव दयानिधे ॥ पापिलोका
न् भवादज्ञान् सूक्तैः पाप प्रनाशकैः ॥७॥ आगत्य शीघ्रं ये प्राप्ताः काशीतीर्णाः क्षणेन ते ॥ येतु स्थित्वा
सुकृतिनस्तेऽपि शीघ्रं परं गताः ॥८॥ पापं कृत्वा मलायेन्च ते षां मुक्तिः कथं भवेत् ॥ कृपया देव देवेश प्रायश्चि
त्त मशेषतः ॥९॥ श्री महादेव उवाच॥ शृणु पार्वति वक्ष्यामि यद्गोप्यं मम सर्वतः ॥ पुण्यवृद्धिः पापवृद्धिः
कर्तव्यं काशिवासिभिः ॥१०॥ नकोऽपि दृष्टो मनुजो विना पापं शरीरभाक् ॥ कुर्वन्नपि महापुण्यं पापं संस्का
रत श्चरेत् ॥११॥ देहः स्वकार्यं कुरुते इन्द्रियाणि स्वकर्मसु ॥ प्रवर्तंते बलादेव मनः केन निवार्यते ॥१२
प्रायश्चित्त त्रयं सूक्ष्मं मनुभूतं महात्मभिः ॥ ब्रह्महत्यादि पापानां मन्य पापकृतां नु किं ॥१३॥ काश्यामपि वस
न् जन्तुर्यदि पाप कृदत्र हि ॥ प्रायश्चित्त त्रयं कृत्वा सद्यो मुच्येत बन्धनात् ॥१४॥ देव्युवाच ॥ आश्च

॥४२॥

यं मेत भगवन् त्वया निगदितं विभो ॥ वाराणस्यां कृतैः पापै र्मुच्यते यन्नरः सकृत् ॥ १५॥ कृपया तत्रयं ब्रूहि
कलावपि हि निष्कृतिः ॥ कलौ कलुष चित्तानां कथमेः क परं पदम् ॥१६॥ श्रीभगवान् उवाच ॥ शृणु लो
करिते देवि लोकाना मुध्दृतिं परां ॥ प्रायश्चित्त त्रयं वक्ष्मि काश्येनः संदिथिस्सताम् ॥ १७॥ वापीकूपतडा
गादि जीर्णोध्दार कृतां नराणाम् ॥ प्रभवेऽत्र महत्पापं काश्यामपि कृतं हियत् ॥ १८॥ आपो नारा इति प्रोक्ता
आपो वै नरसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायण स्मृतः ॥ १९॥ तेनेश्वरेण हरिणा कृतं पाप प्रणाशनम् ॥
20 यत्र यत्र जलं काश्या मुध्दरे त्सुकृती नरः ॥ २०॥ तत्र तत्र मुदा युक्ताः पितरः पर्युपासते ॥ काश्यां रुद्रमयाः सर्वे
जंतवः श्रुति नोदिताः ॥२१॥ ते पिबन्ति जलं यत्र तडागादौ तृषार्दिताः ॥ तत्पुण्यं न मया वक्तुं शक्यं वर्ष
शतैरपि ॥२२॥ आसीत्पूर्वं पद्मो नाम वणिक् कश्चित्सु धार्मिकः ॥ कुलस्तंभस्य वापथ्ये तेन खातः प्रखानि
तः ॥ २३॥ तत्र गावो मनुष्याश्च पिबंत्यंभ स्तृषार्दिताः ॥ प्रत्यहं तस्य सुकृतं वर्ध्दते चन्द्रमा यथा ॥ २४॥

काशी सूक्ष्मधर्मो मनुष्याणां दुर्लभो विषयात्मनाम् ॥ कालेन महता तत्र दुर्भिक्षकरपीडितः ॥ २५ ॥ दरिद्रता मवापोच्चै २६-
॥४३॥ ब्रसर्वकृद्भूत्ततः ॥ ब्राह्मणेन धनतः क्वापि स्वधनार्थं ऋणी वणिक् ॥ २६ ॥ मद्धनं देहि देहीति परिक्षिप्तः पुनः
पुनः ॥ ब्राह्मणेन वणिक् धर्मपत्रो दैन्यमुपागतः ॥ २७ ॥ इदानीं न धनं किंचिदस्ति ब्राह्मणसत्तम ॥ ब्राह्म-
णउवाच ॥ शतत्रयपरिमाणं निष्कानां हेम देहि तत् ॥ २८ ॥ नो चेन्नडागो मन्नाम्ना प्रथितिं यात्वतः परम् ॥ त
त्कारितो बहुधने गंभीरो निर्मलोदकः ॥ २९ ॥ विमुक्तो भव दत्वाशु तडागं लोकसन्निधौ ॥ धर्मपत्र उवाच
॥ अवश्यं मोचयतु मां ऋणाद्धीर्घं भवान् प्रभो ॥ ३० ॥ ऋणयुक्ता म्रियंते चेत्पच्यन्ते नरकार्णवे ॥
जनाश्चौरजनस्यापि गृहीत्वा धनमत्र तु ॥ ३१ ॥ नरके परिपच्यन्ते ऋणयुक्ताः नराधमाः ॥ किंपुनर्ब्रा
ह्मणस्याणमात्रं हित्वा मृतो हि यः ॥ ३२ ॥ ब्राह्मणा यद्वदिष्यन्ति तत्कर्ता ह्यस्मि न संशयः ॥ सतु वार्द्धुषिको गत्वा
मेलयित्वा द्विजान्बहून् ॥ ३३ ॥ आनयामास देवेशि यत्र धर्मपत्रो वणिक् ॥ द्विजैः पृष्टो वणिक् विप्रोक ॥४३॥

ह्वा·

च्यतां कोन कारणम् ॥ यदर्थं वय मातुलात्त श्रुत्वा परिशामहे ॥ धर्मपथ उवाच ॥ नरके परिपच्यन्ते अर

ण्यमुक्ता नराधमाः ॥३५॥ अरं ऋणी ब्राह्मणस्य निष्कानां तु शत त्रयम् ॥ गृहीतं व्यवहारार्थं देवान्नस्तं शनैःश

नैः ॥३६॥ असौ विनिमयेनाशु सुवर्णस्य तडागजम् ॥ सुकृतं यद्भवत्येव विचार्येदं यथोच्यताम् ॥३७॥ यथा

कथंचिन्मुक्तः स्यां तथा शीघ्रं विधीयताम् ॥ ब्राह्मणा ऊचुः ॥ साधूक्तं धर्मपथ ते ऋणभीत्या महामते ॥ सुवि

चारितमस्माभि र्वक्तव्यं सुदृढं खलु ॥३८॥ अस्मानादृत्य यो धृष्टो न श्रोष्यति वचो हितं ॥ शिरस्तस्य विदी

र्णं सत् पतिष्यति न संशयः ॥३९॥ ब्राह्मण उवाच ॥ ब्राह्मणानां वचो यत्तं मया सर्वात्मना हितम् ॥ अत्र

प्रमाणं भगवान् विश्वेशः पार्वती पतिः ॥४०॥ धर्मपथ उवाच ॥ यद्भूमिदेवै र्वक्तव्यं तन्मया ग्राह्य मेवहि ॥

अत्र प्रमाणं भगवान् विश्वेशः पार्वतीपतिः ॥४१॥ द्विजा ऊचुः ॥ आनयन्तु मनुष्या ये समर्था महतीं शिलाम्

महादेव उवाच॥

॥ इति श्रुत्वा सुवलिभि र्वणिक् धर्मपथः क्षणात् ॥४२॥ आनयामास विपुलां दृष्ट्वा च ब्राह्मणा स्तुताम् ॥

काशी ॥द्विजा ऊचुः॥

निक्षिप्यतां तडागेऽस्य निमग्नान्त्ववधि ॥४३॥ यावन्मनुष्यैः पशुभिः पथिकैश्चापि तज्जलम् ॥ पीतं तद्धन

॥महादेव उवाच॥

पर्याप्तमुन्मज्जतु ततस्त्विदम् ॥४४॥ इत्युक्त्वा सा शिला विप्रैः पातिता तज्जले शुभे ॥ चक्रुः शिवकथां पुण्यां का २८

॥४४॥ शिवासि जनेर्वृताः ॥४५॥ क्षणान्तरे गौस्तृषिता सर्वज्ञाः समुपागता ॥ तत्या पीत्वा जलं तृप्ता साभवत्कृष्णपार्व

ती ॥ ४६॥ शिला ऋषिमुख्यानां प्रभावाज्जलमध्यतः ॥ जलोपर्यभवच्छीघ्रं पश्यतां सर्वदेहिनाम् ॥४७॥

यथान्नं बीफलं शुष्कं गच्छतीतस्ततस्ततः ॥ तथा सत्त्वरा जाता पश्य धर्मस्य गौरवम् ॥४८॥ सर्वलोका

स्तु तद्दृष्ट्वा प्रशंसुर्ऋषिपुंगवान् ॥ अपूर्वं दर्शितं पुण्यमृषिभिः सुमहात्मभिः ॥ ४९॥ अहो न दृष्टमस्माभिः

कदाचित्तु मदद्भुतम् ॥ पुण्यं सूक्ष्मं न जानन्ति सर्वे लोकाः कथंचन ॥५०॥ महादेव उवाच ॥ काश्यां किंचि

ज्जलं मैस्तु संपादितमनामयम् ॥ न तेषां पापलेशोऽपि काश्यामपि कृतः प्रिये ॥५१॥ परन्तु सावधानैर्हि कर्तव्यः

सुजलाशयः ॥ अपराधो न भवति महापापकृदन्वयः ॥५२॥ देव्युवाच ॥ जलाशये कृते देव कारिते वा महात्मभिः ॥

॥४४॥

कोपराध्यो भवेदत्र तन्ममाचक्ष्व शंकर ॥५३॥ श्रीमहादेव उवाच ॥ काश्यां तिले तिले लिंगं काश्यां तीर्थं पदेपदे
खननं काशि भूमेस्तु दुर्धरं भाति पार्वती ॥५४॥ जीर्णोद्धारं च ये कुर्युस्ते निःसन्देहा महाधियः ॥ स्वयं कृतं यत् खाता
दि तदनन्त फल प्रदम् ॥५५॥ ततोप्यधिक धर्मादि जनकं जीर्णमुद्धृतम् ॥ न तत्रालिंग पीठस्यान्ततीर्थखननं
भवेत् ॥५६॥ अतोजीर्णोद्धृतिः कार्या निरवद्या महाफला ॥ जीर्णोद्धारं प्रकुर्वन्ति तेषां विश्वेश्वरः स्वयम् ॥
५७॥ काश्यां कृतानां पापानां मूलोद्धारं करोति हि ॥ योबुद्धिपूर्वं प्रकरोति पापं न तस्य काश्यां मरणं प्रसिध्यति
॥५८॥ मृतोपि निर्वाण सुखं न चाप्नुयात् प्रकृत्पिशाचत्वमवाप्नुयान्नरः ॥ देव्युवाच ॥ पिशाचत्वस्य मर्यादां ब्रू
हि पापस्य चानघ ॥ यातनायाश्च यद्रूपं बुद्धिपूर्वं कृतं च यत् ॥५९॥ श्रीभगवान उवाच ॥ भवानी भवभीता
नां नृणां निस्तार कारणम् ॥ एवं पृथक् प्रवक्ष्यामि भीतानामभय प्रदम् ॥६०॥ काश्यामागत्य सततं श्रोत
व्या काशि सत्कथा ॥ न विना श्रवणं पुण्यं पापं वा वेत्ति कश्चन ॥६१॥ विदित्वा यतते भूयो निस्तारायपरा

काशी यच्च ॥ सर्वलोकेषु वेदेषु विचारः श्रवणाद्भवेत् ॥६२॥ श्रुतिस्मृतिपुराणेषु सर्वशास्त्रेषु पार्वति ॥ काशी
ब्रह्मेति विख्यातं न ह्यस्य प्राप्यतेऽन्तरं ॥६३॥ तस्मात्काशीगुणान्सर्वे तत्रतत्र वदन्ति हि ॥ श्रुत्वापि पापनि रत
॥४५॥ रता स्तान्हन्यात्कालभैरवः ॥६४॥ सततं निर्दयो भूत्वा यावत्पापं समाप्यते ॥ महापातकसंयुक्ता स्त्रिंशदब्द
सहस्रकम् ॥६५॥ प्रत्येकं प्राप्नुवन्त्येवं यातनां कालभैरवीम् ॥ क्षुद्राणि पापानि तु संग्रहेण भवन्त्यवश्यं
तु महान्ति तानि ॥६६॥ यथा हिरण्यं कणशोऽपि संचितं निष्कादि वृद्धिं भजते भवानी ॥ सर्वोपि लोकः
कुरुते प्रवृत्तिं प्रवृत्तिभाजां खलु पातकं स्यात् ॥६७॥ अतः कियज्जीवितमाकलय्य निवृत्तिरङ्गीक्रियते
मुमुक्षुभिः ॥ वाक्पातकं मानसकायिके च प्रवृत्तिमार्गे निरतस्यावश्यम् ॥६८॥ भवत्यसौ यद्यपि सा
वधान स्तथापि संस्कारवशादुपैति ॥ अतः प्रवृत्तिं परिहाय सेव्या वाराणसी साधुजनैः सुखार्थिभिः ॥
६९॥ नो चेद्यथेच्छाचरणेन यत्फलं तद्भोगकाले प्रकटीभविष्यति ॥ लौकिक्यो यातनाः कैश्चित्सो

र्तुं शक्या न पार्वति ॥ ७० ॥ किं पुनः कालराजेन कृतास्तीव्राति दुस्सहाः ॥ नित्यं कृतानां क्षुद्राणां पापा
नां नित्यकर्मणाम् ॥ ७१ ॥ नाशः संपाद्यते सद्भिः गंगास्नानादिनान्वभिः ॥ त्रिंशद्वर्ष सहस्राणि त्रिंशद्वर्षश
तानि च ॥ ७२ ॥ पच्यते दुःख संघोथैः कालराजेन सादरम् ॥ अतः श्रुत्वा तडागादि जीर्णोद्धारं प्रकल्पयेत्
॥ ७३ ॥ क्षेत्रे कृतानां पापानां प्रायश्चित्तं मतं मम ॥ अंसावथानाहि नरात्मानः कुर्वन्ति पापानि किमत्र चित्र
२३ म ॥ ७४ ॥ पठन्ति जानन्ति वदन्ति नित्यदा सुपंडितास्तेऽपि विषाग्नि मध्यगाः ॥ भवन्ति दुःखान्यनुभूय प
श्चात्तापेन पापेन च दह्यमानाः ॥ ७५ ॥ पुनः पुनर्विषयासक्त चित्ताः शास्त्रं गुरुं देवमथापि काशीं ॥ आ
श्रित्य भूयो विषये ष्वेव बुद्धिं कुर्वन्ति सत्यां ननु काशिकायाम् ॥ ७६ ॥ व्यवहारोऽपि ते स्त्यक्तः प्रसिद्धः
सर्व जन्तुषु ॥ मृत्तिका परिवर्त्तेन हिरण्यं प्राप्यते नहि ॥ ७७ ॥ अहो काश्याः कौतुकन्तु पश्य पार्वति
सदा ॥ गृहीत्वा नारकं देहं प्रददात्यमलं वपुः ॥ ७८ ॥ श्रुत्वाध्यायमिमं पुण्यं न दुःखै रभिभूयते ॥ सु

खवासश्च भवति काश्यां सर्वजनप्रियः ॥ ७०॥ इति श्री ब्रह्मवैवर्त्ते काशिमाहात्म्ये प्रायश्चित्तप्रसंगे तृतीय
विभागे सप्तमोऽध्यायः ॥ ७॥ देव्युवाच ॥ देवदेव महादेव भक्तानामभयप्रद ॥ काशीवासः सुगहनः पापिनांधनलोभि रह-
नाम् ॥ १॥ विषयासक्तमनसां न सुखाय कदाचन ॥ सुखाय सर्वलोकानां प्रवृत्तिः प्रथिता खलु ॥ २॥ विष
यैः परिपुष्टानां जीवनं नान्यथा भवेत् ॥ प्रायश्चित्तान्तरं देव वदस्व यदि मन्यसे ॥ ३॥ प्रायश्चित्तविहीनस्य-
यातना जायते ध्रुवम् ॥ विभेमि दीनान्मनुजान् दृष्ट्वा शास्त्रपराङ्मुखान् ॥ ४॥ तानप्युध्दर देवेश शठान्स्वे
च्छापरिग्रहान् ॥ श्रीमहादेव उवाच ॥ साधु पृष्टं त्वया देवि क्षेत्रपापकृतां नृणां । निस्तारः स्यात्कथं संक्षुप्रा
यश्चित्तेन येन हि ॥ ५॥ यतो ना प्रायश्चित्तविहीनानां यातना बहुदुःखदाः ॥ तस्मात्सर्वप्रयत्नेन प्रायश्चि
त्तं समाचरेत् ॥ ६॥ जैगीषव्यो मुनिश्रेष्ठस्तपस्वी मत्परायणः ॥ तेन पृष्टो ह मागत्य शिष्यार्थं तद्दयालुना
॥ ७॥ स्तुत्वा मां वैदिकैः सूक्तैः स्मार्तैः पौराणिकैः शुभैः ॥ प्रसन्नं मां मुनिर्ज्ञात्वा वचनं चेदमब्रवीत् ॥ ८॥ जै

जैगीषव्य उवाच ॥ किंचिद्विज्ञप्तुकामोऽहं देवदेव दयानिधे ॥ आज्ञया प्रवदाम्यज्ञः सर्वज्ञस्य तवाग्रतः
॥९॥ मया चोक्तो वदस्वेति त्वं मे भक्तः प्रियः शुचिः ॥ अदेयं तव नास्त्यद्य निर्वाणाद्यपि याच्यताम्
॥१०॥ यस्तु मां सर्वभावेन भजते कोऽपि मानवः ॥ न तस्यादेयमस्तीह त्रैलोक्ये सचराचरे ॥११॥ जैगी
षव्य उवाच ॥ अयं मम दुराचारः शिष्यः पापरतः सदा ॥ काश्यां वसन्नपि महात्कृत्याकृत्यं न वेत्ति यत्
८१ ॥१२॥ शिक्षितो बहुधाऽस्माभिर्बहुधा ताडितोऽपि हि ॥ परदारपरद्रोहरतः परधनापहृत् ॥१३॥ पिशु
नः पापनिरतो वेश्यागृहनिवासकृत् ॥ पितृमातृगुरुद्रोही विश्वमित्रध्रुगेव च ॥ किं बहूक्तेन देवेश
पापनिर्वचनं [illegible] मया ॥ न शक्यते लज्जयाऽस्य कर्तुं यद्ब्रह्मणोऽसकौ ॥१५॥ मया निष्काशितः पाप
आश्रमात्स्वात्ततो गतः ॥ किंचित्किंचिच्चेष्टितं हि ज्ञात्वा श्रुत्वापि शिक्षितः ॥१६॥ न करोति यदा किं
चिच्छिक्षितं निन्दितं त्वयम् ॥ तदा वाग्व्यवहारोऽपि त्यक्तः सर्वात्मना मया ॥१७॥ मत्सन्निधौ

विनयवान् स्वेच्छाचारो वरिः सदा ॥ इति पौरमुखाच्छ्रुत्वा चेष्टितं तस्य दुर्मतेः ॥ १८॥ मत्सन्निधानाद्गच्छ
त्वं नोचेद्य स्यामिदुःकृतम् ॥ मत्तः पठित्वा शास्त्राणि धर्मज्ञानमयानि च ॥ १९॥ करोषि नित्यं तत्कर्म येन लोकाः रह
पराङ्मुखाः ॥ वसुधा सर्वलोकेभ्यः श्रुत्वा दुर्विनयं तव ॥ २०॥ त्यक्तो मयायथेच्छं त्वं गच्छ वा तिष्ठ वाऽधु
ना ॥ इत्युक्तः स मया शिष्यो लज्जितः पापकृत्तमः ॥ २१॥ गन्तुं मतिं स्वीकृतवान् विहायान्यत्र काशिकाम् ॥
काशीं परित्यज्य गतोऽपि दूरं विंध्याद्रिकूटं समवाप्य चायम् ॥ २२॥ तपश्चचाराशु विशुद्धिकारणं वर्षत्रयं
पर्णफलादिभुक्परम् ॥ त्यक्त्वाद्रिकूटं च ततः प्रयातो गोदावरीं भीमरथीं ततोऽपि ॥ तत्रापि तप्त्वा सुचि
रं चलव्रतो न शर्म लेभे सुकृतैकसाध्यम् ॥ ततः श्रीशैलमासाद्य दृष्ट्वा स्वामिनमव्ययम् ॥ २४॥ स्थित
मग्रे विभुं स्कन्दं न ददर्शात्मनात्मजम् ॥ तत्रैव वसतिं चक्रे तपः श्राद्धं चकार च ॥ २५॥ काश्यां कृतानां पापा
नां शुद्धये धर्मवृद्धये ॥ एवं बहुतिथे काले सगस्तः कुंभसंभवः ॥ २६॥ काशीविरहदुःखेन विह्वलः स

(क) १ पंक्ति ४ — पाठान्तरं — "ततः प्रयातोऽति विरक्तियोगी ? गोदावरीं —०

मुपागतः ॥ हा काशि काशि हा काशि काशिके काशिके तिच्च ॥ २७ ॥ वदुष्वा व्याकुलो भूत्वा पठन् स्कन्दमुपागतः ॥
तेन दृष्टः
वारं वारं स्मरणतः काशि नामामृतस्य हि ॥ २८ ॥ काशिवासी सगस्त्यः स्कन्द एव च ॥ नाना तपोभिरत्युग्रैर्नम
या स्कन्द ईक्षितः ॥ २९ ॥ काशीनामानलेनाशु दग्धपापो हि दृष्टवान् ॥ इति मामुक्तवान् पूर्वं पुनः पृष्टो मया
स्वयम् ॥ ३० ॥ पुन रूचे तयोः शुद्धं संवादं काशिसम्भवम् ॥ अगस्त्यमागतं ज्ञात्वा स्कन्दः प्रीतमनाऽभवत् ॥ ३१ ॥
आगच्छागच्छ शीघ्रं मां परिष्वज महामुने ॥ काशिकाविरहात्त्वाद्य जाने व्याकुलमानसम् ॥ ३२ ॥ ज्ञानिना
25 मपि धीराणां योगिनां सुतपस्विनाम् ॥ काशीविरहजं दुःखं बाधते विदुषां सदा ॥ ३३ ॥ जडानां देहगेहादि
प्रीतियुक्तमनोधियाम् ॥ अन्यप्रदेशवत्काशी भाति नित्यं दुरात्मनाम् ॥ ३४ ॥ त्वं काशीवासतत्त्वज्ञः शं
कराचर्चन तत्त्ववित् ॥ देवैः स्वकार्यनिरतैः कर्मरूपे विवासितः ॥ ३५ ॥ काशीं पश्यति यः कश्चित् काश्यां व
सति यश्च हि ॥ काशीं स्मरति यः कश्चित् स पूज्यो मम सर्वदा ॥ ३६ ॥ इत्युक्त्वा पूजितस्तेन स्वामिना मुनिसत्त

मः ॥ दत्वा च मन्नपानादि सर्वं पप्रच्छ कुम्भजम् ॥ ३७ ॥ स्कन्द उवाच ॥ वद स्वागत्य शुद्धात्मन् कं कामं करवाम र.
का. ते ॥ न चास्य दर्शनं प्राप्य शोचितुं त्वमिहार्हसि ॥ ३८ ॥ अगस्त्य उवाच ॥ जयदेव महादेव तनयानंददायक
॥ ४८ ॥ ॥ वाराणसीं प्रापयस्व परितुष्टोऽसि षण्मुख ॥ ३९ ॥ स्कन्द उवाच ॥ त्वं प्राप्स्यसि महाबुद्धे विश्रान्ते काशि
कां शुभाम् ॥ तथापि कर्म गहनं काशीं त्यक्त्वात्र तिष्ठसि ॥ ४० ॥ न ज्ञायते सूक्ष्मतरं हि किंचित् कर्मास्ति लो
कस्य सुदुर्विभाव्यम् ॥ योगादि यज्ञादि तपोभिरुग्रैर्यैः कस्य ते संप्रति नास्ति काशी ॥ ४१ ॥ न ज्ञायते कस्य
किमस्ति पुण्यं स्वल्पोऽपि काश्यां तनुभृत्सदाऽस्ते ॥ देवादयोऽपि प्रभवन्ति नैव स्थातुं क्षणं काशिकायां कुगर्वाः
॥ ४२ ॥ विश्वेश विश्वेश शरण्य शंभो नान्या गतिस्त्वत्पदाब्जं विहाय ॥ ४३ ॥ अनेकतापार्दितमानसानामस्माक
माकांक्षितदानदक्ष ॥ त्वया कृतेयं जनतापशान्तये अपा सानामृतं पाययितुं जनानाम् ॥ ४५ ॥ न जातिशी
लं सुकृतं मनागपि ज्ञाता एषामृतं यच्छति शंकरः क्वचित् ॥ पुराण शास्त्र श्रुति धर्मशास्त्रैर्विद्धि रेभिर्... ॥ ४८ ॥

मेदितं दीन साध्यम् ॥ ४५ ॥ आशामात्रं साधनं नः कृपालो नोवा धर्मः सांख्य युक्तं तपो वा ॥ दीनानहंका
र विकारहीनान् प्रयाति काशीपति रादरात्मा ॥ ४६ ॥ दीनानाथैक शरणं क्षेत्र क्षेत्रज्ञ संयुतम् ॥ प्राप्यते
निरहंकारै राशाशात विवर्जितैः ॥ ४७ ॥ अगस्त्य उवाच ॥ प्रमादाद्यदि सूक्ष्मं वा स्थूलं वा पातकं नभिः
॥ कृतं काश्यां नार कारैकथं तस्याशु निष्कृतिः ॥ ४८ ॥ स्कन्द उवाच ॥ अविमुक्ते कृतानां तु पापानां कुंभ
28 संभव ॥ न दृष्टा न श्रुता वापि मया शिव मुखादपि ॥ ४९ ॥ निष्कृतिः स्थूल सूक्ष्माणां शिवो वेत्ति न
चापरः ॥ जैगीषव्य उवाच ॥ इति श्रुत्वा स्कन्द मुखाज्जात त्रासस्त्वयं पुनः ॥ ५० ॥ सहसा मामथाग
त्य प्रार्थयामास शंकर ॥ मयापि न श्रुता दृष्टा क्षेत्र पाप कृतां नृणाम् ॥ ५१ ॥ निष्कृतिः शर्व सर्वेश ब्रूहि
चेदस्ति शंकर ॥ श्रीमहादेव उवाच ॥ जैगीषव्य मुने त्वं मे भक्तः परम तापसः ॥ श्रुति स्मृति पुराणज्ञ का
शीतत्त्व विदांवर ॥ तवाग्रे कथयिष्यामि काशी माहात्म्य मुत्तमम् ॥ प्रायश्चित्तं न कर्मास्ति किंचित्

का॰ सेन्न पाप कृतां नृणाम् ॥५३॥ अस्ति चैकं सुगोप्यं हि त्वदग्रे कथयामि तत् ॥ प्रायश्चित्तं न कर्मास्ति मुने ज्ञानं विना

॥४९॥ क्वचित् ॥५४॥ ज्ञानं तु दुर्लभं नृणां विषया सक्त चेतसाम् ॥ तत् ज्ञानं काशिकायां तु साक्षाद् भवति देहिनाम् २॰

॥५५॥ देहाभि मानिनां सौख्यं क्षणि णा मपि दुर्ल्लभम् ॥ अज्ञानन्द वने ज्ञान मान्च्छादयति दुर्मतिः ॥५६॥ स्व

त्सेनाच्छाद्यते ज्ञान मंशुल्या सूर्यवत्खलु ॥ तस्मात् त्वमिव योऽधीरः स भवेत् ज्ञान भाजनम् ॥५७॥ नाजितेन्द्रि

यता लोके न वैराग्यं वृ क्षोऽपि न ॥ विविक्त सेवा सत्संग श्रवणाद्य पि दुर्लभम् ॥ ५८॥ अन्यान्यपि मुमुक्षूणां

साधनानि महान्त्यपि ॥ भवन्ति विधि दृष्टेन नचान्यत्रा कृतात्मनाम् ॥५९॥ भवन्ति काश्यां सफलानि

तानि मोक्षाव सानानि सुसाधनानि ॥ सदा सदानन्द मये ममालये मया सहायेन सु साधितानि ॥६०॥

काश्यां स्थितानां जन्तूनामवि-चारित कर्मणाम् ॥ न सुखं न परा शान्ति स्तस्मा त्काश्यां विचार्य कृत ॥६१॥

सुख माप्नोति परमं परां शां प्रपश्यति ॥ प्रायश्चित्त विहीनानां ज्ञानं नास्ति सदा नृणाम् ॥६२॥ ज्ञानस्वरूपा

न शान्तिः कुत्रचिद्भवेत् ॥ ॥ किं पुनः का ॥४९॥

शिकामध्ये पापंकृत्वा सुखंलभेत् ॥ ब्रह्महत्यादि पापानां प्रायश्चित्तं हि काशिका ॥६३॥ काशिकायां
कृते पापे प्रायश्चित्तं नजायते ॥ प्रायश्चित्त विहीनानां पापनास्ति सदान्तृणाम् ॥६४॥ ज्ञान स्वरूपाका
शीयं पंचक्रोश परिमिता ॥ तस्याः प्रदक्षिणंकृत्वा नरः पापैः प्रमुच्यते ॥ ममब्रह्ममयंलिंग मा पाताला
त्समुत्थितम् ॥६५॥ शिवलोकोपरिगत मत्यतिष्ठद्दशांगुलम् ॥ आजन्म संचितैः पापैर्मुच्यते तत्प्रद
क्षिणात् ॥ ६६॥ क्षेत्रे कृतानां पापानां प्रायश्चित्तं नचेतरत् ॥ प्रदक्षिणा द्वयंकृत्वा दशजन्म कृता
27 दघात् ॥६७॥ मुक्तो भवति पापात्मा सद्यो मोक्षमवाप्नुयात् ॥ शुभकृद्यदि कुर्योद्धि मोहात्पापंनतस्य
तत् ॥ ६८॥ क्षेत्रं प्रदक्षिणीकृत्य भवेत्पापोहि विज्वरः ॥ प्रदक्षिण त्रयंकृत्वा पापंजन्म शतार्जित
म् ॥६९॥ विलयं याति चैवात्र नकार्यात्र विचारणा ॥ यावज्जीवं वसेत्काश्यांप्रत्यब्दं सुप्रदक्षिण
म ॥ ७०॥ कुर्यादेव निरालस्यो मानन्द सदनस्य हि ॥ प्रत्यब्दंये प्रकुर्वन्ति पंचक्रोश प्रदक्षिणम्

काशी. ॥७१॥ जीवन्मुक्ता स्तु ते ज्ञेया निःपापाः काशिनिवासिनः ॥ ७२॥ इति श्री ब्रह्मवैवर्त्ते प्रायश्चित्त विनिर्णये अष्टमोऽध्यायः ॥८॥ महादेव उवाच ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ ऋषिः कुष्मांडतनयो मंडपः संग दोषतः ॥ १॥ बाल एव मम क्षेत्रे पापं चरति वेद वित् ॥ पित्रा निवारितो मात्रा भ्रात्रा

॥५०॥ श्रोत्रिय वंशजः ॥ २॥ असत्संगं त्यजति नो विषया सक्त मानसः ॥ परदार परद्रोह परद्रव्य रतः सदा ॥३॥ परापवाद कुशलो वेद वाद विवर्जितः ॥ यथा यथा वयस्तस्य वृद्धिं प्राप सुदुर्मतेः ॥४॥ तथा तथा पापरतः सत्संग विमुखः सदा ॥ मित्रैर्हिंस्रैर्नरपतेः संयतो राजवेश्मनि ॥५॥ प्रविष्टो धनमादाय चौर्येण स विनिर्गतः ॥ वेश्या गृहे तन्निक्षिप्य तयासह दिवानिशम् ॥६॥ रमते मंडपो विप्रः पितृविप्रत्व नाशकः ॥ कदाचिद्भ्रममाणोऽसौ तृषार्त्तः समपद्यत ॥ ७॥ मंचाग्रस्थास्ताम्रपात्रं गृहीत्वापीतवान्सुराम् ॥ जल बुध्या पातकं तज्जातं तदविचारतः ॥ ८॥ किमेतद्धि मया पीतमिति वेश्यां स

पृष्टवान् ॥ तमाह सा मयाऽऽनीतं सुरा पात्रं सुसौख्यकृत् ॥ त्वदर्थं संभृतं मा त्यक्त्वा पुनः पिब सकृत् सकृत् ॥
इति वेश्या वचः श्रुत्वा धिक् धिक् पापं महत्कृतम् ॥१०॥ वेश्यासंगेन मदिरा पीता ब्राह्मण सूनुना ॥ मंड
पस्य ततो भ्रित्र मित्र द्वय मासीत्सुदुःखितः ॥११॥ वेश्या मुखात्मदिरा पानं तस्य श्रुत्वा जगर्हतुः॥ आ
दौ चित्र स्तलो स्माकं संगी वेश्या रतस्ततः ॥ १२॥ मधुपानं ततो जातं ततस्त्वं किं करिष्यसि ॥ भ्राडौका
२४ दयामः पापं ते सुवर्णं देहि नो बहु ॥ १३॥ तथेत्युक्त्वा पुनर्वेश्याऽऽगारं गत्वा प्रविश्य सः ॥ सुवर्णं याच
यामास ताडयामास तं च सा ॥१४॥ ये च्योवाच ॥ वराक मम लीलायाः स्वादं ज्ञात्वापि मूर्खवत् ॥ सुव
र्णं याचसे किं त्वं लक्षमात्रं कियन्मम ॥ १५॥ चुंबने चुंबने लक्षं बहुभ्यः प्राप्नुमव्ययं ॥ त्वं मयोपेक्षि
तो दीनो दत्वा प्रार्थयसे धनम् ॥ १६॥ कामशास्त्रं त्वया मूढ पठितं न कदाचन ॥ इति लीलां न जाना
सि मम कंदर्प मोहिनीं ॥१७॥ गच्छ गच्छ मुखेनाशु याचकास्यो न सन्ति मे ॥ ताडयिष्यन्ति सर्वास्त्वां

का॰ निर्लज्जं ब्राह्मणाधमम् ॥१८॥ वेश्या गृहात्ततस्तूर्णं क्षुधितौ तितृषासितः ॥ पितुः सकाशमगमन्मातु र॰

॥५१॥ श्च प्रियकाम्यया ॥१९॥ ततस्तौ दारकौ प्राप्तौ मित्रत्वे परिकल्पितौ ॥ वदन्तौ देहि कनकमस्मदंशं त्व

माहृतम् ॥२०॥ राज्ञो गृहाद्यदानीतं स्तेयेनास्माभिरुत्तमम् ॥ इति श्रुत्वा पितातस्य महद्दुःखसमन्वि

तः ॥२१॥ उवाच दारकौ भीतः कौ युवां केन कर्मणा ॥ कौ भवन्तौ कथं संगः कृतोऽनेन दुरात्मना ॥२२

तद्धिरण्यं च कुत्रास्ते मदर्थं वा व्यवस्थितौ[1] ॥ दारकावूचतुः ॥ अहं कुविन्दस्त्वयं त्वपरो मंडपोऽनापि

तस्त्वयम् ॥ मैत्री त्रयाणां संभूता दैवादेषा त्रयात्मिका ॥२३॥ विभज्य भागाः सर्वैर्हि ग्रासा इत्यव

स्थितः कृतम् ॥ अनेन वेश्याभवने निक्षिप्तं सर्वमेव हि ॥२४॥ सा न प्रयच्छति मुने वेश्यावादवि

वादिनी ॥ अतः परं राजगृहे गम्यते वक्तुमेव हि ॥२५॥ देहि दापय चास्माकं धनं शीघ्रं सुदुःखदं ॥

नो चेत्तवात्मजः साध्वी शूलप्रोतो भविष्यति ॥२६॥ रक्ष पुत्रं तथास्मांश्च स्वात्मानमपि चानघ ॥

॥५१॥

1 (क) पाठान्तरः- "वामुपस्थितौ"

कुष्मांड उवाच ॥ आगच्छत मयासार्धं राजराजस्य सन्निधौ ॥ पुत्रं नीत्वा गमिष्यामि शास्त्यर्थं धर्मतोयथा
॥२७॥ राजभिः कृतदंडास्तु शुध्यन्ति मलिनो नराः ॥ अनिर्वेशा कृतः पापा गच्छन्ति नरकं मृताः ॥२८॥ ता
वूचतुः ॥ पुत्रं समर्पय मुने किमर्थं त्वं गमिष्यसि ॥ राज्ञो गृहे विवादार्थं न गन्तव्यं कदाचन ॥२९॥ कु
ष्मांड उवाच ॥ त्वयासह न संबन्धः इत्युक्त्वा नीयतां सुतम् ॥ नोचेदहं गमिष्यामि राजवेश्म सुनिश्चि
५१ तम् ॥३०॥ तावूचतुः ॥ त्वयासह न संबन्धो देहि मित्र द्रुतं शठम् ॥ अस्माभिरेव कर्तव्यं लिष्ठतिष्ठे
ति लज्जितः ॥३१॥ कुष्मांड उवाच ॥ पुत्र गच्छ द्विजश्रेष्ठ द्विजैः कृत्यं कृतं त्वया ॥ प्रायश्चित्तं विथा
पाद्य राज्ञा दत्तं नचान्यथा ॥३२॥ आगन्तव्यं त्वया वत्स पाहि नोचेध्वपा सुखम् ॥ तावन्नाहं तव
पिता नसुतस्त्वं मभाग्यवान् ॥३३॥ श्रीमहादेव उवाच ॥ जैगीषव्य मुनिश्रेष्ठ तेन विप्रेण मंडपः ॥
समर्पितस्तयोः पुत्रः स्नेहमुत्सृज्य दूरतः ॥३४॥ धार्मिका णां धनैः पुत्रैः कलत्रैः किं प्रयोजनम् ॥ ध

र्म संस्मर् श्रीलाश्च यलस्ते काशि संश्रयाः ॥३५॥ पुत्रो भ्राता पितावापि यः काश्यां पापमाचरेत् ॥ त्याज्य

का० स्वस पापात्मा भवेत्संसर्गजं भयम् ॥३६॥ तौ तं नीत्वा दूर देशं ताडयामासतुर्भृशम् ॥ सताडत मानो मूर्छां रु०

॥५२॥ त्वं प्राप मत्यु समांमुने ॥३७॥ मृतोऽयमिति चोत्सृज्य ययतुस्तौ विषण्णवत् ॥ पश्चात्तापेन संतप्तावसि संग

मसन्निधौ ॥३८॥ त्यक्त्वा विप्र सुतं भीतौ सिद्धि सिद्धेश्वरालयम् ॥ तत्रोषित्वा तु तां रात्रिं दुःखितौ क्षुधि

तौ भृशम् ॥३९॥ पश्चात्ताप परौ तौ तु पुन रन्वेषितुं गतौ ॥ मृतो वा जीवति तु वा ज्ञात्वा देशं त्यजामहे ॥

४०॥ यावद्विचारण परा वा गता वसि संगमे ॥ तावद्द्विज सुतो भीतो गत मूर्च्छः प्रतस्थिवान् ॥ ४१॥ पं

चक्रोशात्मकस्यैव शिव लिंगस्य तद्दिने ॥ प्रदक्षिणं प्रकुर्वन्ति शिव माहात्म्य वेदिनः ॥४२॥ क्षेत्र प्रदक्षि

णां कर्तुं संगेन चलितः स च ॥ तस्मिन् दिने कर्दमेश सन्निधौ यात्रिणः स्थिताः ॥४३॥ सोऽपि तत्र स्थि

तो विप्रो मंडपो मंडपेऽभवत् ॥ रात्रौ जागरणं तेन कृतं नृत्यं शिवाग्रतः ॥४४॥ सर्वैः प्रोत्साहितः साधु

॥५२॥

साधु साध्विति साध्विति ॥ अयं परम शैवस्य कुष्मांडस्य तु मंडपः ॥ ४५ ॥ पुनः शिव व्रत धरः साधुर्नृत्यति गाय
ति ॥ न तस्य चेष्टितं कोऽपि तन्मध्ये वेत्ति तत्वतः ॥ ४६ ॥ अत एवादृतः सद्भिर्भक्तिं दृष्ट्वा बहिर्गताम् ॥ सोऽ
पि चारु विचित्रांगः सर्वेषां सुमनोहरः ॥ ४७ ॥ बभूव सद्भक्ति परः सत्संगेन द्विजोत्तमः ॥ विचार्य मनसि से
३० वं शिव भक्त्या सतां प्रियः ॥ ४८ ॥ जातोऽस्मि दुष्टोऽपि सदा पंच पातक संयुतः ॥ साधुवादः सतां सेषो भवति
प्रत्यहं मम ॥ ४९ ॥ धन धान्यादि लब्धिश्च भोजना च्छादनानि च ॥ अनायासेन लभ्यन्ते ऋजु मार्गेण
नित्यदा ॥ ५० ॥ शिवे भक्तिः सतां तुष्टि र्देहे पुष्टि र्निराकुला ॥ येन मार्गेण भवति समार्गः सर्व सम्मतः ॥ ५१ ॥
एवं विचारयन्सोऽपि चंडिकां प्राप्य मंडपः ॥ तत्र पूजां भीमचंडाः कृत्वा काशि निवासिभिः ॥ ५२ ॥ ब्रासयै
र्भोजितः सम्यगादृत्य शिव भक्तितः ॥ उपविष्टस्ततो रात्रौ देव्याः पुरत आदृतः ॥ ५३ ॥ तन्मध्ये मंडपः
चौंडो नृत्यं गानं चकार ह ॥ साधुवादेन महता पुनस्तैः साधु सत्कृतः ॥ ५४ ॥ तस्यापि च मनोव्रसनं शि

(...) पंक्ति १ – "त्रिवेणी तर्हि निमज्जते"

का० चेद्धि स त्रिमज्जति ॥ अथ ततृतीये दिवसे मार्गे एव स मंडपः ॥५५॥ नृत्यन् गच्छति गायन् हरि स्वयमेव शिवः

शिवम् ॥ पदे पदे दक्षिणतः क्षेत्रस्य मम सद्द्विजः ॥५६॥ ब्रह्महत्यादि पापानां प्रायश्चित्तं भवेद्यथा ॥ महादे रह:

॥५३॥ व महादेव वासुदेव शिवेति च ॥५७॥ स्मरन्नृत्यन्न भीस्पृशः सर्वपाप बहिष्कृतः ॥ तृतीये दिवसे गत्वा तं दे

हली विनायकम् ॥५८॥ पूजयामास सोऽव्यग्रः काशीभक्ति विवृद्धये ॥ मंडपो लौल्य रहितः शिवनाम प

रायणः ॥ ५९॥ बलाद्वृत्तमपि त्यक्त्वा हरिकीर्त्तन तत्परः ॥ नाश्नाति न पिबत्यंभो न कस्यापि गृहे स्थितः ॥६०

निर्द्वंद्वः समदृक् शान्तो बभूव गत साध्वसः ॥ ब्राह्मणेन मयास्तेयं सुवर्णस्य कृतं रहः ॥६१॥ वंचितश्च

पिता मान्यो माता साध्वी च वंचिता ॥ पापेनोपार्जितं वित्तं वेश्या वेश्मनि तिष्ठति ॥६२॥ मनसावि

प्रहननं गमनं मातुरेव च ॥ संपन्नं च सुरापानं साक्षाद्वेश्या गृहेन किम् ॥६३॥ आहारो मैथुनं निद्रा

मिथ्यावादादयोपि च ॥ जाता मम वराकस्य कथं पाप परिक्षयः ॥६४॥ अनुतापैः सुसंतप्तो मंडपोमं

॥५३॥

ड वर्जितः ॥
क्षेत्र प्रदक्षिणं कुर्वन् निःपापः समपद्यत ॥ ६५॥ क्वचिद्रुदति संस्मृत्य संस्मृत्य स्वाघ संचयम् ॥ क्वचिद्ध
सति क्षेत्रस्य प्रदक्षिण कृदित्यहम् ॥६६॥ काशी काशीति काशीति शिवशंकर केशव ॥ पाहि मां पतितं
दीनं गुरुदेवा पराधिनम् ॥ ६७॥ रामेश्वरं समागम्य स्नात्वा संतर्प्य देवताः॥ रामेश्वरं समभ्यर्च्य सोमनार्थं
तथार्च्य च ॥६८॥ रामं राजीव पत्राक्षं सीता लक्ष्मण संयुतम् ॥ नभुक्तं न पिवत्यंभो नृत्य गीतादितत्परः॥
३/ ६९॥ प्रार्थ्यमानोऽपि गच्छाति किंचिंदपि नखेदकृत् ॥ ततः प्रचलिताः सर्वे यात्रिणः शिवतत्पराः॥७०॥
मंडपोऽपि स्मरन् काशीं शिवं विष्णुं प्रतस्थिवान् ॥ वृषभध्वज मागत्य स्नात्वा वै कापिले जले ॥७१॥ दे
वं संपूज्य विधिवत् स्थित्वा तत्रच पूर्ववत् ॥ ततः प्रभाते वरणा संगमे स्नान माप्य च ॥७२॥ गताः
सर्वे विश्वनाथं द्रष्टुं श्रीपार्वती पतिम् ॥ तत्रस्थित्वा महापूजां कृत्वा पूजां महाजनाः॥७३॥ अन्नादि
वासो दानानि ददुः शंकर तुष्टये ॥ मंडपोऽपि तथाकृत्वा मोक्ष मंडप मध्यतः ॥७४॥ साष्टांगं प्रणतः शाह

का· सत्सदो मध्य गोऽध्य कृत् ॥ मया पापानि सर्वाणि सुमहान्ति बहून्यपि ॥ ७५॥ कृतानि तन्न वदत निःकृतिं २८
मम सत्तमाः ॥ यथाऽहं पाप निर्मुक्तो भवामि तु तदुच्यताम् ॥ ७६॥ सदस्याः ऊचुः ॥ त्वं निष्पापोऽसि भक्तो त्वयाद्यैः
॥५४॥ ऽसि शिवयोः कथा वस्य च ॥ पंचक्रोशात्मकं लिंगं सत्संगाद्दक्षरी कृतम् ॥ ७७॥ मैत्री वाणिज्य मूलाद्यैः
द्यैः किं पुनः श्रवणादिभिः ॥ येन केनापि सुमहत्तस्य पापं न विद्यते ॥ ७८॥ मंडप उवाच ॥ पित्रा निः
काशितः सोऽहं कथं यास्यामि तद्गृहे ॥ प्रतीतिकारणं किंचित्-अस्ति चेद्गमनं गृहे ॥ ७९॥ प्रेक्षय
न्तु तदा सभ्याः शास्त्र प्रत्यय संयुताः ॥ गर्हयन्ति गृहस्थानो नोचेत्किं गमनेन मे ॥ ८०॥ सदस्याः ऊ
चुः ॥ आकारयस्व पितरं मस्म द्वचन गौरवात् ॥ प्रतीतिं दर्शयामोऽद्य दंडनायस्य सन्निधौ ॥ ८१
श्री महादेव उवाच ॥ मंडपोऽपि गृहद्वारं गत्वा शिव शिवेति च ॥ महादेव महादेवेत्युक्त्वा तूष्णीं
व्यवस्थितः ॥ ८२॥ कुष्मांडः प्राह दयितां कोऽतिथि र्द्वारि वर्त्तते ॥ पश्य पश्याशु सुभगे शिववाक्
॥५४॥

शंकरप्रियः ॥ ८३॥ साभर्त्तुर्वचनाछ्रुत्वा दृष्ट्वा मंडपमात्मजम् ॥ उवाच वचनं भीता भर्तुः पुत्रार्थ मातुरा ॥ ८४॥
अकृत्वैव च निर्वेशं कथमागमनं वद ॥ मंडप उवाच ॥ आहूयन्ति सदस्यास्त्वां पितरं च ममानघं ॥ निर्वेश
वार्तां बहुलां न एव ब्रूयु एकलः ॥ ८५॥ जननी मंडपस्याथ गत्वा कुमांड मब्रवीत् ॥ पुत्रस्ते कृत निर्वेशः शि
वस्मरणतत्परः ॥ ८६॥ द्वारि तिष्ठति सद्द्वेषो नास्ति थिः कश्चनेतरः ॥ कृतनिर्वेश मनघं श्रुत्वा पुत्रं नु सद्वि
जः ॥ ८७॥ उत्थायागत्य सहसा ददर्श शिव रूपिणम् ॥ रुद्राक्ष मालिनं शान्तं विभूति कृत भूषणम् ॥
32 ८८॥ उवाच किं समायातः शीघ्रं धर्मेण योमहान् ॥ नहि स्वल्पेन धर्मेण प्रायश्चित्तं महद्भवेत् ॥ ८९॥ मंड
प उवाच ॥ मया बहूनि पापानि कृतानि विविधानि च ॥ न शाम्यन्ते त्वया पित्रा किमन्यैर्दूरसंस्थितैः ॥
९०॥ बलात् त्वा माहूयंत्येव सदस्याः शुद्धि दर्शिनः ॥ यद्रोचते कुरु तथा त्वं मत्स्नेहेन माव्रज ॥ ९१॥ इति
श्रुत्वा मंडपस्य वचः पत्न्या समन्वितः ॥ मुक्ति मंडपिकां पश्यत् सदस्यैः संस्थितां शुभाम् ॥ ९२॥ तेरादुलो

का॰ द्विजवरै र्धर्माधर्मे विचारकैः॥ उपावेश्य तमूचुस्ते पुत्रस्ते शुद्धिमाप्तवान्॥ ९३॥ कूष्मांड उवाच॥ प्रायश्चि ९८
॥५५॥ त्तेन केना सौ शुद्धिं प्राप्तो ममात्मजः॥ प्रतीतिर्मम का वास्याद नेन सह भुज्यते॥ ९४॥ सदस्याः ऊचुः॥ मुक्तिमं
डपिकायास्तु स्वामी विष्णुर्न चापरः॥ सचेद्वदति वेदात्मा तदा शंका न चोत्तरम्॥ ९५॥ तत्पार्श्वदा भानुमु
ख्या वदिष्यन्ति च सत्तमाः॥ तदा मन्यस्व सुप्रीतः शास्त्रदेव प्रसादतः॥ ९६॥ इत्युक्त्वा तं सदस्यास्ते तुष्टु
वुर्विष्णु मव्ययम्॥ रविं ढुंढिं दंडपाणिं भैरवं चैव पंचमम्॥ ९७॥ पंचापि तत्र सुप्रीता मुक्तिमंडप मध्य
तः॥ प्रादुर्भूता महात्मानो लोक प्रत्यय कारकाः॥ ९८॥ विष्णुरुवाच॥ अयं शुद्धो दुराचारो मंडपः सा
धु संगतः॥ क्षेत्र प्रदक्षिणं कृत्वा कीर्त्तयित्वा जगद्गुरुम्॥ ९९॥ माहात्म्य श्रवणं जातं क्षेत्रस्या शुभना
शनम्॥ तस्माद्गच्छ त्वमं स्वीयं गृहं पित्र समन्वितः॥ १००॥ ढुंढिरुवाच॥ काशीति नाम जपतां शि
वनाम तुल्यं विघ्नादि पाप निचयो विलयं प्रयाति॥ किंतत्कथा श्रवण कीर्तन वासदानैः सम्य

क् प्रदक्षिणवत्तामशुभस्यनाशः ॥१॥ 901 दंडपाणिरुवाच ॥ काश्यां पापं (ये) प्रकुर्वन्ति पापास्तेषां दुःखं
जायते निश्चयेन ॥ शंभोर्लिंगं सच्चिदानंदरूपं पंचक्रोशं तत्परिक्रम्य शुद्धाः ॥ 902 २॥ कालभैरवउवा
च ॥ कार्यं ममैतत्खलु पापिनां सदा करोमि दंडं बहुधावश्यमेव ॥ प्रदक्षिणीकृत्य समागतस्त्वयं का
शीं विशुद्धेन विचार्यमस्ति तत् ॥ 903 ३॥ शृण्वन्तु सर्वे वक्ष्यामि काशीमाहात्म्यमद्भुतम् ॥ नचात्र
विस्मयः कार्यः काशीं प्रति कदाचन ॥ 904 ४॥ आसीच्चेतायुगे विप्रः शांडिल्यः समदर्शनः ॥ ज्ञानविज्ञानसंपन्नो
33 विनष्टाशेषसंशयः ॥ 905 ५॥ तस्याभवद्विशालाक्षी नाम्ना चैवातिसुन्दरी ॥ पित्रादत्ता सुमंत्रेण विधिनाव
ह्निसन्निधौ ॥ 906 ६॥ अवन्तिवासिने सा हि पितृगेहे स्थिताभवत् ॥ संप्राप्ते यौवनं काले नायातस्तत्पतिः-
पुनः ॥ 907 ७॥ पुंश्चली संगदोषेण जाता सा स्वैरिणी परा ॥ काश्यां चकार बहुधा पापं तारुण्यमास्थिता ॥ 908 ८॥
रात्रिंदिवं तया सर्वे युवानस्तु वशीकृताः ॥ निर्धनाश्च कृताः सर्वे रूपसौभाग्यसंपदा ॥ 909 ९॥ देशान्तरगता

का॰ श्चान्ये तद्गुणाकृष्टचेतनाः॥ एवं सा पाप निरता चक्रे पापमहर्निशम् ॥१०॥ मार्गशीर्षे कदाप्यासीद्यात्राकाशीक्षेत्रे
॥५६॥ का श्या द्विजोत्तमाः॥ पंचक्रोशाश्रिता पुण्या दुरितार्णव तारिणी ॥११॥ यात्रिणोवीक्ष्य सादुष्टा हरिष्यामिधनं र॰
बहु ॥ नृत्यव्याजेन गानेन सर्वेषां काशि वासिनाम् ॥१२॥ इति निश्चित्य सापापा गतातैः काशिवासिभिः॥
दुर्गाकुण्डे स्थिताः सर्वे यात्रिणस्तद्दिने गताः॥१३॥ सापितत्र विशालाक्षी चक्रेवासंशुभोदया ॥ रात्रौ
जागरणं चक्रे धनलोभेन नर्त्तनम् ॥१४॥ ननर्त्त सा विशेषेण जगौ साति मनोहरम् ॥ कृताविमनसः स
र्वैस्तया गानाच्च नर्त्तनात् ॥१५॥ संप्राप्तंच धनं भूरि तया यात्रार्थिनां तथा ॥ एवं द्वितीये दिवसे कर्द
मेश्वर सन्निधौ ॥१६॥ तृतीये देहली क्षेत्रे चक्रे सावर वर्णिनी ॥ रामेश्वरे चतुर्थेतु स्नात्वा सावरुणा
जले ॥१७॥ शुश्राव सावाच्यमानं पुराणं देवसन्निधौ ॥ काशी माहात्म्य संयुक्तं शृण्वतां सर्वयात्रिणाम् ॥१८॥
काशी कृतानां पापानां यातनां भैरवीं पराम् ॥ शृण्वन्त्या भाग्ययोगेन पश्चात्तापो महानभूत् ॥१९॥ गर्हयामास
॥५६॥

चात्मानं मूर्च्छिता पतिता भुवि ॥ कष्टाद्धैर्यं समालंब्य तीव्रवैराग्यमागता ॥२०॥ ददौ तद्वसु विप्रेभ्यो सर्वाण्या

भरणानि च ॥ पुनर्नैवं करिष्यामि ह्येवं संजातनिश्चया ॥२१॥ पप्रच्छ विनयोपेता ब्राह्मणान् सुमहा

यशान् ॥ विशाला क्ष्युवाच ॥ ब्रूत विप्राः सुमन्दाया निष्कृतिर्यदि विद्यते ॥ भाद्रज्याः पापशीलायाः कृपया

दीनवत्सलाः ॥२२॥ विप्रा ऊचुः ॥ धन्यासि त्वं विशालाक्षी पापेभ्यो नास्ति ते भयम् ॥ कृता प्रदक्षिणा का

3 ध्या वैराग्यं च समागतम् ॥२३॥ दत्तं त्वया धनं सर्वं निवृत्ता पापधीस्तथा ॥ कृतार्थासि महाभागे कु

रूक्षेत्रप्रदक्षिणाम् ॥२४॥ अस्माभिरेव सहिता ततः शुद्धिमवाप्स्यसि ॥ पुनः पापपरा माभूरित्यूचुस्ते

तपोधनाः ॥२५॥ सापि श्रुत्वा वचस्तेषां भक्त्या नत्वा ततो द्विजान् ॥ चक्रे राज्ञो प्रणयिनी विष्णोर्नर्तनम

द्भुतम् ॥२६॥ पंचमे दिवसे सर्वे यात्रिणो गरुडध्वजे ॥ स्थिताः सापि महाभागा निवृत्ता सर्वपापतः ॥२७॥

ततः प्राप्ताः क्षणेनैव वरुणा संगमं जनाः ॥ तत्र स्नात्वा विधानेन नत्वा केशवमादरात् ॥२८॥ मुक्तिमंडपिका

का॰ रह॰

॥५७॥

शाप्ता: सापितैः सममेवहि ॥ तत्र पूजां सुमहतीं कृत्वा विश्वेश्वरस्यसा ॥२९॥ स्तुत्वा यथाविधानेन आजगामनि
जालयम् ॥ आहृता साजनैः सर्वैः पित्रा चापि महात्मना ॥३०॥ तथापंयसपि भो विप्राः विशुद्धो मंडपो द्विजाः॥
इति श्रुत्वा वचस्तस्य भैरवस्य महात्मनः॥३१॥ सर्वे विगत सन्देहा बभूवुर्ये सभासदः॥ रविरुवाच ॥सत्सं
गतः क्षेत्र प्रदक्षिणं कृतं काशी कथा श्रवण कीर्तनादि ॥ शुभप्रदं पापहरं सुखासदं कृतं शुद्धो मंडपः
सत्यमेव ॥३२॥ श्रीमहादेव उवाच ॥ सभासदैर्देव वरै रुक्तौ कुष्मांड मंडपौ ॥ प्रदक्षिणी कृत्य नुतान्
नमस्कृत्य पुनः पुनः॥३३॥ निष्पापो हर्षसंपन्नौ ययतुस्तौ स्वमालयम् ॥ प्रदक्षिण फलं ब्रह्मन् पंचक्रो
शात्मकस्य च ॥३४॥ लिंगस्य दक्षिणा कार्या त्वया शिष्येण न्याय्य हृत् ॥ इति श्रुत्वा प्रसन्नात्मा जैगीष
व्यो महामुनिः॥३५॥ देवं प्रदक्षिणी कृत्य नमस्कृत्य पुनः पुनः ॥ जगाम पंचक्रोशस्य यात्रार्थं शिष्यसं
युतः॥३६॥ पंचभिर्दिवसैः कृत्वा यात्रामत्रागतो मुनिः ॥ उपदिष्टो विधिः सम्यक् यात्रायाः पापना॥

॥५७॥

नः ॥३७॥ महापुण्य कृदेवापि निर्विघ्न फलदायकः॥ मुनिरागत्य विश्वेशं भवान्या सहितं तदा ॥३८॥
पूजयामास विधिवदुपचारैः सुविस्तरैः॥ शिष्योगुरु प्रसादेन निःपापो पुण्यवान् सुधीः॥३९॥ जातः
स्कन्द प्रसादेन श्रुत्वा माहात्म्य मुत्तमम्॥ श्री महादेव उवाच॥ एतत्तेभिहितं देवी काश्यां यत्पातकं कृ
तम्॥ तस्य प्रनाशनं शुद्धं प्रायश्चित्तं सु दुर्लभम्॥४०॥ श्रुत्वाऽध्यायमिमं पुण्यं सर्वपाप प्रणाशनम्॥
3 नरः शुद्धि मवाप्नोति काशीवासंच गर्भहम्॥४१॥ इति श्री ब्रह्म वैवर्ते तती[illegible] ग विभागे नवमोऽध्यायः
॥९॥ ऋषय ऊचुः॥ सूत सूत महाबुद्धे वद विद्या विशारद॥ यथा प्रदक्षिणा कार्या मनुजैं विधि पूर्व 10
कम्॥१॥ स्थानं वासस्य वदनो भक्ष्यं वा भक्ष्यमेव च॥ पूजां सीम्नि स्थितानांच देवानां दानमेव च॥२
॥ यथा संपूर्णतामेति यात्रा क्षेत्रस्य सत्तम॥ सूतउवाच॥ एवमेव पुरा पृष्टो भगवान् शिवया शिवः
॥ तद्ब्रवीमि मुनि श्रेष्ठाः शृण्वन्तु विधिमुत्तमम्॥३॥ देव्युवाच॥ भगवन्देव देवेश प्रदक्षिणा विधिं

का॰ वद ॥ पंच क्रोशस्य येनाशु निःपापः पुण्यवान् भवेत् ॥४॥ शिव उवाच ॥ आश्विनादिषु मासेषु त्रिषु पा
र्वति सर्वदा ॥ प्रदक्षिणा प्रकर्तव्या क्षेत्रस्या पाप कांक्षिभिः ॥ ५ ॥ माघादि चतुरो मासाः प्रोक्ता यात्रावि र॰ १०
॥५८॥ धौन्नृणाम् ॥ पूर्वस्मिन्दिवसे ढुंढिं पूजयित्वा हविष्य भुक् ॥६॥ प्रातरुत्तर वाहिन्यां स्नात्वा विश्वेशम
र्चयेत् ॥ पुनर्यात्रार्थ मपि च शिवयोः पूजनं भवेत् ॥७॥ मुक्ति मंडपिका यां च संविश्य वरवर्णिनी ॥
प्रतिज्ञां महतीं कृत्वा पूजनं तत्र तत्र ह ॥८॥ काश्यां प्रजातथा काय मनो जनित मुक्तये ॥ ज्ञाताज्ञा
त विमुक्त्यर्थं पातकेभ्यो हितायच ॥९॥ पंचक्रोशात्मकं लिंगं ज्योति रूपं सनातनम् ॥ भवानी शंकरा
भ्यां च लक्ष्मी श्रीशाविराजितम् ॥१०॥ ढुंढि राजादि गणपैः षट् पंचाशद्भिरावृतम् ॥ द्वादशादित्य
सहितं नृसिंहैः केशवै र्युतम् ॥ ११ ॥ रामकृष्णाश्रय युतं कूर्म मत्स्यादि भिस्तथा ॥ अवतारै रनेकैश्च
युतं विष्णोः शिवस्य च ॥ १२ ॥ गौर्यादि शक्ति भिर्युक्तं क्षेत्रं कुर्यात्प्रदक्षिणम् ॥ बद्धांजलिः प्रार्थ

॥५८॥

पीत महादेवं महेश्वरीं ॥ १३॥ पंचक्रोशस्य यात्रां वै करिष्ये विधि पूर्वकम् ॥ प्रीत्यर्थं तव देवेश सर्वो
घौघ प्रशान्तये ॥ १४॥ इति संकल्प्य मौनेन प्रणिपत्य पुनः पुनः ॥ ढुंढि राज गणेशान महा विघ्नौघनाश
न ॥ १५॥ पंचक्रोशस्य यात्रार्थं देसा ज्ञां कृपया विभो ॥ विश्वेशं त्रिः परिक्रम्य दंडवत्प्रणिपत्य च ॥ १६॥ मो
५८ दं प्रमोदं सुमुखं दुर्मुखं गणनायकम् ॥ प्रणम्य पूजयित्वादौ दंड पाणिं ततोऽर्चयेत् ॥ १७॥ कालराजंच परतो
विश्वेशस्य जगद्गुरोः ॥ पूजयित्वा ततो गन्धेन मणि कर्णी विधानतः ॥ १८॥ तत्र स्नात्वा, महादेवं मणिकर्णीश
मर्चयेत् ॥ विनायकं सिद्धिदं च पुनरागत्य पूजयेत् ॥ १९॥ मणिकर्णी तटे स्कन्दं गंगा केशव मप्युत ॥ ल
लितां च ततः पूज्य जरासंधेश्वरं विभुम् ॥ २०॥ सोमनाथं ततः पूज्य वालभ्येश्वर मेव च ॥ शूलटंकेश्वरं
देवं आदि वाराह मेव च ॥ २१॥ दशाश्वमेधकं लिंगं वन्दि तत्रैव पूजयेत् ॥ सर्वेश्वरश्च केदारं ततो
हनुमदीश्वरम् ॥ २२॥ संगमेशं ततः पूज्य लोलार्कं पूजयेत्ततः ॥ अर्क संज्ञं गणाध्यक्षं असे स्तीरं पुनर्वृ

का॰ जेत॥ २३॥ क्षेत्रं प्रदक्षिणीकुर्वन्तिल मात्रं न संत्यजेत्॥ दुर्गाकुंडे ततः स्नात्वा यजेद्दुर्गविनायकम्॥ २४॥ २६
॥५९॥ दुर्गां संपूज्य विधिवद्वसेत्तत्र सुखासये॥ ब्राह्मणान् भोजयेत्तत्र मधुपायसलड्डुकैः॥ २५॥ रात्रौ जागरणं १०
तत्र पुराण श्रवणादिभिः॥ कुर्याच्च कीर्तनं भक्त्या परोपकरणानि च॥ २६॥ जयदुर्गे महादेवी जयका
शिनिवासिनी॥ क्षेत्र विघ्नहरे देवी पुनर्दर्श नमस्तुते॥ २७॥ इति दुर्गां प्रार्थयित्वा विष्वक्सेनेश्वरं त
तः॥ पूजयित्वा कर्दमेशं पंचव्रीहि तिलैर्नमेत्॥ २८॥ आदौ कर्दमतीर्थेतु स्नानं कूपावलोकनम्॥ सोम
नाथं विरूपाक्षं नीलकंठं ततोऽर्चयेत्॥ २९॥ तत्र वासं विधायाग्नौ किंचिद्धोमं द्विजार्चनम्॥ श्राद्धादि
कर्मकार्याणि कृत्वा मुच्येत्(दृ)ऋणत्रयात्॥ ३०॥ कर्दमेश महादेव काशिवासजनप्रिय॥ त्वत्पूजनान्महा
देव पुनर्दर्श नमस्तुते॥ ३१॥ प्रातः स्नात्वा कर्दमेशं पूजयित्वा च सद्विजान्॥ नागनाथं च चामुंडां मो
क्षेशं करुणेश्वरम्॥ ३२॥ वीरभद्रं ततो दुर्गां विकटाख्यां प्रपूजयेत्॥ उन्मत्तभैरवं नीलं कालकूटं ॥५९॥

ततोऽर्चयेत् ॥ ३३॥ दुर्गां च विमलां नत्वा महादेवं ततो व्रजेत् ॥ नन्दिकेशं भृंगि रिटिं तत्रैवन्च गण
प्रियम् ॥३४॥ विरूपाक्षं च यक्षेशं विमलेश्वर मेवन्च ॥ मोक्षदं ज्ञानदं चैवामृतेशं तत्र पूजयेत् ॥३५॥
गन्धर्व सागरं तीर्त्वा भीमचंडीं ततो व्रजेत् ॥ तत्र स्नात्वा भीमचंडीं पयसा स्नापयेत्सुधीः ॥३६॥ पंचो
पचारैः संपूज्य ब्राह्मणान् परितोषयेत् ॥ तत्र वासं प्रयत्नेन कुर्याच्चंड विनायकम् ॥३७॥ रविरक्ताक्ष
गन्धर्वं नरकार्णव तारकम् ॥ शिवं पूज्य प्रयत्नेन रात्रौ पूर्वद्वारा चरेत् ॥ प्रातरुत्थाय सुस्नातः प्रार्थयेत्भीम
चंडिकाम् ॥ भीमचंडी प्रचंडानि मम विघ्नानि नाशय ॥३८॥ नमस्तेऽस्तु गमिष्यामि पुनर्दर्शं नमस्तुते ॥
ततोऽर्चयेदेकपादं गणं नत्वा सतंडुलान् ॥ ४०॥ तिलांश्च विकिरेत्तत्र धनधान्यादि संपदे ॥ ततो
गच्छेन्महाभीमं भैरवं भैरवीं शुभाम् ॥ ४१॥ भूतनाथं च सोमेशं पूजयेत्सिन्धुरोधसि ॥ कालनाथं क
पर्दीशं कामेशं च गणेश्वरम् ॥ ४२॥ वीरभद्रं चारुमुखं गणनाथं च पूजयेत् ॥ ततो गच्छेद्देहलीशं

का॰ विघ्न पूरा निवारणम् ॥४३॥ मोदकैः पृथुकै र्लाजैः सक्तुभि श्चेक्षु पर्वभिः ॥ पूजयेच्छ्रद्धया देवं तं देहली
विनायकम् ॥४४॥ तत्पार्श्वे षोडश पुन र्विघ्ननाथान्समर्चयेत् ॥ उद्दंड गणपं पूज्य कुल्कलेश्वर मेवच्च ॥४५॥ ८८
॥६०॥ रुद्राण्यास्तु तपो भूमिं दृष्ट्वा रामेश्वरं व्रजेत् ॥ रामेश्वरं श्वेततिलै र्बिल्व पत्रादिभि र्यजेत् ॥४६॥ सोमनाथंच
तत्रैव पूजयेदिन्द्र दिग्गलम् ॥ भरतेशं लक्ष्मणेशं शत्रुघ्नेश्वर मेवच्च ॥४७॥ द्यावाभूमीश्वरं तत्र पूजयेन्नहु
षेश्वरम् ॥ तत्र वासं प्रकल्प्याथ पूर्ववज्जागरादिकम् ॥४८॥ कृत्वास्नात्वा पि रामेशं प्रार्थयेत् काशि
वासदम् ॥ श्रीरामेश्वर रामेण पूजितस्त्वं सनातन ॥ ४९॥ आज्ञां देहि महादेव पुनर्दर्श नमस्तुते ॥ लिं
गानि सुवहून्यादौ वरणा पारगान्यथ ॥५०॥ पूजयित्वा ततो गच्छेद्देव संघ निषेवितम् ॥ देवसंघेश्वरे
किंचिद्दत्वा स्थित्वा ततो व्रजेत् ॥ ५१॥ पाशपाणि गणेशंच क्षेत्र मध्ये व्यवस्थितम् ॥ पूजयित्वाव
हिश्चैव पृथ्वीश्वर मथोपजेत् ॥५२॥ एकोऽश्वमेधः पृथु नाकृतः क्षेत्राद्वहिः परः ॥ स्वर्गभूमिस्तु सात्र ॥६०॥

१ रुद्राण्यास्तु - (क) "रुद्राण्येयमि तपोभूमि"

या मोक्षभूमिस्तु मध्यतः ॥ ५३॥ काश्याश्चतुर्दिशो (देवि) योजनं स्वर्गभूमिका ॥ मृतास्तत्र हि गच्छन्ति स्वर्गं १०
सुकृतिनां पदम् ॥५४॥ ततः सुपुष्पं हि सरः स्पृष्ट्वा गच्छेच्छनैः शनैः ॥ महत्क्षेत्रं कापिलन्तु यत्रास्ते वृषभ
३४ ध्वजः ॥ ५५॥ निवसेत्तत्र दिवसं श्रवणादि प्रकल्पयेत् ॥ प्रदक्षिणीकृत्य ततो गच्छेज्ज्वालानृसिंहक
म् ॥ ५६॥ एकं (वं) प्रदक्षिणीकृत्य सरः कापिलमुत्तमम् ॥ [1]वरुणायां ततः स्नात्वा गंगा(याः) संगमे सु च ॥ ५७॥ आ
दिकेशव मभ्यर्च्य संगमेश्वर मेव च ॥ विनायकं खर्व संज्ञं पूजयित्वा ततो व्रजेत् ॥५८॥ क्रीडीकृत्यय
वाऽऽस्कन्दान् विकिरन् विष्णुमुच्चरन् ॥ प्रह्लादेश्वर मभ्यर्च्य त्रिलोचन मतः परम् ॥५९॥ विन्दुमाधव
मभ्यर्च्य ह्रदे पांचनदे शुभे ॥ गभस्तीशं मंगलां च गौरीं दृष्ट्वा ततो व्रजेत् ॥६०॥ वसिष्ठवामदेवौ च
पर्वतेश्वर मेव च ॥ महेश्वरं समभ्यर्च्य ततः सिद्धि विनायकम् ॥६१॥ सप्तावरण गान् दिव्यान् पूजयेद्गण
नायकान् ॥ मणिकर्ण्यां ततः स्नात्वा गच्छेद्विश्वेश्वरं यमी ॥६२॥ नमस्कृत्य महेशाय प्रविशेद्देव सन्निधौ ॥

१ पाठान्तरः—"वरणां च ततस्तीर्त्वा स्नात्वा वै संगमे शुभे"

पंचोपचारैः संपूज्य स्तुत्वा नत्वा पुनः पुनः ॥६३॥ मुक्ति मंडप मागत्य कृतार्थं सूत्र संविशेत् ॥ विष्णुंच दंड पाणिंच ढुंढिं
का· भैरव मेव च ॥६४॥ आदित्यं पंच गणपान् पूजयेत्पुनरेव च ॥ प्रदक्षिणी कृतान्देवान् स्मरेत्तत्र क्रमात्सुधीः ॥६५॥
जयविश्वेश विश्वात्मन् काशीनाथ जगद्गुरो ॥ त्वत्प्रसादान्महादेव कृता क्षेत्र प्रदक्षिणा ॥६६॥ अनेकजन्म पापा
॥६१॥ नि कृतानि मम शंकर ॥ गतानि पंचक्रोशात्म लिंग सम्यक् प्रदक्षिणात् ॥६७॥ त्वद्भक्तिःकाशीवासं च रहितं
पाप कर्मणा ॥ सत्संग श्रवणाद्यैश्च कालो गच्छतु नः सदा ॥६८॥ हर शंभो महादेव सर्वज्ञ सुखदायक ॥ प्रा
यश्चित्तं सुनिर्वृत्तं पापानां त्वत्प्रसादतः ॥६९॥ पुनः पापमतिर्मास्तु धर्मबुद्धिः सदास्तु मे ॥ इति जप्त्वा यथा
शक्त्या दत्वा दानं द्विजन्मनाम् ॥७०॥ बध्वा करयुगं मंत्री मंत्र मेतदुदीरयेत् ॥ पंचक्रोशस्य यात्रेयं यथाश
क्त्या मया कृता ॥७१॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादादुमापते ॥ इति प्रार्थ्य महादेवं गच्छेद्गेहं स्वकं स्वकम् ॥
॥७२॥ न्यूनातिरिक्त दोषाणां परिहाराय दक्षिणाम् ॥ संकल्प्यागत्य च गृहं ब्राह्मणान् भोजयेत्ततः ॥७३॥ तत ॥६१॥

आगत्य च गृहं कुटुंबैः सहभोजनम् ॥ कृत्वात्मानं ततोध्याये त्कृत्य कृत्यो भवेत्ततः ॥७४॥ एकरात्रं तु मध्ये यः प्र
वसेच्छुचि मानसः ॥ वरुणायास्तटे रम्ये सयाति परमां गतिम् ॥७५॥ द्विरात्र मध्ये वसतिं यः कुर्याद्धर्मतत्परः ॥
प्रथमं चंडिका क्षेत्रे द्वितीयं वरुणातटे ॥७६॥ दिवसन्तु वसेद्धीमान् ततो विश्वेश्वरं व्रजेत् ॥ यस्तु त्रिरात्र मुषि
तो मध्ये भवति पार्वति ॥७७॥ दुर्गालये भीमचण्डयां रामेशे वासमच्छति ॥ वसतिं यस्तु कुरुते मध्ये दिन चतुष्टय
37 म् ॥७८॥ प्रथमां वसतिं कुर्यात्कर्दमेश्वर सन्निधौ ॥ द्वितीयां भीमचंडयां तु रामेशे तु तृतीयकाम् ॥७९॥ चतुर्थीं
कापिले तीर्थे वसतिं परिकल्पयेत् ॥ राजपुत्र कुमाराणां यथेष्टं वास इष्यते ॥८०॥ यथा कथंचिद्देवेशि पंचक्रोश प्र-
दक्षिणा ॥ कुर्यादेव न मासादि चिंतये द्धर्मकोविदः ॥८१॥ स एव शुभदः कालो यस्मिंच्छ्रद्धा दयो भवेत् ॥ श्रद्धाहि
दुर्लभा लोके कलौ खलु विशेषतः ॥८२॥ श्रद्धैव तीर्थं देवश्च श्रद्धा स्वर्गापवर्गकौ ॥ श्रद्धया यत्कृतं सर्व मनन्त
फलदं भवेत् ॥८३॥ सत्ये श्रद्धा गुणवती नासत्ये सा फलप्रदा ॥ काश्यां तिष्ठति यो नित्यं स्नाति भागीरथी जले ॥

का. ॥८४॥ कुर्यात्सांवत्सरीं यात्रां पंचक्रोशस्य सुन्दरि ॥ सब्रह्म भूतो निवसेत् ममाग्रतः सुखी ॥८५॥ इति ब्रह्मवैवर्त्ते पं ॥ ६६ ॥
च क्रोश यात्रायां दशमोऽध्यायः ॥१०॥ देव्युवाच ॥ क्षेत्र प्रदक्षिणे देव नियमाः के भवन्ति तान् ॥१॥ वदस्व तारिता शेष
॥६२॥ विश्वनाथ कृपालय ॥ महादेव उवाच ॥प्रतिग्रहं परान्नंच परदाराभिभाषणम् ॥ परस्व ग्रहणं स्नेहाद सद्वार्तां च वर्जये
त् ॥ २॥ असतां पापिनां संगं नकुर्यात्प्रयतो नरः ॥ असत्समागमात्सर्वं निष्फलं जायते नृणाम् ॥३॥ ममद्रोहः परैः शाकं नब्र
जे, विष्णु निन्दकैः ॥ परापवादं नोकुर्यात परद्रोहं विवर्जयेत ॥४॥ गुरुनिन्दां शास्त्र निन्दां शिवधर्म महात्मनाम् ॥ तीर्थं
लिंगं तयो निन्दां नकुर्यात् न प्रदक्षिणे ॥५॥ अन्यदा तु कृतं पापं नश्येत् क्षेत्र प्रदक्षिणात्॥ क्षेत्र प्रदक्षिणा मध्ये कृतं-
केन प्रणश्यते ॥ ६॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चैवान्त्यजातिभिः ॥ कांक्षिभिः परमं तत्वं कर्तव्या क्षेत्र प्रदक्षिणा ॥७॥
किंचिद्दानं प्रत्यहं ब्राह्मणे भ्योदेयं दीनानाथ पंगवंधकेषु ॥भूमौ शय्या, तैल मांसादि दुग्धं सर्वं वर्ज्यं क्षेत्रादि तीर्थकेषु॥[1]
॥८॥ माषान्नंच मसूरांश्च चणकान् कोद्रवांस्तथा॥ तांबूलं मैथुनं चैव भोगानन्यांश्च वर्जयेत ॥ ९॥ स्नानद्वयं ॥ ६२॥

1 (क) " क्षेत्रादितीर्थादिकेषु"="क्षेत्र यात्रा विशेष" इति पाठान्तरम्.

प्रश्री कुर्वीत नित्यश्राद्धंच सुन्दरि ॥ यदत्र किंचित्क्रियते कोटि कोटि गुणं भवेत् ॥१०॥ ब्रह्मचारी गृहस्थो वानप्रस्थोऽप्य
मस्करी ॥ क्षेत्रेवसन् बहिर्वाऽपि कुर्यादेव प्रदक्षिणम् ॥११॥ ब्रह्महत्यादि पापानां प्रायश्चितं न चापरम् ॥ बहिःकृतानां पा
पानां मध्येयापि सुरेश्वरि ॥१२॥ प्रायश्चितान्तरं पुंसो न दृष्टं न मया श्रुतम् ॥ संति देवाश्च बहवः स्वर्गभूमौ बहिस्तथा सदा
70 ॥१३॥ मदाज्ञां नलभन्त्येव वासार्थं दैन्य मागताः ॥ बहिः स्थिताः प्रकुर्वन्ति दक्षिणं क्षेत्र लब्धये ॥१४॥ ममानुज्ञहेतवा
मेधश्च पंचक्रोशात्मकं प्रिये ॥ लिंगं प्रदक्षिणीकृत्य द्रष्टव्योऽहं कृपानिधिः ॥१५॥ अस्मिन् क्षेत्रे महादेवि पुण्यं
पुण्येतरं तु वा ॥ अनन्त कोटि गुणितं भवेत्सर्वं न संशयः ॥१६॥ अन्तर्गेहे कृतं पापं केवलं यातनावहम् ॥ अन्य
क्षेत्रे कृतं पापं पुण्य क्षेत्रे विनश्यति ॥१७॥ पुण्य क्षेत्रे कृतं पापं वज्रलेपो भविष्यति ॥ वज्रलेप च्छिदं क्षेत्र
पंचक्रोश प्रदक्षिणम् ॥१८॥ तस्मात्सर्व प्रयत्नेन कुर्यात्क्षेत्र प्रदक्षिणाम् ॥ वाराणसीं तु संप्राप्य प्रमादाद्योब
हिर्गतः ॥१९॥ दैवात्स पुनरागत्य दक्षिणेन प्रधावति ॥ अविमुक्तं महाक्षेत्रं सर्वदा जननी यथा ॥२०॥ पुत्रस्य

जननी लोके सर्वथा हितकारिणी ॥ हितकृत सर्वजन्तूनां काशीहामुत्र सर्वदा ॥२१॥ श्रीदेव्युवाच ॥ भगवन् सर्वभूतेषु कृ
पा पूरित विग्रह ॥ कृतापीनां वद विभो क्षेत्र संन्यासिनामपि ॥२२॥ प्रदक्षिण क्रमं क्षेत्रा द्बहिर्वा मध्यतोपि वा ॥ नियमस्य
न भंगःस्याद्य था पापं च नश्यति ॥२३॥ देहिनां पापसंबन्धः सर्वथा जायते क्रमात् ॥ तत्काशि वासजं नश्येत् क्षेत्र सं
न्यासिनां यथा ॥२४॥ पंचक्रोशस्य यात्रा यां शक्ति र्येषां न विद्यते ॥ तेषां पापं कथं नश्येत् क्षेत्र पाप कृतां सताम् ॥
॥२५॥ श्री भगवान् उवाच ॥ सम्यक् पृष्टं त्वया देवि महाहंकार नाशनम् ॥ प्रायश्चित्तं न्यासिनां हि क्षेत्राद्योप्य वि
नाशनम् ॥२६॥ विधिस्तु पूर्वमेवोक्तो नियमादि युतस्तव ॥ प्रदक्षिण क्रमस्तेषा मव धारय सुव्रते ॥२७॥ स्नात्वादे
वं समभ्यर्च्य विश्वेशं गिरिजया सह ॥ मोदादि पंचकं ढुंढिं दंडपाणिं च भैरवम् ॥२८॥ पूर्ववत्तीरगान्पूज्य दुर्गां पू
ज्य च यत्नतः ॥ बहिरावरणं त्यक्त्वा (कृत्वा) गणेशानां तु सप्तकम् ॥२९॥ मध्ये प्रदक्षिणं कुर्यादसीवरणयोः कृती ॥ संमुखीभू
य विधिवत् पूज्य ये चाग्रतः स्थिताः ॥३०॥ देवा देव्यश्च फलदाः क्षेत्रपालाः प्रयत्नतः ॥ एकरात्रं द्विरात्रं वा वसेन्मध्ये ॥६३॥

त्रिरात्रकम् ॥ यत्र श्रद्धा सुमहती वसेत्तत्र न संशयः ॥ प्रत्यहं दंड पाणेस्तु पूजा कार्या प्रयत्नतः ॥३२॥ दंड पाणेः पूजनेन
सिद्धा भवति नान्यथा ॥ दंड पाणे यक्षपते क्षेत्र संन्यासि वल्लभ ॥ ३३॥ पंच क्रोशस्य यात्रेयं सिद्धा मे त्वत्प्रसादतः॥
आगत्य विश्वनाथस्य पूजा कार्या च पूर्ववत् ॥ ३४॥ देव्युवाच ॥ प्रत्यहं दंड पाणेस्तु पूजा प्रोक्ता विशेषतः ॥ किमेतद्व
१/ द देवेश यात्रामुद्दिश्य यत्नतः [शंकर] ॥ ३५॥ भगवानुवाच ॥ काशीं प्राप्य बहिर्नैव गच्छेत्सर्वात्मना क्वचित् ॥ मन्मुखात्सम्यगा
श्रुत्य क्षेत्र संन्यास कृत्तमः ॥ ३६॥ दंड पाणिः सम भव त्तदारभ्य वरानने ॥ कालान्तरे तदा देवि ऋषिभिर्नारदादिभिः
॥३७॥ पृष्टोऽहं क्षेत्र जनित पाप नाशन मद्भुतम् ॥ तदा सुदुर्लभं देवि प्रायश्चित्तं मया महत् ॥ ३८॥ उपदिष्टं महालिं
ग प्रदक्षिणमशेषतः ॥ तच्छ्रुत्वा पृष्टवान् दंड पाणिः क्षेत्र परायणः ॥ ३९॥ तदा मयोपदिष्टोऽसौ महापशुपतेः कृ
ती ॥ क्षेत्र यात्रा द्वितीया मे मयोक्ता दंड पाणये ॥४०॥ अतो दंड पतेः पूजा कर्तव्या पूर्तिकारिणी ॥ पंच क्रोशात्म
कस्यैव लिंगस्य परमात्मनः ॥४१॥ प्रदक्षिण त्रयं कृत्वा जीवन्मुक्तो भवेन्नरः ॥ देव्युवाच ॥ श्रुत्वापि श्रद्धया देव

का०
।६४।।

न कुर्वन्ति प्रदक्षिणम् ।। तत्केनहेतुना मर्त्या उपेक्षन्ते महाफलम् ।।४२।। भगवानुवाच ।। श्रद्धा पुण्यवतां देवि नृणां
उत्यादिभिः सदा ।। तस्माद्धर्मे प्रयत्नेन सिद्ध्येत् सर्वं नचान्यतः ।।४३।। यत्र यत्र परिरज्यन्ते जनास्तत्र तत्र सुखमेधते ८८
पुनः ।। साधनानि विदध्याति तत्परो येन तत्फलमवाप्नुयान्नरः ।।४४।। लौकिके परमवैदिके यथवा पामरः परमतत्व
वित्तथा ।। मोदकः परममोदको यथा दीयते कपटभार्यया तथा ।। ४५।। मोहितो नहि विचारयत्ययं जीवनं मरणम
प्यहो ऽवशी ।। एकमेकं कालकूटमिन्द्रिय नाशकृत्पुनः ।। ४६।। तदेव शोधितं यद्वद्विषमप्यमृतं भवेत् ।।जगत्तृ
णीकृत्य सकाल मर्त्यं स्वात्मानमायोज्य शिवेन योगैः ।।४७।। अविघ्नमेव समलं विसृज्य शरीरसंज्ञं मलखंड
भाण्डं ।। मुक्तो भवेद्देषु नचान्यथैव मर्त्यः प्रसादादपि ते विरक्तः ।।४८।। कः कर्तुमेवं प्रभवत्यविघ्नं कलौ मनुष्यो
बहुदोषयुक्तः ।। अथापि मुक्तो भविता यदि त्वां भक्त्याजस्रं भीक्ष्णं सकलैश्च भावैः ।।४९।। पूर्वोदिता दुर्व्यतिदर्श
कोयं विमोहनार्थैरखिलैश्च शास्त्रैः ।। विभासिते दुर्विषहे कदाचि श्योधानुरागो भविता नरस्य ।।५०।। सचेत्भवि

।।६४।।

तत्परमात्मनी शो कोनाम मुक्तो नभवेद् भवाब्धेः ॥ अविमुक्तं मम क्षेत्रमविमुक्तं सदा शिवम् ॥ ५१॥ अविमुक्तजनंशान्तं
सेवन्ते ये धृतव्रताः ॥ विमुक्ताः परमानन्दे पदे स्थितिमुपागताः ॥ ५२॥ अनेकजन्मसु महत्साधनैर्ज्ञानमुत्तमम् ॥ प्राप्नुव
न्तितदेकेन जन्मना साधुवासिनः ॥ ५३॥ अष्टांगादिभिर्न्यैश्च तपोयज्ञादिभिः सदा ॥ साधितैः पाक्षिकी सिद्धिर
82 विमुक्ते निरर्गला ॥ ५४॥ अविमुक्तात्परोयोगो ज्ञानं दानं जपस्तपः ॥ क्षेत्रन्यासं दृढं कृत्वा वसेद्धर्म परः सदा ॥ ५५
॥ क्षेत्रन्यास पराणां त्वमहमप्यनुकामजैः ॥ भोगैः सहायतां यातौ दिशावः परमां गतिम् ॥ यथापतिव्रताभा-
र्या भर्तारमनुगच्छति ॥ तथा सा हस मालंब्य काशी मनुगतो भवेत् ॥ ५७॥ गुरुद्रोह रतोयस्तु विप्रद्रोहपर
[illegible] स्तथा नतस्य काशी सिध्येत बहुभिः साधनैर्गुणैः ॥ ५८॥ क्षेत्रसंन्यासिनामेवं क्रमः प्रोक्तो मयानघे ॥
प्रदक्षिणायास्तु महान् महापाप हरः शुभः ॥ ५९॥ इति श्री ब्रह्मवैवर्ते तृतीयविभागे एकादशोऽध्यायः ॥ ११ ॥
देव्युवाच ॥ देव देव महादेव संदेहो नाशित स्त्वया ॥ किंचित्प्रष्टव्यमस्तीह प्रायश्चित्त मभीप्सवः ॥ १॥ कथं 92

का॰ तेषां भवेच्छुद्धि र्धनिनां काशिवासिनाम् ॥ सुकुमार शरीराणां राज्ञां स्त्री समवायिनाम् ॥ २॥ वद तेषां यथा शुद्धि
पश्चिना विनि कृन्तनी ॥ महादेव उवाच ॥ शृणु देवि रहस्यं मे धर्मः सूक्ष्मो भवेत्सदा ॥ ३॥ नजानन्ति स्थूल विषया ८८
८५॥ सक्तमानसाः ॥ स्वल्प द्रव्येण च महान्महता प्यणु मात्रकः ॥ ४॥ देशं कालं तथा पात्रं वित्तं श्रद्धादिकं महान् ॥ क
रोति सुविचार्यार्थ्यु येन काशी प्रसीदति ॥ ५॥ मम क्षेत्रेतु धनिनः पापिष्ठाः शुद्धि कांक्षिणः ॥ शिवालय स्तैः
कर्तव्यो महापातक नाशनः ॥ ६॥ महापुण्य प्रदश्चैव महासुख करस्तथा ॥ यत्रतिष्ठति निर्विघ्नं शिवलिंगं
वरानने ॥ ७॥ तत्र देवालयः कार्यः पूजा भवति यत्रच ॥ शिव लिंग स्थापकानां शिव प्रासाद कारिणाम् ॥ यांति
नाशं विनां कुशैः पातकानि महान्त्यपि ॥ शिव लिंग प्रतिष्ठां यः कुर्यात्पाप शतान्वितः ॥ ९॥ पातकानि विनश्यन्ति
तस्य मोक्षोप्य दूरतः ॥ काश्यां कृतानां पापानामेकं पाप प्रमोचनम् ॥ १०॥ विष्णु मूर्त्ति प्रतिष्ठा दे कार्या मोक्षप्र
दायिनी ॥ ब्राह्मणश्च तथा स्थाप्यो ग्रहोपस्कर दानतः ॥ ११॥ कुटुंबी विष्णु भक्तश्च अग्नि सेवा परायणः ॥

अन्यत्रापि कृतं पापं नश्यत्येव न संशयः॥ अन्यान्यपि च पापानि नश्यन्ति नहि संशयः॥ कृ २पं

कलौ देवालयस्यापि रक्षा देवि सुदुर्लभा ॥१२॥ लिंगरक्षा तथा शंभो नित्यपूजापि नो भवेत्॥ देव्युवाच ॥ क्षेत्रपा
पकृतं पापं नश्यत्येव न संशयः॥ प्रासाद करणाल्लिंग स्थापनात्पूजनात्प्रभो ॥१३॥ पापनाशः कियानत्र निर्वा
णमपि जायते॥ १४॥ परं स विघ्ननात त्वयोक्ता विघ्ननाशन॥ ततोऽपि किंचित्सुमहदस्ति चेद्वद शंकर ॥१५॥
43 महादेव उवाच ॥ शृणु देवि रहस्यं मे कृपणेषु न तद्वदेत् ॥ अश्रद्धा दूषित मतौ पापभीरौ न नास्तिके ॥१६॥ श्रद्धालवे वे
दाभ्यासे पापत्रस्ताय साधवे ॥ ब्रूयाद्रहस्यं परमं यथा धर्मः सुसिद्ध्यति ॥१७॥ वाराणस्यां गृहं कृत्वा ब्राह्मणाय
प्रयच्छति ॥ श्रद्धा वेदविदुषे शिवविष्णुप्रियायच ॥१८॥ विवेकिने महाविद्या युक्ताय प्रियवादिने॥ दातव्यमेव
सुगृहं कारयित्वा विशेषतः ॥१९॥ काश्यां कृतानां पापानां कायवाङ्मनसा खलु॥ नाशः परोऽयं संदिष्टः शुभकृत्य
दि लभ्यते॥ २०॥ गृहदानाद्भवेन्मुक्तो वंशवृद्धिस्तथाऽक्षया ॥ अर्थकामादिकं सर्वं प्राप्नोति गृहदानतः॥ २१
घयी कृत्य धनं किंचिदत्र क्रीत्वा भुवं शुभम्॥ गृहमुत्पाप्य यो दद्यात् स याति परमं पदम्॥ २२॥ मां विनाकः

का॰ प्रयच्छेत्न काश्यां भूमिं द्विजायहि ॥ तस्मान्महंशं सः प्रोक्तो गृहदानान शंसयः॥ २३॥उपपातकसस्राणि महापाप र॰
॥६६॥ शतानि च॥ विलयं यांति सर्वाणि क्षेत्र मध्ये कृतान्यपि ॥ २४॥ दानं तस्मादिदं श्रुत्वा मनसि सवध्धार्येच्च॥ द्वि १२
जायार्त्ताय संदद्याद्विकी यात्मानमप्यहो ॥ २५॥ अभ्रते वर्णयिष्यामि कथां परम दुर्लभाम्॥ त्रिलोचन समीपेतु क्ष
त्रियः सूर्य वंशजः ॥२६॥ महातेजेति विख्यातो व्यापार निरतः सदा॥ हिरण्यं वहुलं तस्य जातं कार्पाण्य नीरथैः॥
क्रयविक्रयदोषेण कार्पण्यं वृद्धि मा ययौ ॥ यथा कथंञ्चिद्दंभेन पापेन धन तत्परः॥ २८॥ तस्य भार्या मृतादै
वात् गृहदासीरतो भवत् ॥ स्वाधीनं साधनं कृत्वा ब्रासणेभ्यः प्रयच्छति॥ २९॥ कुटुम्बेन परित्यक्तस्तथा सद्भि
द्धिरपि प्रभुः॥ वणिक् वत्सुपजीवीस साध्व साधु विगर्हितः॥ ३०॥ अन्यान्यपिच्च पापानि मध्ये मध्ये करोति च॥
एकदा वल्लभा तस्य दासी धर्मकथा परा ॥३१॥ जाता धर्मव्यसनिनी उन्मादि परिवर्जिता ॥ पतिं विज्ञापयामास धर्मा
र्थी यत्नवान्भव ॥ ३२॥ न शृणोति स पापात्मा धनव्यय भियासकृत् ॥ प्रार्थितो पितया दास्या सुधर्म जतया तथा॥ ॥६६॥

॥३३॥ एकदा मानिनी भूत्वा सुता दुःखित मानसा ॥ किमनेन वराकेन सदा धन रतेन च ॥३४॥ विश्वेश यास भूमौ रि सदा ध
न मनास्त्वयम् ॥ न पुत्रो न च कन्यास्य पौत्रदौहित्र कादयः ॥ ३५ ॥ कथं भवंति वितता वंशवल्यः फलान्विताः ॥ एवं विचारये
द्याव त्सा दासी धर्मतत्परा ॥३६॥ कथं धर्मपरो मे स्या त्तावल्लोका विचुक्रुशुः ॥ अहो कदर्यः पापात्मा ऽगच्छत्स्वयमम
र्दितः ॥ ३७ ॥ इति लोक मुखा च्छ्रुत्वा सुता सा नु ततः शुचा ॥ श्रुत्वा श्रुत्वा ब्राह्मणेभ्यो ज्ञातं धर्मस्य कारणम् ॥३८॥ दान
५५ मेव परं श्रेयः काश्यां तत्तु विशेषतः ॥ इति भूमौ पतित्वा सा चिन्तयति सुदुःखिता ॥३९॥ आगतो धनदक् स्वामी दृष्ट्वा
गेहं ममार्जितम् ॥ आलिप्त मग्निना शून्यं व्यवहार सुवर्जितम् ॥ ४० ॥ व्यग्रो वदत्कथं सुता न भोक्तव्यं मयाधुना ॥ त्वयापि सु
खदायिन्या भुज्यते सुप्यते सुखम् ॥ ४१ ॥ दास्युवाच ॥ गृहकार्यं कारयंतु नहि शक्त्या रुजार्दिता ॥ न भोक्तव्यं मया किंचि
त् भोजने धन संक्षयः ॥४२॥ महातेजो वाच ॥ भुज्यते प्रत्यहं किन्न कथं मथ्य धनक्षयः ॥ भविष्यति वरारोहे धन क्षय
कथां शृणु ॥४३॥ घृतं न भुज्यते स्वामि, नैमि ष्टान्नं, न शर्करा ॥ न पायसं तैलादि पक्वं न शपति किं धनम् ॥ ४४ ॥ इति श्रुत्वा

का॰ वच स्तस्य दुःखिना चूर्णतां गता ॥ उत्थाय चाह धिक् धिक् त्वां पाप सद्भिर्विगर्हितम् ॥ ४५॥ विषं पीत्वा जले वाऽपि त्यक्ष्ये जीवित मात्मनः ॥ असत्सं रह॰
६७॥ ग समुद्भूतं पापं कथमहत्त्वरे ॥ ४६॥ अहं दासी यथा वेश्या चतुर्भिः किन्न मर्दिता ॥ ज्ञात्वा मां गच्छसे पाप कथं त्वन्नोऽधमः परः ॥ ४७॥ त्वं १२
क्षत्रियः कुलीनश्च मत्संगात्सद्भि गर्हितः ॥ अतः परमहं पाप त्वत्संगान्नरके पते ॥ ४८॥ न स्वधर्मेषु निरतो न दान व्रत तत्परः ॥ क्षत्रि
याणां पश्य गेहे ब्राह्मणा भुंजते निशम् ॥ ४९॥ न ते पुत्रा न ते पौत्रा दौहित्रा भ्रातरोऽपवा ॥ धनं कस्योपकाराय संचितं धर्मवर्जितम्
॥ ५०॥ महातेजो वाच ॥ त्वं न जानासि धनजं सुखं सौभाग्यगर्विता ॥ मूषका अपि संचित्य भुंजन्ते सुख मुत्तमम् ॥ ५१॥ धनव्य
य करायेतु शत्रवस्ते मता मम ॥ केश्चित्संगं न कुर्या द्धि तज्जने व्यय तत्परैः ॥ ५२॥ धनव्यय कृतो मूर्खाः सीदन्ति धन शापतः ॥
अतो मया त्वं भार्यात्वे रक्षिता न कुलांगना ॥ ५३॥ तस्याः पुत्रादयो द्रव्यं व्ययं ने च्छन्ति मामकम् ॥ त्वं दासी मम वित्तस्य रक्षणं स्या
व्यया कुरु ॥ ५४॥ त्वत्प्रसादान्न बहुधाः कुकुवं परि पच्छति ॥ न पुत्रा व्यय कर्तारो न भार्या धन नाशिनी ॥ ५५॥ निस्तीर्णोऽस्मि त्व
या भद्रे धनरक्षाऽपि जायते ॥ अतः परं त्वमत्तिष्ठ मा यान्तं परिभर्त्स्य च ॥ ५६॥ देहि मुष्टि द्वयं तावत् यावदन्नं शने भवेत् ॥ इति ॥६७॥

श्रुत्वा तु सा दासी धर्मश्रवण तत्परा ॥ ५७॥ तूष्णीमास सुदुःखार्त्ता न च किंचिदुवाच ह ॥ महातेजोवाच ॥ प्रिये कथं मानवती जाता

ऽसि प्रिय वादिनि ॥ ५८॥ कथयिष्यसि यच्चत्वं तत्तत्कुर्यां न संशयः ॥ दास्युवाच ॥ मया चेत्तव कृत्यं स्यात्मदुक्तं कुरु नायक ॥ य

त्र धर्म कथा विष्णोः शिवस्य च परा भवेत् ॥ ५९॥ तत्र तत्र त्वया भद्र श्रोतव्या प्रत्यहं सदा ॥ तदा त्वदुक्तं न मया लंघनीयं

कदाचन ॥ ६०॥ श्रुत्वा कथां यतस्वाशुस्व व्यापारार्थ्ये मादरात् ॥ महातेजोवाच ॥ अवश्यमेव श्रोतव्या कथा धर्म

95 मयी मया ॥ विरुद्ध मेकमेवास्ति दातव्यं किंचिदेव हि ॥ ६१॥ तव भ्रान्तिः कुतो जाता श्रवणे धन हानिदे ॥ गम्यते न मया

क्वापि धनव्यय भिया प्रिये ॥ ६२॥ तव स्नेहाद् गमिष्यामि सहसा सुखदायिनि ॥ इति श्रुत्वा तया प्रोक्तो गच्छ धर्म कथां

श्रृणु ॥ ६३॥ तावद् भोजन सामग्रीं करोमि मधुरां तव ॥ इत्यादिष्टस्तया दास्या गतः श्रोतुं कथां हरेः ॥ ६४॥ त्रिलोचन

समीपे तु यत्र सन्मण्डली शुभा ॥ तत्र गत्वा महातेजा ह्युपविष्टः सुदूरतः ॥ ६५॥ अथ किं देवयात्रार्थं श्रवणार्थं कुसमा-

गतः ॥ महातेजा महातेजा महातेजा समागतः ॥ ६६॥ इत्युच्चैर्थोत्(?) तं लोकैः सोपहासं महात्मभिः ॥ ततो धर्म कथा शुश्रा

२ पंक्ति – १ = नूतनो

का०

पुण्यदा पाप नाशिनी ॥६७॥ प्रवक्ता सर्वलोकाना मानन्द रस गर्भिणी ॥ "काश्यां वसेद्धर्म परो महात्मा" नवित्त कामादि परः कदा रह०
।९८॥ च्चित ॥ ६८ ॥ वित्तं पुरा दैव कृतं तु यावत्तावद्भवत्येव नचात्र वादः ॥ धर्मोहि नूत्नो भवति प्रसिद्धं" पुरातनोऽन्यो विभवोति 12
नश्वरः ॥ ६९॥ येधर्म कामास्त इमे सौख्य पूर्णा" येन्चार्थ कामास्त इमे दुःख पूर्णाः ॥ अर्थार्थिनः काम सुखेऽपि निस्पृहान्॥
कुतः पुनर्द्धर्म सुखं परंन्च ॥७०॥ धन व्यया द्बिभ्यति पाप संन्चकः" धनव्ययो धनिनां मृत्यु हेतुः ॥ अहर्निशं धन तृष्णां
विहाय" योगक्षेमौ यावता कल्पयेत ॥७१॥ ततोऽधिकं पाप समूह वृद्ध्यै" भवत्यजस्रं धनिनां न वृद्धनं हि ॥ अहर्निशं
धर्म परो लभेत सुखं स्वर्ग मपवर्गं विरागम् ॥ ७२॥ स्तुतो महद्भिः कुरुते धर्म पुंजं" मत्वा पुर स्यात्म हितं सदैवतम्॥" इ
ति श्रुत्वा वचस्तेषां महतां भावितात्मनाम् ॥७३॥ कथान्ते स महा तेजा गतः शून्यं निजालयम् ॥ तस्मिन्दिने तयादास्या
न कृता पन्क्ति रन्नजा ॥ तस्य सत्व परीक्षार्थं कृता धर्म कथा न वा ॥ तावत्स आगतो गेहं स्नानार्थं पृष्ठवान्जलम् ॥७५॥
उष्णोदकेन स स्वामी स्नापितः सतया पुनः ॥ पुंश्चलीति प्रार्थितः सिद्ध मन्त्रं संपादितं मया ॥७६॥ स तूष्णी मास संकोन्चा ॥९८॥

न्मतां किमपि नोक्तवान् ॥ सिद्धमन्नं कथं स्वामिन् न भुज्यते न कथं त्वया ॥७६॥ त्वयाऽधुना ॥७७॥ ततो धनादिचर्चाते कर्तव्या
वर्तते बहु ॥ महातेजो वाच ॥ अपराध्यं मम नश्चेद्दृष्टासि स्वामि वल्लभे ॥ स्वहस्तेन मया कार्या पङ्क्तिः शुद्धा वदाशु तत् ॥
॥७८॥ दास्युवाच ॥ किमानेयं मया स्वामिन् पाकार्थं वद तत्त्वथा ॥ माषचूर्णादि यत्किंचिदुच्यतां शीघ्रमस्ति मे ॥७९॥ स्वा
म्युवाच ॥ हविष्यं स्वादु यत्किंचि भवेद्वेश्मनि तृप्तिप्रियम् ॥ तदानय महाभागे येन तृप्यन्ति सुद्विजाः ॥८०॥ तया हृदि वि-
४ चार्यैव नचोक्तं किमपि प्रियम् ॥ आनीय कारिता पङ्क्तिस्तया धर्मदृशा यथा ॥८१॥ भुंक्ष्वेति स तयोक्तस्तां प्राह स्वामिसु
दासिकाम् ॥ कथं विनाऽतिथिं भुंक्ते तस्माद्दानय कंचन ॥८२॥ सागता तु बहिर्द्वारं पश्यन्ती भिक्षुकान् बहून् ॥ आहूयमा
ना नायान्ति भिक्षुकाः पात्रपाणयः ॥८३॥ वदन्ति महतामन्नं त्यक्त्वा दासीपतेः कथम् ॥ भुज्यते चान्नमस्माभिः काश्यां
वार्धुषिकस्य च ॥ कृपणान्नं तु यो भुंक्ते स भुंक्ते तस्य किल्बिषम् ॥८४॥ इति श्रुत्वा भिक्षुमुखात्तया सर्वं निवेदितम् ॥ स्वा
मिने स्वाम्यपि तदा लज्जितो दुःखितो सम्भूत् ॥८५॥ भोक्तुं प्रवृत्तः स तदा मार्जारान्नाह्वयत्यरो ॥ नैपि ना यान्त्यनभ्यासात्ता

का॰ ड़यिष्यन्ति नः पुनः ॥ ८६॥ मार्जाराणां शुनां वृत्तिं ज्ञायते न कदाचन ॥ काकादयस्स्थले नात्र ताडिता वसुधातदा ॥ ८७॥ रह॰
९९॥ भुक्तं सदन्नं स्वयमेव तेन दास्यैव दत्तं परिशोषितं यत् ॥ व्यापारचर्चां च ततः स कृत्वा चिन्तापरोऽभून्निशि धर्महीनः ॥ ८८॥ १२
दास्युवाच ॥ कथमानन्दहीनस्त्वं स्वामिन् वद महामते ॥ धनेन धनिनां दुःखं निवर्तेत न चान्यथा ॥ ८९॥ सूत उवाच ॥
तस्यास्तु वचनं श्रुत्वा महातेजा महामतिः ॥ न किंचनोवाच तदा दासीधर्मपरायणा ॥ ९०॥ प्रातरुत्थाय गंगायां स
स्नातुमागतः सुधीः ॥ पुनर्धर्मकथां श्रोतुं गतो देवालयं महत् ॥ ९१॥ महद्भिराश्रितः सोऽपि शृण्वित्युक्तः कथाः शुभाः ॥
चकार श्रवणं विष्णुकथानामाद्यतोऽधिकम् ॥ ९२॥ तत्र कश्चिद् द्विजः शान्तः शिवविष्णुपरायणः ॥ कथास्तु विविधा
श्चक्रे नाम्ना शान्तव्रतो मतः ॥ ९३॥ शान्तव्रत उवाच ॥ जन्मान्तरसहस्रेषु यत्पुण्यं समुपार्जितम् ॥ तेन पुण्यं कदम्बे
न दर्शनं याति काशिका ॥ ९४॥ काशीदर्शनमात्रेण निःपापो जायते जनः ॥ पुण्यभारं पापनाशं कृत्वा विशति का
शिकाम् ॥ ९५॥ तेन पुण्यचयेनात्र जायते शुद्धमानसः ॥ मनःशुद्ध्या मुक्त एव भवत्येव न संशयः ॥ ९६॥ अत्रापि चेत् ॥९९॥

पाप समूह कारी॥ भवत्यजस्रं हि ध्वनांध्य बुद्धिः॥९७॥ विलोचन स्तस्य भवत्यव श्यं॥ धात्रा यदास्यैव मतो भवेत्सः॥९७॥
मात्रा पित्रा वापि देवै र्मुनीशैः कर्तुं शक्यं काशिका यत्करोति॥ नो शक्यं तन्मंत्र तीर्थादि भि र्वा॥ सन्न्यै भूपैः किं वराकै
श्च लोकैः॥९८॥ प्रवेश मात्रेण नरः कृतार्थः॥ स्थित्वा पुनः पाप रतो यथा स्यात्॥ तदान तस्यास्ति शरीर मात्रे॥ मृते वि
मुक्ति र्न नु यातनान्ते॥अहर्निशं विन्न चिन्तातुराणां॥ कलत्र पुत्रास्त गरादि भाजाम्॥ विजृम्भते नो परमं काशि सौख्यं॥ यदर्थ-
मास्ते सततं गिरीशः॥१००॥ श्रुता स्मृता गदिता बंध मोक्षं॥ करोति यत्काशिका काशरूपा॥ न काशिका शंकर चिन्त कानां॥
भवन्ति पापानि मुनीश्वराणाम्॥१०१॥ प्रवृत्ति भाजां खलु पापराशिः॥ संचीयते किं खलु चित्र मत्र॥ यतोऽनृतं द्वेष हिंसा
दि सर्वं भवत्यव श्यं प्रकृति र्यथास्या॥१०२॥ द्वेषो मान स्तृष्णा दंभो रागो लोभः सुदारुणः॥ प्रवृत्ति भाजां सततं भवत्येव न
संशयः॥१०३॥ क्व काशिका या सुखदा प्रवृत्तिः॥ क्व पापराशौ विषये प्रवृत्तिः॥ क्व विश्वनाथानु गतिः पर प्रदा॥ क्व दीनभ
र्त्योपसक्तिः मुहुः सदा॥१०४॥ सतत्वाना॥ इति द्वितीये ह्निक कथां सवातुजः॥ श्रुत्वा श्रुति ज्ञान रहस्य निष्ठाम्॥ गत्वा गृहं स पितुर्देव शालां

का॰ प्रविश्य चोत्थाय सुदेवचन्दम् ॥५॥ निर्दिष्टमासीत्स्वयमेव यत्र नीत्वा तु गंगां विममर्द सम्यक् स्नात्वा पुनर्देवगणान्गृहीत्वा ॥ र॰

॥७०॥ चागत्य गेहे विनिधाय सम्यक् ॥६॥ दासीं समाभाष्य जगाम देवं श्रीविश्वनाथं जगतामधीशम् ॥ विधाय पूजां पुनराग

तो गृहं चालोकयामास जनं सुभिक्षुकम् ॥७॥ नायाति कश्चित्पतितो यमित्यतो धनार्थ्यजीवीन यथार्थजीवनः ॥ त

स्य दत्तं न गच्छाति काश्यां कश्चिदप्यान्त्यजः ॥८॥ किं पुनर्ब्राह्मणादिर्हि धर्मरक्षाकरः शुचिः ॥ अथ देवान्प्रक्षालयि

त्वा चन्दनादि निवेद्य च ॥९॥ दास्या संभृत संभारः पक्तुं समुपचक्रमे ॥ पक्त्वा द्वितीये प्यहनि भुक्तवान्नमुत्तमम् ॥१०

शिष्टं दास्यै निवेद्याथ दासीमाह सवाग्द्विजः ॥ दासिके त्वत्प्रसादेन प्राप्ता काचिच्छुभामतिः ॥११॥ त्वत्समो न हितः

कश्चित्त्रैलोक्ये सचराचरे ॥ आगच्छ संक्षुभोगात्त्वं ददस्व परिधत्स्व च ॥१२॥ दास्युवाच ॥ हितं मया कृतं किं ते संतो हि

सतां संगाद्धर्मकथा भवन्ति हितकारकाः ॥

हितकारकाः ॥ सत्संगमासाद्य तु काः कथाः कर्णपथं गताः ॥१३॥ तव स्वामिन्कथय मे ममापि सुखदो भव ॥ महातेजोवा

च ॥ अथ तिष्ठ न्प्रसव्यं त्वया किंचिच्छुभानने ॥ श्वः सर्वं कथयिष्यामि यद्वृत्तं हृदये मम ॥१४॥ इति श्रुत्वा तु सा तूष्णीं

॥७०॥

मास सेवा परायणा ॥ अहर्निशं महातेजाः कथार्थं प्रविचारयन् ॥ १५॥ पश्चात्ताप परश्चासीज्जीविते मरणे तथा ॥ जय
शंकर विश्वेश जय दीन परायण ॥ १६॥ मामुद्धर जगन्नाथ पतितं थन लोलुपम् ॥ प्रतिक्षणं शिवशिव शिवेति प्रवदत्यसौ ॥
१७॥ रात्रौ निद्रा विशातितं न कथंचिदपिक्षणम् ॥ प्रातरुत्थाय स पुनः स्नात्वा विश्वेश मर्च्यैच ॥ १८॥ सत्सभां प्राप्य सध
नी वाक्युजः परया मुदा ॥ सद्भिरप्याहृतः सोऽप्य कथांशं सद्भिरुत्तमैः ॥ १९॥ अहो महत्वं हि स तां कथया श्रवणेन च ॥ म
हातेजा महा पापी जातः श्रवणतत्परः ॥ २०॥ बभूव शंकर परो विष्णु काशीमहत्परः ॥ उपविष्ठः कथां श्रोतु मेकाग्रम
श्री
द्विगर्हितः ॥ २१॥ ततः प्रवृत्ता महती कथा मल विनाशिनी ॥ महापुण्य प्रदा तत्र भोगमोक्षैक सेवधिः ॥ २२॥ शांतव्र
तस्ततः शंभुं नमस्कृत्य पुनः पुनः ॥ कथया मास सु कथां काशिवासिजन प्रियाम् ॥ २३॥ शांत व्रत उवाच ॥ देवाश्च त्र
मयः काश्यां राजानश्च च क्रवर्तिनः ॥ यत्रागत्य जित प्राणा भवन्ति न बहिर्मुखाः ॥ २४॥ शृण्वन्तु लोका मधुरं मदुक्तं ॥
जगद्धितम् पथ्य मपार सौख्यदम् ॥ विश्वेश पुर्यां वसतिं तु लब्ध्वा यथा स्थिति र्धर्म पराऽत्र कार्या ॥ २५॥ ६ ॥ ६॥

का॰ रत॰

॥७१॥

॥७१॥

काशी महोत्सव मवाप्य महाजनोऽयं ॥ संप्रार्थयत्य खिल साधन सिद्धि रूपम् ॥ ३४ ॥ विश्वेश्वरं
सकल लोक गुरुं सदा सं ॥ द्रष्टुं शुभाशुभ विनाश मुमा सहायम् ॥ काश्यां येषां नाम गच्छन्ति लोका ॥
बीजं तेषां जायते मोक्ष मार्गे ॥ ३५ ॥ काशीं ये वै संस्मरंत्यन्य देशे ॥ तान ध्यात्मा शंकर स्तारयेच्च संस्मरेच्च ॥ का
शीं ये वै शीघ्र माप्नुवंयेन ॥ सिद्धिं प्राप्ता स्ते नु तीर्णा भवाब्धेः ॥ ३६ ॥ देशः कालो लोकयोनि स्तथान्यं पक्षे
पक्षे क्षीयते संग दोषात् ॥ कलौ पूर्वावस्था न भवति परा भारत नृणाम् ॥ यथा सत्ये सम्यक् प्रतिदिन
प्रचारः प्रमारः शुभ चयः ॥ ३७ ॥ अतः काश्यां शुद्धै र्जित विविध लोल्यै र्गुरुतरैः ॥ प्रवस्तव्यं नित्यं हरिहरक
था स्वादन परैः ॥ यत्र यत्र निवसंति साधवो ॥ माधवैक शरणाः शिवाज्ञया ॥ ३८ ॥ मानयन्ति सु
कृतं न पातकं ॥ पातका न्वयमुमापते र्भवेत् ॥ शरीर संस्कार कृतो महाजना ॥ वहि स्तथांतः शिवदर्शना
र्थम् ॥ ३९ ॥ असंस्कृतं पश्यति नेतरः स्वयं ॥ सुसंस्कृतात्मा भगवंत मीश्वरम् ॥ पश्यत्युमावल्ल

१

रह॰ भ मादि पूरुषं॥ पतिव्रतावन्नियतैक मानसा ॥४०॥ सकिं महात्मा व्यभिचारिणां नृणाम् सुदर्शनंयाति
का॰ रति प्रियः सदा ॥ काशीस्थ लोकोनयमाद्बिभेति नदुःखसंगान्न च गर्भवासात् ॥४१॥ विभेतिचैवमह
॥७२॥ तो भयात्परं॥ यन्मानुषत्वं शिवविष्णुहीनं॥ गंगास्नानं विश्वनाथानुवृत्तिः॥ सत्तीर्थस्नान देवार्चनञ्च
॥४२॥ दानं शक्त्या सत्कथा सत्प्रसंगः॥ पापात्त्रासः कुर्यादेवं क्षेत्रमध्ये स्थितोवा॥ नो चेत्तीव्रा यात
ना भैरवी स्यात् ॥४३॥ एतच्छ्रुत्वा क्षत्रियो व्याकुलो भूत्वा पात्रस्तः शीघ्रमागत्य सत्सु॥ नत्वा द्यांगै र्हाहतो
स्मीति चोच्चै॥ र्व्याकुश्यासीत् दुर्मना दीनदीनः ॥४४॥ सद्भिश्चोक्तः किंवदस्याशु तत्वं॥ ब्रूहि ब्रूहि ब्रूहि कूर्मो
वयंतत् ॥ कालै पीडा किंनव आर्थ्यमस्ति॥ काशीनाथः सर्वमेवात्र कुर्यात् ॥४५॥ नधनं न सुता दारा
न देशे गेह मेव तत् ॥ कदाचिदुपकुर्वन्ति वराकाः क्षणभंगुराः ॥४६॥ यथोपकारी सततं विश्वेशो
विश्वया सह॥ तमेव भजतां नृणामुपकारा भवन्तिहि ॥४७॥ महात्तेजोवाच॥ अहं सुतेजसः पुत्रो ॥७२॥

महातेजाः प्रकीर्त्तितः ॥ क्षत्रियः कुल शीलादि युक्तः सूर्यान्वयोद्भवः ॥४८॥ पिता मम स्वधर्मज्ञो वदा
न्यः सज्जनाग्रणीः तस्य गेहे महापापः समुद्भूतोऽहं मंत्यजः ॥४९॥ धनलोभेन पापानि कृतानि सु महा
न्त्यपि ॥ दासी पतिरहं त्वथ परिणीता मृता वधूः ॥५०॥ निन्दितैर्बहुभिर्मार्गैर्धनं संचितवानहम् ॥
संख्यातस्य धनस्याशु मयापि नाऽवगम्यते ॥५१॥ काश्यामेव मया सर्वं संचितं पाप मार्गतः ॥ भक्ष
का अपि नो सन्ति पुत्राद्या मम वस्तुनः ॥५२॥ मम गेहे स्थिता दासी सदा श्रवण तत्परा ॥ तयाहं प्रेषि
तः सत्सु कथा श्रवण हेतवे ॥५३॥ श्रुतादि नत्रयं धर्म कथा पाप प्रणाशिनी ॥ विवेक दायिनी का-
श्या विश्वेशस्य महात्मनः ॥५४॥ अथ लज्जासु महती जाता मम महाधियः ॥ प्रायश्चित्तं वदंत्वथ
येन शुद्ध्येन्नरः सदा ॥५५॥ एकमेव महद्भूतं प्रायश्चित्तं दृढं द्विजाः ॥ सर्व पापानि नश्यन्ति का
श्यामपि कृतानि हि ॥५६॥ काश्यां कृतानां पापानां प्रायश्चित्तं न विद्यते ॥ श्रूयते महतां वक्त्राद्धि

२ भेमि हि ततो ध्रुवम् ॥५७॥ अवश्यं निःकृतिर्वाच्या कृपया तारके द्विजैः ॥ येनैन देहेन यथा मम स्यात् शुद्धि ८॥
का॰ स्तथाऽन्विष्य वदन्तु शीघ्रम् ॥५८॥ नोचेत्पतिष्यत्यवशो हि देहो मनुष्य रूपो ननु मानवार्थैः ॥ सदस्या ऊचुः॥ १२
॥७३॥ काश्यां कृतानां पापानां निष्कृतिर्नर दुर्लभा ॥५९॥ वदन्ति हि पुराणानि वेदास्स्मृति गयास्त्वपि ॥ तथापि
शंकरे णोक्त मस्ति किंचित्प्रचक्ष्महे ॥६०॥ श्रद्धया क्रियते यर्हि तदा वास फलं लभेत् ॥ यातनासु पतित्वा
किं मोक्षःसाध्यः सुमानवैः ॥६१॥ यद्यस्ति संचयो राजन् कुरु धर्म मनामयम् ॥ नहि धर्मात्परो बन्धु र्मृत
मप्यनु गच्छति ॥६२॥ पृष्टो विश्वेश्वरो देवो ऋषिभिः पाप भीरुभिः ॥ काश्यां स्थिते महापुण्ये जैगीषव्या-
दिभि र्भयात् ॥६३॥ ऋषय ऊचुः ॥ देव देव महादेव काशि वासि जन प्रिय ॥ काश्यां कृतानां पापानां प्रायश्चि
त्तं वदाशु नः ॥६४॥ श्रीभगवानुवाच ॥ विन्तानुमानेन महत् काशि वास सुख प्रदम् ॥ आचार्य द्विज वर्याय
साधवे तन्निवेदयेत् ॥६५॥ धनेषु विद्यमानेषु गृहस्थस्त्वत्थापयेत्सुधीः ॥ सर्वलक्षण संपन्नं दैन्य कार्पण्य वर्जि ॥७३॥

तम् ॥६६॥ अन्नवस्त्रादि संपूर्णं कुप्य भांडादि संभृतम् ॥ शय्या पीठादि संयुक्तं गृहं पात्रे निवेदयेत् ॥६७॥ यत्र विष्णु कथा नित्या मम धर्म कथाः शुभाः ॥ भवंत्यविरतं तत्र पात्र वर्ये निवेदयेत् ॥६८॥ देवकार्यं पितृकार्यं सतां विश्राम एव यत् ॥ तदृक्त मुद्धरे त्पूर्वान् दात्रा सह ममाज्ञया ॥६९॥ यागति र्गृह दातुः स्या त्पितॄणामपि सागतिः ॥ तस्मात्काश्यां गृह समं दानं नास्ति महत् द्विजाः ॥७०॥ काश्यां कृतानां पापानां शुष्कार्द्राणां धियापि च ॥ प्रायश्चित्तं मुख्यमेतत्काशीवास फल प्रदम् ॥७१॥ ब्राह्मणो यत्र वसति दिन मात्र मपि स्वतः ॥ तत्सान्कृते किं पुनः स्या द्वर्णनीयं फलं मया ॥७२॥ दत्वा गृहं पाप भीरुः प्रव्रजिं परित स्त्यजेत् ॥ प्रव्रत्या पुनरायांति संस्कारात्पात कान्युत ॥७३॥ अतत्वज्ञ मविक्रांत मलब्धा (भृधा) त्मान मस्थिरम् ॥ निगिरन्तींद्रियाण्याशु प्रव्रत्यापि हि धार्मिकं ॥७४॥ एतादृश मयीत्यं वै धर्मैर्मुक्तं महामतिम् ॥ काशिका मोचयत्येव प्रायश्चित्त परं नरम् ॥७५॥ काश्यां तिष्ठन्ति सगणाः सावधानाः सदा द्विजाः ॥ अत्रानन्द वने यस्तु शिवालय करो भवेत् ॥७६॥ पाताल मर्त्य

२
का॰ लोकेषु कृत देवालयः सच ॥ इष्टका पुंज कृच्चस्तु कौतुकेन नरः सकृत् ॥७७॥ काश्यां जलाशयं किंचित् गर्त्तमा
त्र मुनीश्वराः ॥ करोति विवशो ऽप्यत्र कृतैः पापैर्न युज्यते ॥७८॥ न तयोः साम्यतां यान्ति सर्वदः सर्वतीर्थ कृत् ॥ र॰
॥७४॥ शिव लिङ्गस्य पूजार्चेत् प्रत्यहं जायते सकृत् ॥७९॥ तदा लिंग प्रतिष्ठायाः फलमाप्नोति संमतम् ॥ जलाशय
स्य खनने लिंगोत्खातो भवत्यपि ॥८०॥ (यतः) सर्वलिंगमयी काशी काशित सत्यदा ॥ शिवालय शतं कृत्वाय
त्फलं प्राप्यते नृभिः ॥८१॥ द्विजालये नन्वैकेन तत्फलं त्वक्षयं भवेत् ॥ शिवं शिवालयं काश्यां कृत भंगं नि
रीक्ष्य च ॥८२॥ अनुतापो भवेन्नित्यं कर्त्तुः प्रीतिहरः प्रियः ॥ जीर्णोद्धारं कुर्वीत जलाशय शिवालयोः ॥
८३॥ शिवायतन लक्षाणि विष्णोरायतनानि च ॥ कृतानि तेन विप्रेन्द्राः स्थापितो ब्राह्मणो यदि ॥८४॥ विप्रे
संस्थापिते काश्यां त्रैलोक्यं स्थापितं भवेत् ॥ त्रैलोक्ये स्थापिते विष्णुप्राः प्रीतोऽहं सचराचरः ॥८५॥ तस्मा-
त्किंचिद्यथाशक्त्या कुर्याद्विप्रो यथावसेत् ॥ क्षेत्रे कृतानां पापानां प्रायश्चित्तमिदं स्मृतम् ॥८६॥ लोभमुत्काय

नो देयं गृहीत्वाऽन्यत्र यो वसेत् ॥ पाक्षिको यस्य संवासस्तस्मै देयं न तद्गृहम् ॥१८७॥ पुत्रपौत्रादि युक्ताय काशी

वासाभिलाषिणे ॥ शिवभक्तिपरायापि विष्णुव्रतपराय च ॥१८८॥ महापातकसंस्थस्तु दत्ते गेहे स्वयं व्रजेत् ॥

अन्यगेहे गृहं यस्तु कृत्वा विप्राय चार्पयेत् ॥१८९॥ मद्गृहं निर्मितं तेन दत्तं मत्सं न संशयः ॥ सदस्या ऊचुः ॥

एवं भगवता प्रोक्तं प्रायश्चित्तं तृतीयकम् ॥१९०॥ श्रुत्वा महर्षयो हर्षं लेभिरे काशिवासिनः ॥ महातेजो वाच

॥ विधिं वद तद्दानस्य मम सर्वाघनुत्तये ॥१९१॥ यथा दद्यां गृहं यस्मै द्विजाय धनसंयुतम् ॥ सदस्या–

ऊचुः ॥ यथा कथंचिद्विप्रो वै वसेद्गेहे सुखं सुधीः ॥१९२॥ स एव मुख्यो हि विधिर्यत्र धर्मः प्रवर्तते ॥ क

श्चिद्द्विजस्म्रृते यत्र धर्मशालेति सा स्मृता ॥१९३॥ तत्राप्यनन्तं भवति पुण्यं पापं च नश्यति ॥ श्री महादेव

उवाच ॥ विधिं श्रुत्वा महातेजा गृहदानस्य पापनुत् ॥१९४॥ पाषाणकाष्ठेष्टकाभिः कारयामास सद्गृहम् ॥ बहु

भिर्दिवसैः सिद्धं बहुचित्रविचित्रितम् ॥१९५॥ तुलसीकाननयुतं कूपसोपानसंयुतम् ॥ वशिष्ठगोत्रः सु

तपाः सदाचारः कुटुंबवान् ॥९६॥ तृण पर्णादि रचिते गेहे तिष्ठति सर्वदा ॥ सदा भिक्षित भुक् शान्तः सदाशि
का० व परायणः ॥९७॥ पंच मुंडे महा पीठे वीरेश्वर समीपतः ॥वसतिस्तस्य जीर्णस्य क्षुधया जीर्णतां गता ॥९८॥ ९
॥७५॥ तं दृष्ट्वा तु महातेजा ब्राह्मणं प्राह दासवत् ॥ महातेजोवाच ॥ किंचिद्दित्सामु कामोऽहं शृणु विप्रेंद्र मद्वचः ॥९९॥
शिवार्च्चकेनचिह्नेऽहं मुत्थापित मपि स्फुटम् ॥ तदंगी क्रियतां मत्त तन्निस्तारार्थ माशु भोः ॥ १००॥ नहि ब्राह्म
णभक्तानां नारकी भवति क्वचित् ॥ सुतपा उवाच ॥ धापावरोऽहं धर्मिष्ठ नाधिकं प्रार्थये क्वचित् ॥ १॥ १०१
अग्नि निर्वाह मात्रात्तु स्वातिथेः पूजनात्परम् ॥ गृहेन मम किं कार्यं धनाढ्येवा महामते ॥ २॥ १०२ धनदोऽसं विजा
नामि यदा तुल्य पतेद्ध्रुवः ॥ श्रीमहादेव उवाच ॥ आनीय सर्वान् विप्रान् स प्रार्थयामास तं द्विजम् ॥ ३॥ १०३
तन्मुखात्स महा तेजा प्रायश्चित्तार्थ्य मात्मनः ॥ तैः प्रार्थितस्तु सुतपा उवाच ब्राह्मणान्प्रति ॥ ४॥ १०४ अंगी
कृत्य ब्राह्मणेभ्यो दास्यामि न वसामि तत् ॥ २० सदस्या ऊचुः ॥ त्वमुद्धरैनं विप्रर्षे क्षत्रियं धनिनं नतम् ॥ ॥७५॥

॥५॥ अन्तर्यामी प्रयुक्तस्तु यत्करिष्यसि तत्कुरु ॥ इति श्रुत्वा वचस्तेषामंगीकृत्य गृहं महत् ॥६॥ मह
द्धनं च विप्रेभ्यो ददौ स सुतपाः पुनः ॥ प्रतिग्रहस्य यो दोषस्तस्य नाशाय निर्ममः ॥७॥ भिक्षितं भोजया
मास ब्राह्मणान्पूर्वसंचितम् ॥ एवं सर्वे पापहन्तोऽपि बाहुजो दत्वा गृहं विप्रवराय पातकैः ॥८॥ मुक्तः
सतां संमतिमाप संमतश्चचार धर्मे नहि पापमाप ॥ शृणोति यः पापविनाशिनीं कथां पापानि नश्यं
ति हि तस्य शीघ्रम् ॥९॥ यः श्रावयेत्सोऽपि न पापभाग्भवेत् प्राप्नोति धर्मं परमार्थहेतुम् ॥१०॥ इ
ति श्रीब्रह्मवैवर्त्ते प्रायश्चित्तविधौ द्वादशोऽध्यायः ॥ ऋषय ऊचुः ॥ काश्यां लिंगान्यनन्तानि-
काश्यां तीर्थानि सर्वतः ॥ अकृत्वा दर्शनं स्नानं प्रत्यवायी नरो भवेत् ॥१॥ तानि तीर्थानि लिंगानि-
वद स्व मुनिवत्सल ॥ ज्ञातेषु तेषु यात्रा स्यान्नान्यथा तीर्थवल्लभ ॥२॥ सूत उवाच ॥ आवश्यका
नि तीर्थानि शृण्वन्तु द्विजसत्तमाः ॥ अस्नानात्प्रत्यवायी स्यादविमुक्ते स्थितो नरः ॥३॥ गंगास्नानं नि

५ त्वमेव प्रशस्तं गंगास्नानात्सर्वतीर्थेषु सत्स्नौ ॥ गंगास्नानोपेक्षयान्यस्य यात्रा नो कर्तव्या धर्मदृग्भिर्नरैर्हि
का· ॥ ४॥ मध्याह्ने मणिकर्णिका मनुसरेत्सर्वार्थहंत्रीं पुनर्मोक्षार्थादि समस्त सिद्धिदजलां विष्णोस्तपःस र:
॥७६॥ त्फलम् ॥ देवा देवमुनीश्वराश्च ऋषयो नागासुरा मानवाः ॥ कृत्वा धर्मशतं महेशशरणा यां प्रार्थ
यंतेऽनिशम् ॥ ५॥ ततः पुनः पंचनदं रमापतेर्निवासभूतं सकलार्थसिद्धिदम् ॥ स्नायान्नरः पापविनाश
पूर्वं मोक्षांतसिद्धिप्रदमादरेण ॥ ६॥ आदिकेशवपदं परं पदं संगमं वरणया च गंगया ॥ स्नाति यः
सुकृतपूरपूरितस्तत्र विष्णुपदभाक् स जायते ॥ ७॥ शूलटंकपुरतः प्रजायतेऽस्तीर्थमुत्तममिति प्रया
गजं ॥ गंगया यमुनया च संगमं तत्र मज्जनकृतां न मज्जनम् ॥ गंगासिसंभेदवरे निमज्य नरो निम
ज्जेन्न भवाब्धितोये ॥ सुतीर्थकामस्य सुकामपूर्तिर्भवेदवश्यं भुवि यत्र सिद्धा ॥ ८॥ गंगातीरे यानि
तीर्थानि संति तेषु स्नानं गंगया सिध्यतीह ॥ लिंगं तीर्थं तिष्यकाले समेन सूत्रेण स्यात् ज्ञातमत्रत्य[1]

१ पाठान्तरं – "मत्रत्य" – "मार्तंस"

त्रोकेः।१०।। नित्यानि तीर्थानि भवंति चैतानि- अन्यानि यात्रा दिवसेऽधिकानि ।। तत्तद्दिने कार्यशतं विहाय स्नाना

द्यमेव प्रयत्नोऽभि गच्छेत् ।।११।। पदे पदे तीर्थ शतं गंगातीरे महर्षयः ।। संति तेषां परिच्छेदः केन कर्तुं प्रशक्य

ते ।।१२।। तीर्थांर्थीन वहि र्गच्छेन्न देवार्थी कदाचन ।। सर्वतीर्थानि देवाश्च वसंत्यत्रा विमुक्तिके ।।१३।। काश्यां

नगोत्तराः सप्तपुर्यः संति समागताः ।। रेणुका शूकरः काशी काली काल वटेश्वराः ।। कालंजर महाकालौ ऊषरा

नव कीर्तिताः ।। नवारण्यानि-च तथा नाड्याश्च सुकृत प्रदाः ।।१४।। ऋषय ऊचुः ।। सप्तपुर्यः काशिकायां

कुत्र कुत्र व्यवस्थिताः ।। ज्ञातव्या स्ताः कथं सूत यात्रार्थि भिरित स्ततः ।।१५।। सूतउवाच ।। इदमेव पुरा पृष्टः

पार्वत्या जगदीश्वरः ।। कथयामि यथा व्यास मुखा-च्छुत्वा वधारितम् ।। १६।। श्रीदेव्युवाच ।। सप्तपुर्यः काशि

कायां संति शंकर शंकराः ।। श्रुता स्त्वत्तो मुनिश्रेष्ठ मयादेव तासां स्थानानि मेवद ।।१७।। यात्रा दिनानि च

च ब्रूहि फलं तासां विमुक्तिदम् ।। यत्रत्वं भगवाञ्छंभु र्यत्र देवो जनार्दनः ।। १८।। यत्र ब्रह्मादयो देवा स्तत्र तीर्थ

१ पाठान्तर — "श्रुतास्त्वत्तो" — "श्रुत्वा त्वत्तो"

६ वराग्निहि ॥ भवंत्येव किमाश्चर्यं ज्ञानं सर्वस्य दुर्लभम् ॥ १९॥ श्री महादेव उवाच ॥ पुनः शृणु महाभागे रह
का॰ स्यं काशि वासिनाम् ॥ ये सर्वतीर्थ सौभाग्यं पुण्यं पाप प्रनाशनम् ॥ २०॥ भुंजंते क्षेत्र मध्यस्था अनाया र॰
॥७७॥ सेन पार्वति ॥ तेषां नक्षेत्र तीर्थादावन्यत्र रति मुक्त्मनः ॥२१॥ भवत्यवश्यं धीराणां सर्वानुभव साक्षिणम् १३
॥ मुक्ति पुर्यः सप्त शुद्धाः प्रति कल्पं सुनिश्चलाः ॥२२॥ तासु सर्वासु गिरिजे वसामः सहितास्त्रयः ॥ देवा
देवैस्त्रय स्त्रिंशत्-कोटिभिर्मुक्तिदा नृणाम् ॥ २३॥ ताभिर्वयं सुपूर्णाभिः सुपूर्णा मुक्ति शासनात् ॥ स्थि
ताःस्वानन्द सदने निरानंदान्विमोचितुम् ॥ २४॥ व्यापिका काशिका त्वन्या व्याप्याः षण्मुक्तिदाः पुरः ॥
काद्या स्वरूपा काशीयं काश्यं त्वन्य ज्जगत्त्रयम् ॥ २५॥ हिरण्य गर्भ शक्राद्या ब्रह्मांशा जीव राशयः ॥
ब्रह्मा श्रितां प्रवर्तन्ते ब्रह्म नान्या श्रितं विभु ॥ २६॥ तथा सर्वाणि तीर्थानि सप्त पुर्यश्च मानदे ॥ वसंति
काशि माश्रित्य स्व सामर्थ्य विवृद्धये ॥ २७॥ कः काशिकां न सेवेत ब्रह्म विष्णुीन्द्र शंकराः ॥ सुखदा पर ॥७७॥

मं सौख्यं प्राप्तुं यत्र सदा स्थिताः ॥ २८ ॥ शृणु पार्वति वक्ष्यामि यद्गोप्यं मम सर्वदा ॥ यत्र याः पूः समुद्दिष्टा काश्यां
तत्र वदामि ते ॥ २९ ॥ शंखोद्धारा प्रदेशो तु द्वारिका परिकीर्तिता ॥ बिंदु माधव पार्श्वस्था कांचीति विश्रुता ॥
३० ॥ उत्तरार्कात् तु उत्तरतो मथुरावरणावधि ॥ अयोध्या वायु कोणे तु सोमेश्वर समीपतः ॥ ३१ ॥ यत्र रामेश्वरं लिं
गं वसेच्चीता पतिः स्वयं ॥ विभीषणादि भिर्यत्र राक्षसै र्वानरै रपि ॥ ३२ ॥ स्थापितान्यद्भुतं सार्द्धं लिंगानि
परितः पृथक् ॥ असि संभेद कोणे तु गंगा द्वारं प्रकीर्त्तितम् ॥ ३३ ॥ वृद्ध कालात्पुरो भागे कृत्ति वासेश्वराव
धि ॥ काल काल पुरी ज्ञेया सर्वं तो सर्वतो जगत् ॥ ३४ ॥ एताः काश्यां पुरः पूर्वे देवै र्ब्रह्मादिभिः शिवे ॥ कृ
त्वा प्रकाशिता काशी जनित्री भोग मोक्षयोः ॥ यथा देवेषु विश्वेशो यथा देवीषु पार्वति ॥ यथा धर्मेषु
विश्वाख्या तथा तीर्थेषु काशिका ॥ ३६ ॥ प्रावृट्सु नो द्वारवती यात्रा मोक्षकरी शुभा ॥ शरत्काले विष्णु
कांची गंतव्या प्रत्यहं बुधैः ॥ ३७ ॥ मथुरा वसंत समये गंतव्या भक्ति वर्द्धिनी ॥ अयोध्या ग्रीष्मकाले

७

का०
॥७८॥

तु तापत्रय विनाशिनी ॥ ३८॥ अवन्तिका हिमर्तौ तु महाजाड्य निवारिणी ॥ मायापुरी तु शिशिरे रजोगुण
विनाशिनी ॥ ३९॥ काश्याः सर्वा निस्रताः सृष्टिकाले काश्या मेताः स्थिताः कालेव सन्ति ॥ काश्यां लीनाः सर्व
संहार काले ज्ञातव्या स्ता मुक्ति पुर्यो भवानि ॥४०॥ श्री पार्वत्युवाच ॥ विभागोयं महादेव कदारभ्य प्रवर्तते ॥
पृथक् स्थिताः कथं पुर्यः कथमेकत्र संस्थिताः ॥४१॥ महादेव उवाच ॥ शृणु देवि परं गुह्यं यन्नाख्यातं तु क
स्यचित् ॥ काश्यास्तु महिमा कश्चिच्च द्वीचिर्भ्रश्चिन्त शान्ति कृत ॥ ४२॥ पुरा कृतयुगे देवि देवानां सुमहा
नभूत् ॥ संवादो मुक्ति मुद्दिश्य ऋषीणां च महात्मनाम् ॥ ४३॥ कथं जीवाः प्रमुच्यंते कथं पापक्षयो भवेत् ॥
कथं दुःख निवृत्तिर्हि कथं सुख मवाप्यते ॥४४॥ सूत उवाच ॥ एवं प्रवदतां तेषां निःश्रेयसि सुखार्थिनाम्
सर्ववेदार्थ तत्वज्ञो भगवान् विष्णु रब्रवीत् ॥ ४५॥ अयोध्या मथुरा माया काशी कांची ह्यवन्तिका ॥ पुरी
द्वारावती ज्ञेयाः सप्तैता मोक्षदायिकाः ॥४६॥ ब्रह्मोवाच ॥ द्वारकायां महापेच वसंति च महार्थिराः ॥ तेषांमो

१३

॥७८॥

क्षो भवत्येव महा पाप प्रणाशनः ॥४७॥ महा पातक युक्ता ये महादान रताश्च ये ॥ तेषां समा गतिः प्रोक्ता मथु
रायां वपुर्व्ययपात् ॥ ४८॥ यागति र्योग युक्तानां मुनीना मूर्द्ध रेतसाम् ॥ सा गति र्विष्णु कांच्यां हि कांति मत्या परा
र्प्यिनाम् ॥ ४९॥ शृण्वन्तु देवा ऋषयो ममवाचं महाफलम् ॥ अयोध्यायां मृता जीवा भवंति हरिरूपिणः॥ ५०॥
गंगा द्वारे मृतानां तु निर्वाणं निर्विकल्पकम् ॥ भवत्येव न संदेहो स्मनंतस्य प्रसादतः ॥ ५१॥ अवन्तिका पुरी शुभ्रा
58 महाकालस्य शाश्वती ॥ यस्यां विपन्ना विश्वात्मा निलीयंते महाजनाः ॥५२॥ स्नतः षट् सिद्धिदा नृणां देहत्या
गकृतां सताम् ॥ सर्वाः सुकृत संभार संभृताः पुण्य कर्मिणाम् ॥ ५३॥ पापिष्ठानां दर्शन स्पर्श श्रवणादिषु दुर्लभाः
॥ तीर्थानि सर्वाणि पुरश्च सर्वास्तथा शिवस्यायतनानि षष्ठिः॥ ५४ ॥ नद्यस्तथा[1] सरसः सागराश्च देवाः समे
ता मुनयश्च सर्वे ॥ वसंति काश्यां स्व विमुक्ति कामाः कामारि संप्राप्त महत्प्रभावाः ॥५५॥ इष्ट्वा हि काशींस्व
ते मनोन तीर्थेषु चान्येषु सदैव नेषु ॥ सूत उवाच ॥ इति ब्रह्म हरिभ्यां तु प्रोक्ता देवाः सवासवाः ॥५६॥ का

1 पाठान्तर - "नद्यो नद्यः सरसः सागराश्च"

का श्रीं मनसि संस्थाय गताः संदेहवर्जिताः ॥ शौनक उवाच ॥ सूता स्माभिः श्रुताः पुण्याः कथाः काश्याः सुदुर्लभाः ॥५७ ॥२॥
॥ ७९ ॥ ॥ पुरीणां संग्रहो यत्र तत्र मोक्षो न संशयः ॥ यस्याः प्रसादादन्यास्तु पुर्यो मोक्षं वितन्वते ॥ ५८ ॥ तां काशीं कोनसे
वेत मोक्षार्थी सर्वदां शुभां ॥ अन्यान्यपि च तीर्थानि मुक्तिदानि पदे पदे ॥ ५९ ॥ संति निर्मल संतान क[1]रा
णि फलवन्ति च ॥ तानि तीर्थानि लिंगानि वदस्व मुनि वल्लभ ॥ सूत उवाच ॥ अथ लिंगानि वक्ष्यामि म
हा महिमभांजि च ॥ ६० ॥ यद्दर्शनान्महापाप क्षयः पुण्यचयो भवेत् ॥ अविमुक्तेश्वरं लिंगमविमुक्त फलप्रदम् ॥
६१ ॥ यस्य दर्शनमात्रेण कृतार्थो मोक्षमाप्नुयात् ॥ लिंगं महानन्दकरं विश्वेशाख्यं सनातनम् ॥ ६२ ॥ नमस्कृ
त्य विमुच्येत पुरुषः प्राकृतैर्गुणैः ॥ मणिकर्णीश्वरं लिङ्गं मोक्षद्वारमपावृतम् ॥ ६३ ॥ यस्य दर्शनतः स-
म्यग्मणिकर्णी समाप्यते ॥ वीरेश्वरं महालिङ्गं चतुर्वर्ग फलप्रदम् ॥ ६४ ॥ सर्वसिद्धिप्रदं नत्वा मधु(भ)ध्वा-
न्तनाशनं ॥ केदारेशं महालिंगं देहकेदारनाशनम् ध्व केदार पुत्र विलायामवंतिध्वांत भूमयः ॥ कृत्तिवासं ॥ ७९ ॥

१ पाठान्तर — "कारीणि फलवन्तीच"

१ पाठान्तर — "ब्रह्मसारं प्रद माद्यै रुपासितम्॥"
२ ,, "कपर्द मात्र मप्पिनो संगृह्णीया द्विरक्ति भाक्॥"

महालिंगं वास सौख्य करं परम्॥ ६६॥ यस्य दर्शन मात्रेण मोक्षादि दुर्लभं ननु॥ वृद्धकालेश्वरं लिंगं महाकाल निवारणम्॥ ६७॥ कलिकाल महाज्वाला जलंजीवन जीवनम्॥ चन्द्रेश्वरं चन्द्रकान्त मणि प्रभमनामयम्॥ ६८॥ अज्ञान ध्वांत शमनं दृष्टं काश्यां चिदात्मकम्॥ ब्रह्मेश्वरं ब्रह्मसारं प्र॰ मथाद्यै रुपासितम्॥ ६९॥ दृष्टं महाब्धौ घहरं महामाणिक्य सन्निभम्॥ त्रिलोचनेश्वरं लिंगं नागयज्ञोपवीतिनम्॥ ७०॥ दृष्ट्वा त्रैलोक्य विभवस्त्वणी भवति नान्यथा॥ ॐकारेश्वर मभ्यर्च्य योग सांख्यादि सिद्धि भाक्॥ ७१॥ नरो भवति चैतन्य पूर्णः पूर्ण मनोरथः॥ कपर्दीश्वर मभ्यर्च्य काश्यां शिवतनुर्भवेत्॥ ७२॥ कपर्द्द मात्र मप्पेनो संग्रासं विरक्ति भाक्॥ धर्मेश्वरस्य ये भक्ता धर्म पूर्णा भवन्ति हि॥ काश्यां पाप मतिस्तान्न बाध्यते धर्म वत्सलान्॥ अग्नीश्वरं महालिंगं महापातकनाशनम्॥ ७४॥ दृष्ट्वा काश्यां महायज्ञ फल माप्नोति मानवः॥ समस्त देव शरणं सर्व तीर्थाश्रयं शुभम्॥ ७५॥ अविमुक्तं महाक्षेत्रं सेव्यं धीरै जितेन्द्रियैः। काश्यां पश्यन्ति सततं शंकरं धर्म तत्पराः॥ ७६॥ वसंति पापानहि का

१ पाठान्तर – "मोक्षसुखं नवै भवेत्"।
२ " – "वसन्ति" "सुकरणैः"
३ " " – "पुनःपुनर्"

८ शिकायां वसन्ति चेदत्र मतिर्नजायते ।। मतिर्भवेच्चेन्नहि यातनाक्षयः क्षयो भवेन्मोक्ष सुखं तु धिक्कृतम् ।।
का. ७७।। एवं महासंकट माप्य मुक्तिः शुभाप्य वाथर्म परै रवाप्यते ।। विचार्य मेतद्धृदि शंकराज्ञया पापंनकुर्यात्किमपीह रह.
।८०।। धीरः ।। ७८।। नलोलुपाः कामपराः सुधान्विताः हिंसां क्षमां दान पराः सदा शिवम् ।। पश्यंति लोकाः परवाद कारिणः ।।
पैशून्य पाखंड विवाद वादिनः ।। ७९।। पश्यंति शांताश्च समानवृत्तयः सदासदाचार रताद्विज प्रियाः ।। परोप
कारादिषु चाप्रमत्ता प्रमत्तसंसर्ग विवर्जिताश्च ।। ८०।। शिवामृतं ये श्रुतिभिः पिबन्ति गंगाजलं ये मुखतः पिबं
ति ।। पिबंति ये काश्य मृतं पुनः पुनर्न जातु मातु स्तनपा भवंति ।।८१।। क्षेमं यत्र नतीर्थ तत्र तीर्थानि च यः ––।।
तीर्थानि यत्रापि च तीर्थ क्षेत्र समागमेऽपि न शिवः सर्वस्यधाताऽच्युतः ।। देवा यत्र मिलन्ति तत्र गमनं लोकस्य
ने भाव्यते सर्वं ह्येतद् बाधितं सुखकरं लोकस्य काश्यां ध्रुवम् ।।८२।। इति श्री ब्रह्मवैवर्त्ते तृतीय विभागे त्र
योदशोऽध्यायः ।। ऋषय ऊचुः ।। काशी महात्म्य मनघ कथयस्व पुनः शुभम् ।। श्रवणे नैव सुभग प्रीतिर्जाता 94
।।८०।।

ऽविमुक्तके ॥१॥ सूत उवाच ॥ शृण्वन्तु ऋषयः सर्वे विचित्रां काशि सत्कथाम् ॥ श्रुतां व्यासमुखात्सर्वैर्वैशंपाय
न पूर्वकैः ॥२॥ ऋषिभिस्तु कुरुक्षेत्र वासिभिः पुण्यराशिभिः ॥ पुरा सत्ययुगे विप्रा यद्वृत्तं तद्वदामि वः ॥३॥ स्वायंभुवो
महातेजा मनुः शासितविग्रहः ॥ स एव कदाचिद्विप्रशान्तात्मा ब्रह्माणं समपश्यत ॥४॥ पप्रच्छ सत्यकामस्तं किमागमन
कारणम् ॥ मनुरुवाच ॥ आज्ञापय गुरो मां त्वं वनं गन्तुं जगद्गुरो ॥५॥ कृतकृत्योऽस्मि भगवन्न कार्यं मम विद्यते ॥
58 ब्रह्मोवाच ॥ वक्ता त्वमसि धर्मस्य कर्त्ता तदनुमोदिता ॥६॥ कथं निर्वेदमायातो भवान् धर्मप्रवर्तकः ॥ मनुरु-
वाच ॥ ब्रह्मन् काशीं काशितां शोभितां त्वां ये ये लोकाः संस्मरन् यत्र कुत्र ॥७॥ ते ते मुक्ताः किं पुनर्दर्शनात्स्युर्दृष्ट्वा ये
वै काशिकां संगताश्च ॥ अहमपि गमनेच्छुर्यत्र देवः स्वतंत्रः ॥ शुभमशुभजनं यस्तारयेत्काशिवासात् ॥८॥
श्रुतिशतकृतकार्याय लोका वसन्ति हि ॥ अहमपि कृतकार्यस्तत्र वत्स्ये कृतार्थः ॥ श्रुतिस्मृतिपुराणैश्च धर्मः
साध्यः सतां मतः ॥९॥ तत्फलं दर्शनादेव किं धर्मैः साधितैः पुनः ॥ सूत उवाच ॥ एवं ब्रह्मा मनोः श्रुत्वा वाक्यं-

५ माय द्विचारयेत् ॥१०॥ तावद्धर्मः पापिनां हिंसाः स्ता ब्रह्माण मन्वगात् ॥ नमस्कृत्य महातेजाः काशीं काशीश्वरं स्म
का॰ रन् ॥११॥ उपविष्टो मेरुपृष्ठे कृतार्घ्यो ब्रह्म सन्निधौ ॥ ब्रह्मोवाच ॥ कथमागमनं तेद्य स्थानाद्वतस्य शंसमे ॥१२॥ ९८
॥८१॥ पापिनां हननं सेवा सस्माकं वेदरक्षणम् ॥ यम उवाच ॥ देवदेव नमस्तेस्तु कृतार्थोस्मि जगत्पते ॥१३॥ शृणु यत्
कौतुकं वृत्तं संयमिन्यां ममागतः ॥ दूता मयापापि विलोकनाय सृष्टा गताभारतमेवखंडम् ॥१४॥ सत्येन पा
पं प्रचुरं जनेषु यत्रास्ति ते काशिदृशाविमुक्ता ॥ अहं तत्र महापापकारिणो निरयं गतान् ॥१५॥ शास्मि क्रोध
वशान्तेषां पातकैः संप्रणोदितः ॥ तावद्दूताः कर्मभूमेरित्का दृष्टा मयागताः ॥१६॥ पृष्टाश्च ते मया सूचुः का
श्या सर्वे विमोचिताः ॥ केचिन्नाम्ना केपि संदर्शनेन केचिद्गत्वा स्नानमात्रेणकेचित् ॥१७॥ केचिद्देवं दक्षि
णी कृत्य केचित् पूजां कृत्वा केपि मुक्ता बभूवुः ॥ पापिनोपि विविधै र्विचारणैः संविचार्य इति गणैः परस्परम् ॥
१८॥ यातनार्ध्य च्छत जीव पंजरैः काशि काशि वचने र्विमोचिताः ॥ ब्रह्मोवाच ॥ स्वायंभुव मनोशांत धर्मरा
॥८१॥

ज महामते ॥ गच्छामः शंकरं शांतं पृच्छाम स्तस्य चेष्टितम् ॥ १९ ॥ सूत उवाच ॥ स्व मुक्तो मनुयमौ ब्रह्मणा
सह सुव्रतौ ॥ यातौ कैलास शिखरं यत्र देव उमापतिः ॥ २० ॥ तत्र दृष्ट्वा महादेवं प्रणिपत्य पुनः पुनः ॥ स्तोत्रैः
बहुविधैः शंभुं जयकाशीश शंकर ॥ २१ ॥ उमा महेश देवेश शरण्य शिव शाश्वत ॥ इति नामभिरन्यैश्च
शिव उवाच ॥
तुष्टुवुर्जगतां पतिं ॥ २२ ॥ ब्रह्मण्येना दृता स्तेन सुख मृमु स्त्वयोपिते ॥ ब्रह्मन् कथय भद्रं ते किमागमन कारण
म् ॥ २३ ॥ एतावपि किमिच्छन्तौ धर्मराज मनूवद ॥ किमर्थकामाः संप्राप्ताः सर्वं वदन्तु सुव्रताः ॥ २४ ॥
ब्रह्मोवाच ॥ आदि सर्गे महादेव देवैः पूजितोऽसि शंकर ॥ विष्णु मुखै महाभक्तैः कथं तुष्यसि शाश्वत ॥ २५ ॥
त्वयोक्तं भ्रमयो देवाः शृणुध्वं ब्रह्मवादिनः ॥ यथा मे वेद मार्गेण गच्छतः पुरुषस्य हि ॥ २६ ॥ संतोषो जा
यते देवा न तथान्यैर्धनादिभिः ॥ वेदो नारायणः साक्षाद्धृदा ध्यायी सदा ह्यहम् ॥ २७ ॥ वेद मार्गे रता ये च
ते भक्ता ननु चापरे ॥ इदानीं मन्यसे त्वावा प्रवक्ता तद्वद प्रभो ॥ २८ ॥ वदंति काशीं प्रणमंति काशीं गच्छन्ति

काशीं तव राजधानीं पूजा तपस्नान परिक्रमैस्तु धर्मैर्नरायांति परं सदा शिवम् ॥ २९ ॥ वेदागमाचार परा नराये स्व
का॰ धर्म निष्ठाः परमार्थ युक्ताः ॥ वेदद्रुहः पाप परा परार्थ सहस्र युक्ता अपि ते विमुक्ताः ॥ ३० ॥ भवंति काशी स्तव नादि र॰
॥८२॥ भि र्नरा नारायणावा भगवन्न विद्महे ॥ श्रीभगवान उवाच ॥ ब्रह्मन्वदामि ते तत्वं अविमुक्तस्य दुर्लभम् ३१ यत्कृ
त्वापि विमुच्यंते नराः पातकिनोपिहि ॥ शृणु सृष्टि क्रमं विद्वन् येन
तत्वं प्रकाशते ॥ ३२ ॥ एक मेवाद्वितीयं तत् ब्रह्म सत्यं सनातनम् ॥ ततः पुरुष मायाख्याः पृथिव्यंताश्चकाशिरे ॥ ३३ ॥
माया कार्ये स्थिता येन् त्वदाद्याः स्थावरान्तिका ॥ माया मया भवंत्येव चित्त विक्षेप संयुताः ॥ ३४ ॥ महत्त्वम
ये पात्रे ब्रह्मशुद्धं सनातनम् ॥ माया प्रवेश रहित मविमुक्तं तदुच्यते ॥ ३५ ॥ न विमुक्तं स्वरूपं यन्महत्त्वे व्यव
स्थितम् ॥ तन्मया स्वीकृतं शुद्धं स्ववासाय महामते ॥ ३६ ॥ विष्णुना च विशुद्धेन विश्रामार्थं सदाऽनघ ॥ म
म लिंगानि सर्वाणि संकुराणि च सर्वतः ॥ ३७ ॥ आनंदादुदिता नीति आनंदवनमुच्यते ॥ काश्यां यत्पतितं वस्तु ॥
॥८२॥

तद्रूस्येव भवेथ्यथा ॥३८॥ सुराप्रवाहो गंगायां पतितस्तन्मयो भवेत् ॥ यथा लोहं स्पर्श मणौ पतितं कनकं भवे-
त् ॥३९॥ तथा काश्यां ब्रह्म रूपं प्राप्नुयाच्छिव रूपतां ॥ब्रह्मोवाच॥ एकं निरंशं यज्ज्योति स्तमसः परमुत्तमम् ॥
४०॥ कथं परिच्छेद परं जातं काश्यात्मकं शिवम् ॥ श्रीभगवान् उवाच ॥ यथा तेजो महाभूत रूपं ब्रह्मन् प्रकाश
कम् ॥४१॥ उपाधि रूपमासाद्य सूर्यदीपकयोरिव ॥ अधिष्ठानानुसारेण प्रकाशं कुरुते पुनः॥ हिरण्य गर्भ
60 जीवानां यथाभेदः पृथक् पृथक् ॥ ४२॥ एवं महन्मयं पात्र मविमुक्तं सनातनम्॥ तत्र ब्रह्म प्रकाशो हि न संदेह
द्वा॥ ना
स्पदो भवेत् ॥ ४३॥ कथं न तस्य स्मरणा द्वा जपा तत्पूजनात्त द्रुमत्त्वा द्वालयात् ॥ लीना भवेयुः परमात्म जीवा य
त्कारणं कार्य मपीहतद्धि ॥४४॥ पृथिवी पृथ्व्या मग्निरग्नौ यथा हि॥ वायुर्वाते, तोय तत्त्वं जले च॥ एवं शुद्धे कार
णे काशिरूपे॥ जीवोपाधिं दग्ध्वा जीवो विमुच्येत ॥४५॥ अथ ब्रह्मन् श्रृणु ष्वात्र वचो विगत कल्मषम् ॥ वेद
रक्षा करं शश्वल्लोक रक्षा करं महत् ॥ ४६॥ श्रृण्वन्तु ऋषयः सर्वे व्यवस्था क्रियतेऽधुना ॥ अथारभ्य म

१२

हाभागा ये स्मरिष्यंति काशिकाम् ॥ ४७॥ तेषां पापक्षयो भूयात् मोक्षबीजं भवत्युत ॥ तीर्थयात्रार्थिनो ये हि का

का॰ श्या मागत्य धार्मिकाः॥ ४८॥ अकृत्वा पापनिश्चयं पुनर्यांति बहिर्नराः ॥ ते पुनः काशिकां प्राप्य जितेन्द्रिय मनो र॰ १४

॥८३॥ गुणाः॥ ४९॥ भवंति शुद्धात्मन शुद्ध ब्रह्म स्वरूपिणः॥ स्मरणं कीर्तनं काश्या दर्शनं मोक्ष बीजकृत् ॥ ५०॥ का

श्यां मृतानां हि शिवं गतानां मुक्ता नवेति प्रविचारणीये ॥ नेत्र श्व काका जगरालुलुका महामलादाः प्रभवंति पा

पाः॥ ५१॥ काशीं प्राप्य संतकाले स्मरन्ति सर्वे जीवाः शाश्वतं विष्णु रूपं विस्मृत्या र्थान् स्थूल सूक्ष्मादि देहं ॥

गेहं च्यात्मा प्राप्यते तैः सुशुद्धैः ॥ ५२॥ मीमांसते ये मम वास भूमिं तेषां विचारो हृदया न्नयाति ॥ संदेह भाजाः

खलु दुःख भाजाः संदेही नाम श्र कुतः सुखं स्यात् ॥ ५३॥ ब्रह्माग्नि रूपा काशीयं दहे त्पापा नि सर्वशः ॥ दृष्ट्वा

स्पृष्ट्वा स्मृता वापि किं पुनर्धर्म वासिनाम् ॥ ५४॥ अहोरात्रं स्थित्वा भवति सुकृती पाप रहित स्त्रिरात्रं य

स्तिष्ठे त्स खलु सुख मोक्षैक निलयः ॥ निवासं ये कुर्यु र्विततमथ्यि कारा नु गणितम् ॥ नते धर्मात्मानः पुनर

॥८३॥

पि भवभ्रांतिषु मुज्जः ॥ ५५ ॥ सूत उवाच ॥ इत्युक्त्वा देव देवेशो ब्रह्माणं सयमं मनुं ॥ काशीं संप्रेषयामास संदेह
स्थापनत्तये ॥ ५६ ॥ तेन सुकृतं न शक्तास्तां लिंगं संस्थाप्य शांभवम् ॥ पुनर्गच्छन्ति स गमन माज्ञयापि शिवस्य
च ॥ ५७ ॥ प्रसंग तोऽपि गमनं प्रकुर्युर्व्यापारतः प्रेषणेनापि केचित् ॥ वध्वापि ये काशिकां संप्रणीता स्तेनाःकृता
र्थाः श्रुतिवाद स्वयः ॥ ५८ ॥ ये प्रयच्छन्ति मनुजा जीवादप्यधिकं धनम् ॥ जीवकोशः शलस्तेषां पुण्यराशिः
पदे पदे ॥ ५९ ॥ स्नानेन दानेन परिक्रमेण शिवार्चनेनापि सतोऽर्चनेन ॥ दिने दिने सा सुकृतस्य वृद्धिर्यस्यांज
नो वै सुकृती सदास्यात् ॥ ६० ॥ मनागपि विचारेण मनसो निग्रहो यदि ॥ अविमुक्ते भवेद्येषां ते मुक्ता भववं
धनात् ॥ ६१ ॥ हरिक्षेत्रमिदं विद्धि हरक्षेत्रं विचित्र कृत् ॥ भेद दृष्ट्यापि सततं सेवितं चेक्स्य कृद्भवेत् ॥ ६२ ॥ वस्तुस्व
भावान्नहि तत्र भेदः कृतोऽपि सिद्धेदिति निश्चयोऽयं ॥ भेदा द्वय द्रोह उतात्म वैरं दुखं त्वहंकार परं सदा भवेत् ॥ ६३
न क्रोधो न च मात्सर्यं न लोभः काशि वासिनाम् ॥ परं पदं प्रयातानां नावरे रमते मतिः ॥ ६४ ॥ इति श्री ब्रह्मवैवर्ते

का॰ तृतीय विभागे कल्प भेद भेदे काशी प्रादुर्भावो नाम चतुर्दशोऽध्यायः॥ अथ ऋषय ऊचुः॥पुनर्विनोदिनीं वाणीं यदसू रहः

॥८४॥ त महामते॥ त्वं देव देव भगवत्स्वरूपं वर्णयस्व नः॥१॥ ब्रह्मक्षेत्रस्य सुमहन्माहात्म्यं मान वर्जितम्॥ अनायासेन १४

निष्पापा स्तरन्ति हि यदा क्षयाः॥२॥ तस्य क्षेत्रस्य माहात्म्यं श्रोतु मिच्छाम सुव्रत॥ सूत उवाच॥ साधु द्विजमहा

भागा जानंति जना निष्कृतिम्॥३॥ यस्माद्दुःखद संसारान्न निस्तारः कथंचन॥ विना काशीं न पश्यामि बाधितार्थ

निषेविणाम्॥४॥ अथवा श्चर्य करीं काश्याः कथां कथयतो मम॥ मगधेषु द्विजः कश्चित् बहुज्ञो वादतत्प

रः॥५॥ जेता द्विजानां सर्वेषां द्विज जेतेति विश्रुतः॥ विद्या मत्तो गुरुं जीत्वा ब्राह्मणा नवमत्य च॥६॥ जाना

ति स्वं पुनः क्षुद्रः कृतकृत्य मचेतनः॥ कुतर्कैं श्छल न शब्दै श्च वेद सिद्धान्त निंदकः॥७॥ स्व युक्त्या नयते श्रौतं

स्मार्त कर्म पृथक् मतिः॥ स कदाचि द्विजवरं जित्वा वादैः पदाऽहनत्॥८॥ निर्विकारो महात्माऽसौ स्व सिद्धान्तप

रः सुखी॥ हतो देवेन किं चास्य क्रुद्धोऽयं द्वैत तत्परः॥९॥ भयं द्विती याद्भवति तदस्य समुपस्थितम्॥ गतेतस्मि ॥८४॥

न्महाभागे द्विजजेता जितं मया ॥१०॥ इति मेने तदारभ्य हृद्विजंति द्विजातयः ॥ कस्मिंश्चित्समये सार्थो सार्थि
तार्थः क्षुधार्दितः ॥११॥ बुभुजेऽन्नं बहु तदा विजितेन्द्रिय मानसः ॥ ज्वरार्तो व्याकुलतनुः स्मरन्वादान् ममार च
॥१२॥ ब्रह्म राक्षसतां प्राप्तो ब्रह्माभि भवदोषतः ॥ विभीत ब्रह्मो परि संस्थितिं सदा चकार विप्रभुगिति प्रसिद्धः ॥
१३॥ आहूय विप्रान्मधुरै र्वचोभिः प्रभक्षयत्येव दया विमुक्तः ॥ ततो द्विजः कश्चिदुपागतो चिरान्नेनैव मार्गेण
८ सतं ददर्शाह ॥१४॥ त्वं कुत्र गंताऽसि कुतः समागतो विद्यास्ति काचित्तव वादशक्तिः ॥ तच्छ्रुत्वा तस्य तद्वाक्यं प
थिकः संददर्शाह ॥१५॥ राक्षसं शास्त्र संपन्नं किमेतदिति चिंतयत् ॥ अहं भो भूत तीर्थार्थी कृत्वा तीर्था-
न्यनेकशः ॥१६॥ पुरुषोत्तम मासाद्य गंतुं काशीं तदाज्ञया ॥ प्रवृत्तोह कृतार्थः सन्न कृतार्थे र्न लभ्यते ॥१७॥
काशी विश्वेश्वरौ देवौ द्रष्टव्यौ पार्वतीशिवौ ॥ वस्तव्यञ्च सुखं तत्र कृतकृत्येन सर्वदा ॥१८॥ तीर्थानि कृ
त्वा काश्यां तु वसेन्नि र्व्याकुलः सदा ॥ ननु काश्याः प्रगन्तव्यं तीर्थान्यत्र वसंति यत् ॥१९॥ सूत उवाच ॥

१४

इति श्रुत्वा वचस्तस्य तमुवाच स राक्षसः॥ महा॰ पराधीनं पापं ब्रह्मद्रुह मसत्तमम्॥ २०॥ पंचकं चात्र परयोर्मामुद्धर
का॰ गुरुद्रुहम्॥ नय मां काशिकां कान्तां यत्रात्माऽर्द्धं विमोचितम्॥ २१॥ पथिक उवाच॥ राक्षसं त्वां कथं घोरं नेष्या ८
॥८५॥ मि भगवद्रूहम्॥ बिभेमि दृष्ट्वा दूरात्त्वां कथमैक्यं त्वया सह॥ २२॥ राक्षस उवाच॥ त्वया यदुक्तं वचनं तेन म १५
न्मानसं सकृत्॥ पश्चात्ताप परं ब्रह्मन्काशी काशीश्वराविति॥ २३॥ पथिक उवाच॥ योहि देवः सकृन्नाम्ना
त्वामुद्धरति शंकरः॥ स न रक्षति मां त्वत्तो राक्षसात् घोर दर्शनात्॥ २४॥ आगच्छ यावः काशीं भोः समानफ
लदायिनीम्॥ इति प्रचलितौ तौ तु ब्राह्मण ब्रह्मराक्षसौ॥ २५॥ गच्छन्मार्गे राक्षसं तं पप्रच्छ पथिको द्विजः
॥ कस्त्वं पूर्वं राक्षसेन्द्र कथ्य मेवं त्वदुद्भवः॥ २६॥ नृणां सप्तपदी मैत्री कथयाशु ततो मम॥ राक्षस उवा
च॥ मगधे बुद्धि द्विजोऽहं वै द्विज जेतेति विश्रुतः॥ २७॥ तत्र द्विजान्बहून्प्राप्तान्जित्वा गुरुमताउयम्॥ कुत
कैः कृत्रिमैर्विप्र स्वयमुत्प्रेक्षितैरलम्॥ २८॥ साभिमानः सुदुष्टात्मा धन लोभपरायणः॥ बहुभोजनकृन्नि-

॥८५॥

त्यं कस्मिं श्चिद्दिवसे ज्वरः ॥ २९॥ प्रविष्टः सवाकं मां मरणान्तः सुदारुणः ॥ प्रत्युत्थितेऽपि मरणे द्विजभंगमचिंतय
म् ॥ ३०॥ मत्वा राक्षसतां प्राप्तो विभीतक वनाश्रयः ॥ केनापि सुकृतेनत्वां दृष्टवानस्मि सुव्रत॥ ३१॥ त्वन्मु
खाच्छ्रांभवंनाम नामकाश्या अपि श्रुतम् ॥ काशी विश्वेश नामाभ्यां सत्संगे नच तारितः ॥३२॥ कथं तत्क्षेत्र
मध्येमां नेता सिद्धिं जयामि नम् ॥ पथिक उवाच ॥ एकेन रेणुना काश्यां शुध्यंति मलिना जनाः ॥ ३३॥ व
हुभिरेणुभिः स्नानं कारितव्योऽसि मेऽनघ ॥ शोणं समुत्तीर्य गतावुभौ तौ ददर्शतुः पाशुपतान् कुतश्चित् ॥३४
॥ तैः साकमासाद्य दिवो नदीं तौ ददर्शतुः शंकर राजकाननम् ॥ पथिकस्तत्र हि स्थाप्य विवेशानंद कान
नम् ॥ ३५॥ तत्र स्नात्वा शिवं दृष्ट्वा यथा शक्त्या प्रपूज्य च ॥ यां सुप्रक्रान्ति माश्रय पुनस्तत्सन्निधौ गतः
॥३६॥ सतं दृष्ट्वा जहर्षाशु तारितोऽस्मि त्वया वदन् ॥ पपात चरणौ पांते तारितोऽस्मि पुनः पुनः ॥ ३७॥ अ
थतं राक्षसं विप्रः स्नापयामास रेणुभिः ॥ शुद्धं प्रवेशयामास वाराणस्यां सतापसः ॥ ३८॥ तौ स्नात्वा मणिक

र्थान्तु दृष्ट्वा देव उमापतिम् ॥ कृतार्थो वसन्स्तत्र काशी शिव परायणो ॥ राक्षसेन शरीरेण दिव्यं देहमवाप्तवान् ॥ ३९॥
का॰ काश्यां स्थित्वा पापभीरुर्यतात्मा मिथ्यावादं लोकवादं न कुर्यात् ॥ पापाद्भीत्यापूर्ववृत्तेन तेन कर्मावद्धं काशिकानो र॰ १५
॥२६॥ सहेत ॥ ४०॥ देवब्राह्मणपूजकः प्रतिदिनं सच्छास्त्रसंचिंतकः दैन्याहारविवर्जकः प्रतिदिनं धन्यो धनासंचकः ॥ वा
र्तां नैव करोति शंभुरहितामेकांतशीलः सदा तीर्थान्यायतनानि काशि गहने यात्रादिने गच्छति ॥ ४१॥ अद्वैत परमा
नंदे क्षेत्रे वैश्वेश्वरे परे ॥ वसन्न द्वैतबुद्धिः संजातो ऽभेदमयो द्विजः ॥ ४२॥ सच्छास्त्र सज्जना संगः सद्बुद्धिः स
द्भ्यो सकृत ॥ सदाचारः पंचपूजन पंचत्वे नावसीदति ४३ इति निश्चित्या ऽविमुक्ते शुद्धो ऽशुद्धि विवर्जितः ॥–
अवाप काशीं कालेन निर्वाण जननीं द्विजः ॥ ४४॥ विद्या विद्योदयांतारि न विद्यावादकारिणी ॥ जेनं परं पदं विद्या
न विवादायके बलम् ॥ ४५॥ आत्मारामैरपि सदा कृतार्थैः शांत विग्रहैः ॥ सेव्यते काशिका देवैः सर्वावस्थ वि
धानिनी ॥४६॥ इति श्री ब्रह्मवैवर्ते तृतीय विभागे पंचदशो ऽध्यायः ॥ ऋषय ऊचुः ॥ नित्ययात्राविधानं च वक्तु १६ ॥२६॥

मर्हसि सत्तम ॥ यथा सेव कृतं पापं नित्यमेव प्रणश्यति ॥ १॥ अतुला पुण्य वृद्धिश्च जायते येन सुव्रत ॥ तथाव
द वदान्येश धर्मशास्त्र विशारद ॥ २॥ सूत उवाच ॥ इदमेव पुरा पृष्टः पार्वत्या परमेश्वरः ॥ सदुवाच महा
देवः श्रूयतां तद्वदामि वः ॥ ३ देव्युवाच ॥ भगवन् श्रोतुमिच्छामि जनानां काशिका स्थितिम् ॥ यथा निर्विघ्न
तां यांति दिवसाःसाधु सत्कृताः ४ दुर्लभा मानुषा लोके धर्म मार्ग रता नराः ॥ ततोऽपि दुर्लभा लोके काश्यां ये
भगवान् उवाच ॥
धर्मतः स्थिताः ॥ ५॥ प्रातःप्रातःसमुत्थाय ढुंढिराजं नमेत्पुनः ॥ भवानीं शंकरं पश्चात्काल भैरव मेवच ॥ ६॥
दण्ड पाणिं गणेशांश्च केशवादित्य चंडिकाः ॥ ततः शौचादिकं कृत्वा दन्त धावन पूर्वकम् ॥ ७॥ स्नानमुत्तरवा
हिन्यां श्रुत्यादिषु यथोदितम् ॥ ततः सन्ध्या तर्पणादि विधाय स्वाधिकारतः ॥ ८॥ विश्वेश्वरं स्मरन् गच्छे
त् पूजा साधन संयुतः ॥ आदौ देव्या मंडपं संप्रविश्य तत्र स्थित्वा पूजयेत् श्रीभवानीं ॥ ९॥ सांगोपांगमा
गमोक्तै र्विधानैः स्मृत्वा नत्वा प्रार्थयेदन्नदात्रीं ॥ ततो ढुंढिं गत्वा मधुरतर नैवेद्य विभवै रुपास्यः स्मृत्वा तं धि

विविध भय विघ्नाधिशमनम् ।। अयं नित्यः प्रोक्तो विधिरतुल सौख्यैक सुखदः ।। चतुर्थ्यां नो यस्य प्रभवति स किं सौख्य
का॰ निलयः ।।१०।। गच्छेत्ततो विश्वपतिं महामतिः प्रदक्षिणी कृत्य सुतार तीर्थेश ।। स्नात्वा ततो दंडपतिं प्रणम्य संपूज्य
१०-दृ०उपांगे निर्वाण गतं च पंचकम् ११ ततो विश्वेश्वरं नत्वा स्नापयेत् पंचकैः शुभैः ।। स्नापयेच्च ततो गांगैस्तोयै रुद्रपुरस्कृ
।।८७।। तैः १२ गन्धपुष्प प्रधूपैश्च दीपैर्नैवेद्यकैरपि ।। नाना विधै श्चोपचारै र्यथाविभव सत्कृतैः १३ पूजयित्वा महा
देवं काशीनाथं जगद्गुरुम् ।। प्रदक्षिणत्रयं कृत्वा प्रणमेद्दश पंचधा ।। १४ ।। जय विश्वेश्वर ।। विश्वाधार ।।
विश्वरूप ।। विष्णुप्रिय ।। वामदेव महादेव ।। देवाधिदेव - दिव्यरूप ।। दिनानाथैक शरणद ।। शरणागतव
ज्र पंजर ।। साधिताऽखिलकार्य ।। कार्यातीत कारणकारण ।। कामादि तृणदहन दानवांतकर ।। दारिता
खिल दारिद्र ।। जितेन्द्रियैक गम्य ।। काशीस्थ स्थावर जंगम निर्वाणदायक ।। त्रिदशानां काशिकाप्रिय ।।
नमस्ते नमस्ते नमस्ते ।। इत्यादिनामबहुलैः स्तोत्रैः स्तुत्वा पुनर्नमेत् ।। निर्वाण मंडपे स्थित्वा विष्णुं नत्वा पुनः पु ।।८७।।

नः ।। देवस्य दक्षिणे भागे साक्षान्मुक्तिः करे स्थिता ।। १५।। यदुच्यते तत्र शुभाशुभं वा नरैः समस्तार्तिं हरे सुमं
डपे ।। तदेव वृद्धिं सुतरां प्रयाति तस्मान्नतत्राति वदेद्धि कश्चित् ।। १६ ।। ये स्मरन्ति महाविष्णुं ये स्मरन्ति स
दा शिवम् ।। तएव तत्राधिकृताः न ये विकृत वादिनः ।। १७ ।। अन्यत्रापि वदन्ते किं जनाः सुकृत कारिणः ।।
किं पुनर्काशिका मध्ये अन्तर्गेहे ततोपि हि ।। १८।। ततोऽपि मंडपे देवि निर्वाण पद संज्ञके ।। इति देवं सम-
र्च्याथ गन्धैः पुष्पैः सुविश्रमेत् ।। १९ ।। विश्रामः सतां परमो विश्रामः शिव कीर्तनम् ।। विश्रामो लोभ हननं विश्रामः
पार्थ सारथिः २० संसार दावादहने पतितानां स्वकर्मभिः ।। काश्येव शरणं नान्यत् मुक्तानामपि पार्वति ।। २१ ।। का
श्यां तिष्ठामि सततं विश्वेशं पूजयाम्यहं ।। दिशामि तारकं नित्यं अविमुक्त प्रसादतः ।। २२ ।। अविमुक्तेश्वरं पूज्य
ब्रह्मनारायणादिभिः ।। फलं प्राप्तुं तदेवाद्यं सर्व सामर्थ्य लक्षणम् ।। २३ ।। नाविमुक्तं मया देवि विष्णुना ब्रह्मणात
था ।। इन्द्रचन्द्रादिभिर्देवैः ऋषिभिर्मुनिभिर्नृभिः २४ राक्षसाऽसुर नागैश्च गण गन्धर्व किन्नरैः ।। येन्येतनास्ते

७

का. र्नं त्यक्तमविमुक्तमथाप्यन्च ॥ २५ ॥ विचार्यते यैः सुविविक्तमन्त्रं शास्त्रं याजीवनमत्रलोके ॥ न गर्भवासादि सुखं ९.

च नश्वरं विनश्वरं देहयुगं च सत्वरम् ॥ २६ ॥ तेन त्यजन्ति मुनिवास निवासभूतां वाराणसीं विविधतीर्थनिषे १६

।८८।। वितां ताम् ॥ आनंद सुन्दर विवेकिनिषेवितां च तापत्रयार्तिं परिभूत निषेवितां च ॥ २७ ॥ न शास्त्रतो नाधि

गुरूपदेशतो न सन्मुखान्नापि भवाब्धि मज्जनात् ॥ ज्ञात्वा विमुक्ते प्रवसंत्यथापि येऽत्रापि स्फुटं ब्रह्मसुखस्य

भाजनम् ॥ २८ ॥ ज्ञात्वाऽज्ञात्वापि देवेशि योऽमतं परिसेवते ॥ तस्यान्तःकरं कार्यमविमुक्तं तथान्तणाम्

॥ २९ ॥ मा जानीह्यर्थवादत्वमात्मतत्त्व विनिर्णये ॥ आत्मा काशी तथाऽहं त्वं तथा देवो जनार्दनः ॥ ३० ॥

अनावृतं ज्ञानमेतदावृतं त्वन्यदुच्यते ॥ अनात्मनि रतिर्नैव भवेज्जीवे यथा मम ॥ ३१ ॥ अतो जीवांस्तास्य

ति स विमुक्तेश्वरः शिवः ॥ अविमुक्त शिवः सोऽहम् विमुक्तात्वमविवेके ॥ ३२ ॥ अविमुक्तं तथा क्षेत्रं क्षेत्रसन्यास

कृतथा ॥ अविमुक्ताः स्थावराश्च तथाऽन्ये तीर्थवासिनः ॥ ३३ ॥ परान्नं परवादश्च परदारा तथा धनम् ॥ ॥८८॥

अदानान्यार विद्वेषो भक्ष्यालस्यानुदैन्यता ॥ ३४ ॥ दश दोषा महादेवि वर्ज्याः काशिनिवासिभिः ॥ क्षेत्रे परानंद
मयेन कस्यचिद्दुःखं कदाचिद्भवतीति सत्यम् ॥ विक्षिप्तचित्ताद्भिषयातुराज्जनात्स्वयं कृताद्दुःखगणाद्दते परम् ॥
३५ ॥ चतुर्भुजं शंखगदाब्जहस्तं दृष्ट्वा हृषीकेशमनन्तमाद्यं ॥ व्यग्रं प्रपश्येत खलु राक्षसं पुरः प्रपश्यमानं
विषयचित्तवृत्त्या ॥ ३६ ॥ यश्चिंत्यते येन तथैव तस्य मनः प्रपश्यत्यपि तन्मयं जगत् ॥ अतो विहायाशु समस्त
चिंतितं मामीश्वरं चिंतयतां न दुःखम् ॥ ३७ ॥ देव्युवाच ॥ यात्राविधानं स्थितिकारणं परं श्रुतं मया शं
कर मुक्तिसाधनम् ॥ अतः परं मे तव शर्मभूमिं वदस्व काश्यां मम दीनबन्धो ॥ ३८ ॥ किमाश्चर्यं वसन्—
त्वयि गुरुगुरौ श्रीनिरथिका भवेल्लोके यस्याप्यतुलसुखसारं स लभते ॥ अहं त्वामाराध्य प्रचिलसदुमाकान्त
चरणं प्रपश्ये सर्वात्मन् प्रकट परमानन्दसदनम् ॥ ३९ ॥ ज्ञानं महामोहविमिश्रितेऽस्मिन्संसारमार्गः प्रबलो
भवेत्किम् ॥ संसारमार्गादपकृत्य सद्गुरुं त्वां प्रापयेच्छंकर मार्गमार्गम् ॥ ४० ॥ गुरुर्गिरीयान्परमोपदेशतो

१२

पस्तारयेदाश्रित मलवासिनम् ॥ शिष्ये गुरु स्त्वां यदि चेज्जगद्गुरुं संस्मृत्य वर्तेत्समियाज्जगद्गुरुम् ॥ ४१ ॥ काश्यां

का· स्थितानां देवेश साधनानि वद प्रभो ॥ निरंकुशानां पापानां न सुखाय कदाचन ॥ ४२ ॥ महादेव उवाच ॥ योगे १६

॥२९॥ श्वराणां धनतो विरक्त्या गुरूप सत्या परमार्थ दृष्ट्या ॥ असत्कथाऽसज्जन वर्जनाज्जपादास्तिक्य बुध्या

शिव नाम कीर्तनात् ॥ ४३ ॥ आहार शुद्ध्या मृदु भाषणेन शान्त्या सदाचार जपेन दानैः ॥ कामादि रोगादि वि

वर्जनेन क्रोधादि मात्सर्य मदादि वर्जनैः ॥ मानापमानादि विचार वर्जनैर्जनः परं देव मुमा सहायम् ॥ ४४

पश्यत्यपर्णोऽनुग्रह मेति शंकरात् काश्यां सुखं वा समवाप्नुया द्दरम् ॥ एतैर्विशिष्टैः खलु साधनैर्युता विश्वेश्व

रं प्राप्नुवते महान्तः ॥ ४५ ॥ ये पुत्रदारा गृहतादि सक्ताः पश्यन्ति नो पुरं ततः संप्रकाशम् ॥ पश्यंति ये केवलया

स्व संस्पया गुरुं गुरूणा मध्वियं शिवं गताः ॥ ४५ ॥ कंदादि मूल फल भक्षणया वनैर्हि कालं नयंति सुधियो-

मदनु व्रताये ॥ ते शुद्ध बुद्ध हृदयाः परमं पवित्रं ज्योतिर्भवंति परमं न तु लोलुपाढ्याः ॥ ४६ ॥ नभक्तिभाजो न

॥२९॥

च पुण्य भाजो" जितेन्द्रिया नैव तपोन योगः ।। नधर्मनिष्ठा नच दैन्यशान्ति येषां तु ते दैन्य भाजो मनुष्याः ।। ४७।। अहर्निशं
वित्त पराः प्रतारका" भवंति काश्यां यदि पापनिष्ठाः ।। सुसंगहीनैः खलु पापसंचयैः भवंति पैशाच्य सुदुःखभाजः ।।४८।।
त्रिविधोऽपि कृतो धर्मो महापातक नाशनः ।। अधर्मशाखा बहुला धर्मशाखा स्तथैव च ।। ४९।। वृक्षानुरूपं हि फलं
लौकिके वैदिके भवेत ।। अनन्त जन्म गहने संसारे दुःख सागरे ५० अनुभूयाऽपि दुःखानि पुनः पापे प्रवर्त्तयेत ।। जनः
67 कथं न दुःखी स्यात्पिशाच पदभोगभाक् ।। ५१।। क्षणे क्षणे महादेवि दुष्कृतं क्रियते नु यत ।। परिपाकोऽशुभस्तस्य वर्षा
णामयुतत्रयं ।। ५२।। यः काश्यां कुरुते पापं जनो मोह महान्वितः ।। आवयोः कालराजस्य दंडपाणे र्गणेशितुः ।। ५३।।
अपराधी दुराचारः कथं सिद्धि मवाप्नुयात ।। मयापि यत्र सततं कालराजाद्धि बिभ्यति ।। ५४।। स्थीयते सावधानेन का
श्यामानंद भोगिना ।। स्थानानुरूपा वृत्तिर्हि पुरुषस्य विराजते ।। ५५।। न संध्याग्निहोत्रशालायां क्रियते मलमोचनं ।। अ
नोरस्य मंदिरे सविमुक्ते मुमुक्षुभिः ।। ५६।। स्थातव्यं परया भक्त्या जितेन्द्रियमनोगुणैः ।। भयाच्च कुक्षा बलस्थापि

५८ भावात् पुनः पुनः स्वाद परोविचार्य ॥ ५७ ॥ करोति पापं न हि तस्य शांतिर् दुःखार्णवा दारुण ताडनानि ॥ वेदाज्ञया निश्चि ८
का० त बुद्धयोऽत्र मोक्षे यथा विश्वसिता भवंति ॥ ५८ ॥ तेनैव वेदेन निवारिताः कथं पापान्निवृत्ता न भवंत्यतद्विदः ॥ काश्यां १८
॥८०॥ यथा पाप कृतं महद्भयं काश्यां तथा पुण्य कृतं महत्सुखम् ॥ ५९ ॥ अतः सुखार्थी प्रयतेत धर्मतो जीवन्जनो याति
मतः परं पदम् ॥ कृते काश्यां ज्ञाननिष्ठा वसंति त्रेतायां ते यज्ञास्तत्र प्रधानाः पूजा दानं द्वापरे तु प्रकुर्वन् तीर्थेदानं
केवलं मोक्षहेतुः ॥ यथाशक्त्या दानमत्र प्रकुर्वन् शुद्धिं कुर्यान्मनसः सिद्धिरूपाम् ॥ ६१ ॥ प्रतिग्रहं पापहेतुं वदंति
वेदा दानं शुद्धिहेतुं कृतज्ञाः ॥ अतो न गृह्णंति महानुभावा धर्मार्थमप्याप्त सुखार्थमेव ॥ ६२ ॥ सीदत्कुटुंबैश्च
रितवृत्तैश्च स्वाहारमात्रं प्रतिगृह्यतेऽत्र ॥ वस्त्राद्यलंकार धनादि संग्रहान् क्षुभ्यंति कुप्यन्ति रमंति पापैः ॥ ६३ ॥
ततोऽधिकं धन धान्यादि किंचिन् न ग्राह्यमत्र प्रतिपत्तिहेतोः ॥ प्रतिग्रहोऽन्यत्र कृतो न शुध्यै पापाय काश्यां प्रभ
वेत् कथं न ॥ ६४ ॥ विप्रा यतन्ते यदधिकं विगृह्णन् किं क्षत्रियाद्याः परवित्तलोलुपाः ॥ अतः स्वधर्मान्न परप्रतिग्रहा ॥८०॥

॥ १

र्जीवेत काश्यां सकलो मुमुक्षुः ॥ ६५॥ श्रीब्रह्मवैवर्त्ते तृतीय विभागे स्थितिक्रमो नाम षोडशोऽध्यायः ॥ ऋषय ऊचुः ॥
अखंडलिंगमेकं किं काशीति परिगीयते ॥ पंचक्रोशात्मकं सूत स्त्रीनाम्ना प्रथितिं गतम् ॥१॥ तद्वदस्वानुपूर्वेण—
शिवयोश्चेष्टितं महत् ॥ त्वत्प्रसादान्महाभाग श्रुतार्था वयमास्महे ॥ सूत उवाच ॥२॥ शृण्वंतु ऋषयः सर्वे महद
द्भुतमादरात् ॥ शिवयोरेव संवादपूर्वकं कथयाम्यतं ॥३॥ हरिकेशवने गौरी रुद्रस्यांकगता सती ॥ पप्रच्छ ऋ
षिभिः पृष्टं तदेव सुमहात्मभिः ॥४॥ देव्युवाच ॥ भगवन् देवदेवेश प्रपन्नार्त्तिहराव्यय ॥ लिंगस्य नाम काशीति
कथं जातं दयानिधे ॥ पंचक्रोशात्मकस्यास्य आनंदसदनस्य हि ॥ काशीकथामृतरसं पिबतां किमलंभ—
वेत् ॥ श्रीभगवानुवाच ॥ शिवशक्त्यात्मकं लिंगं श्रुतिभिः परिपठ्यते ॥ योनिः शक्तिः शिवो लिंगं प्रकृतेः पुरुषस्य च
॥७॥ स्वरूपं प्रथितं वेदैः पुराणादिषु पार्वति ॥ शिवः परात्मा ब्रह्मेति शिवोऽनिर्हरिरित्यपि ॥८॥ परब्रह्मेति च तथा गी
यते वदुर्थर्विभिः ॥९॥ शक्तिर्मायेत्यविद्येति विद्येति बहुधोच्यते ॥१०॥ उमालक्ष्म्यादिभेदेन ब्रह्मरूपा सनातनी ॥

का० सदाशिवस्य या काचिच्छक्तिश्चैतन्यरूपिणी ॥ १० ॥ सैव काशीति संप्रोक्ता लिंगरूपाऽनपायनी ॥ केचित्काशीं वदन्त्ये

तामविमुक्तं तथापरे ॥ ११ ॥ पंचक्रोशात्मकं लिंगं रुद्रावासमथाऽपरे ॥ ब्रह्मावासं विष्णुवासं वाराणसी मथापरे ॥ १२ ॥ ८

॥ ९१ ॥ इत्यादिनामभिः प्रोक्तं वस्तुमेकं सनातनम् ॥ लिंगं सदाशिवं शुद्धं ब्रह्माख्यं पूर्णचिद्घनम् ॥ १३ ॥ कदाचिल्लिंगरूपेण शि

वेन परमात्मना ॥ शक्तिः पृथक्कृता शांता काशीति प्रथितिं गता ॥ १४ ॥ अधिष्ठात्री देवतात्वमिति क्षेत्रस्वरूपिणी ॥

भव त्वं सर्वभक्तानां महामोक्षप्रदायिनी ॥ १५ ॥ आरभ्य तद्दिनं देवि गंगाकेशवसन्निधौ ॥ अविमुक्तेश्वरं ध्याय

न् पश्चिमाभिमुखी स्थिता ॥ १६ ॥ पूजिता सा प्रयत्नेन काशीवासफलप्रदा ॥ द्वादश्यां प्रातरेवाद्यं काशीं यः पू

जयेत्सुधीः ॥ १७ ॥ तस्य पापेन रमते बुद्धिर्धर्मे प्रवर्तते ॥ चतुर्विधाश्च ये जीवा ये च देवादयः परे ॥ १८ ॥ ते सर्वे

मुक्तिमायांति काश्यां स्थावरजंगमाः ॥ देव्युवाच ॥ मूर्तिमत्याः काशिकायाः कोऽधिकारो महेश्वर ॥ १९ ॥ क्षेत्र

मूर्तिप्रभेदेन स्थितायाः किं प्रयोजनम् ॥ श्रीभगवानुवाच ॥ क्षेत्रेऽस्मिन्भयात्काशी मोचयेत्सर्वदेहिनः ॥ २० ॥ ॥ ९१ ॥

आधार भूता जीवानां आद्या प्रकृति रव्ययया ॥ मूर्तिरूपा चिन्स्वरूपा ऽविमुक्तेश्वर सेवया २१ पूर्णरूपा स्वमाहात्म्यं
स्वयमेव विचारयेत् ॥ एकदा देव देवेशि कलौ धर्म विवर्जिते ॥ २२ ॥ प्राणिनः पाप परमा धर्मवार्त्ता विवर्जि
ताः ॥ जाताविषाद दुःखार्ति भय शोक तृषा युताः ॥ २३ ॥ कामिनः क्रोध लोभादि मदमात्सर्य हिंसया ॥ समेता
परदारैश्च रमन्ते ऽधर्मलत्पराः ॥ २४ ॥ उपपातक संयुक्ताः पातकैश्च समन्विताः ॥ जातिभ्रष्टाः कर्मनष्टाः पाखंडाः पतिताश्श
७१ ठाः ॥ २५ ॥ लोलुपा वंचकुशाः काश्यां पापकर्तार एव च ॥ क्षेत्रेऽपि ये पापकृतो महान्तो बहिश्च ये पापकराः सदा नराः ॥
मुक्ता भवंत्येव कुटित्यनारतं जीवा महाज्ञानमये ऽविमुक्तिके ॥ २६ ॥ काश्यां पापं ये प्रकुर्वन्ति नित्यं नानाशास्त्रे वेदसं
घे प्रकुर्वन् ॥ निषिद्धम् ॥ तेऽपि शीघ्रं प्राप्नुवंत्येव शीघ्रं ज्ञात्वा देवा विश्वनाथं तमूचुः ॥ २७ ॥ देवा ऊचुः ॥ इयं का
शी देवी सकल पुरुषार्थैक जननी मुमुक्षून् धर्मिष्ठान् जितकरण देहान् सुमनसः ॥ महापापान् क्रूरान् गुरुनिगम
देवद्विजगम्याम् दुराचारानप्याशु गमयति पदं स्वात्म सदनम् ॥ २८ ॥ वेद शास्त्र विहितः शुभप्रदः प्राणिनां

८१
हितकारस्सनातनः ॥ मार्गस्थ सुधियां सुखप्रदो याति काशिदयया तवाज्ञया ॥ २९॥ ब्रह्मोवाच ॥ नियमः क्रियतां देव
का· सुभयत्रापि संमतः ॥ वेदमार्गस्य रक्षास्यात् यथा काश्यां शुभा गतिः ॥ ३०॥ महादेव उवाच ॥ कृतोऽपि देव नियमः र·
॥८२॥ पूर्वं मनवे च यमाय च ॥ नति छन्ति तदा देवाः प्रबले यंतु काशिका ॥ ३१॥ ममापीच्छा सुमहती वर्तते देवसत्तमाः ॥
काश्यां कृतानां पापानां प्रायश्चित्त विधिर्नहि ॥ ३२॥ तन्मयो भवति मानवः परं यत्करोति सुकृतं च दुष्कृतम् ॥
तोय [illegible] विंदु जलमध्य मध्यगस्तथा भवति लोकवैदिकम् ॥ ३३॥ सूत उवाच ॥ इत्युक्त्वा शंकरो देवान् का
शीमाहूय यत्प्रभुः ॥ प्रतीत्यर्थं नु लोकाना मुवाच कथयामि तत् ॥ ३४॥ श्रीभगवान् उवाच ॥ हरिकाशि महाभागे
सर्वलोकहितप्रदे ॥ महालिंगैकनिलये योनिरूपे परात्मिके ॥ ३५॥ सूत उवाच ॥ इत्याहूय काशिका शंकरेण शु
द्धां मूर्तिं विभ्रती शुभ्रवस्त्रा ॥ आगत्याथो देवमभ्यर्च्य किंचिल्लज्जावक्त्रा पार्वतीशं ननाम ॥ ३६॥ भगवानु
वाच ॥ ब्रूहि देवी म्लानवक्त्रा दीना लज्जासमन्विता ॥ निरुत्साहा निरानंदा महानंददायिनी ॥ ३७॥ काश्युवा ॥८२॥

च ॥ मम प्रतिज्ञा देवेश गन्तुमिच्छति सत्वरम् ॥ तेनाहं दुःखिता शंभो म्लाना दीना सलज्जिता ॥३८॥ श्रीभगवा,
न् उवाच ॥ कात्ते प्रतिज्ञा चिच्छक्ते केन वा प्रविहिंसिता ॥ कथं यातिष्ठति वद क्रियते तन्मयाधुना ॥ ३९ ॥ काश्यु
वाच ॥ प्रतिज्ञा मम देवेश स्थावरा जंगमाजनाः ॥ तारणीयाः सर्वतो मे सा गच्छति कलौ शुभा ॥ ४० ॥ तत्रापि मनु
जा देव धर्माधर्माधिकारिणः ॥ न मन्ये विविधा जीवाः पूर्वकर्मोपजीविनः ॥ ४१ ॥ परदाररताः केचित्केचिद्द्रव्यपरा
40 यणाः ॥ परापवाद पैशून्य परद्रोहरताः खलाः ॥ ४२ ॥ केचिद्गोवध कर्त्तारः केचिन्मद्यपरायणाः ॥ केचित्पाखंड
कुशला वंचकाः संचकाः परे ॥ ४३ ॥ तीर्थद्रोहकरा लिंगविष्णुब्राह्मण चिद्रुवाम् ॥ द्रोहिणो निवसन्त्येव द्वापरांते
कलौ तथा ॥ ४४ ॥ अन्यान्यपि च पापानि बहूनि सुमहान्त्यपि ॥ कुर्वन्त्येव नराः सर्वे मय्येव च विशेषतः ॥ ४५
अथ यावत्तारिता स्ते प्रतिज्ञा रक्षणाय मे ॥ अतः परं त्वच्छरणं गतास्मि शिव सुव्रत ॥४६॥ त्वया देवैश्च ऋषिभिः सेव्य
यते सावधानतः ॥ उच्छृंखला मनुष्या मां प्रदहंत्यघ कृतैः परैः ॥ ४७ ॥ मेरु मंदर तुल्यानि पापानि विविधानि च ॥

गतानि मद्दर्शनतः स्थूलसूक्ष्म विभागशः ॥ ४८ ॥ मोक्षं यस्तु प्रयच्छेल भोगं यस्तु प्रयच्छति । जीवन्मुक्ति पदं चात्र ९

का० सकिंद्रो सो महात्मभिः ॥ ४९ ॥ पठंति शृण्वंति वदन्ति धर्मं तथापि पापं न परित्यजन्ति ॥ अन्ये वराकाः खलु पाप रूपाः तत् १५

॥९३॥ कथं विशुद्धं पदमाप्नुवन्ति ॥ ५० ॥ तवाग्रे देव देवेश स्वाधिकारण मध्यमे ॥ निरूपितं प्रतिज्ञा मे यथा तिष्ठति मे कुरु ॥ ५१

श्रीभगवान् उवाच ॥ प्रतिज्ञामवचि च्छन्ने देवैः संस्थापिताऽधुना ॥ ५२ ॥ वेदमार्गश्च सुभगे नैवाधिदहनः कृतः ॥

काश्युवाच ॥ कथं प्रतिज्ञा मे देवै स्त्वया च प्रति रक्षिता ॥ कृतः कथं वेद मार्गः सफलः साधितोऽखिला ॥ ५३ ॥ श्रीभगवान्

उवाच ॥ यत्त्वया प्रार्थितं काशि तद्दे वैः ऋषिभिस्सह ॥ प्रार्थितं धर्मनिष्ठैश्च मनुष्यैः शिष्टसम्मतैः ॥ ५४ ॥ पश्य वेद

व्यतिकरं, धर्मः सर्वैर्निराकृतः ॥ स्नान शुद्धिर्नातः शुद्धिर्योनि शुद्धिर्न शुद्धि वाक् ॥ ५५ ॥ जनानां दृश्यते काचिच्छु

द्धिर्वेद विधिस्थिता ॥ एषां नियति रस्माभिः स्थापिता यद्दिनावधि ॥ ५६ ॥ तां निशामय धर्मज्ञे धर्ममार्ग प्रवर्ति

के ॥ पूर्वजन्म कृतैः पापैर्महापातक संयुतैः ॥ ५७ ॥ मुच्यते काशि मरणा ज्जनो बहि रुपार्जितैः ॥ बहिः कृतानां पापा ॥९३॥

नामिदमेव महत्तरम् ॥ ५८ ॥ प्रायश्चित्तं काशिकायां मरणं वासस्तत्र च ॥ महात्मभिः काशिकायां देवर्षि मनुजाधि

पैः ॥ ५९ ॥ शरीर पोषणं धर्मो जपो दानं तपः कृतम् ॥ काश्यां स्थित्वा पातकं ये प्रकुर्युस्तेषां वृद्धिमायाति नित्यम् ६०

ये वै पुण्यं साधु कुर्वन्ति नित्यं तेषां पुण्यं वर्द्धते ज्ञान कारि ॥ पुण्यत्वात्काशिके काशिकां त्वां प्राप्ताः प्राप्तास्ते नु न द्वस्तु

नित्यम् ॥ ६१ ॥ पापं कृत्वा क्षेत्र मध्ये मतायै तेषां मुक्ति पातनान्ते भवेद्धि ॥ धर्मः काश्यां शुद्धि हेतुः प्रदिष्टः पा

पं पुनर्मलदुःखाधि मूलम् ॥ तस्मात्प्रतिज्ञा तव सिद्धि दूषा मुक्तिर्भवत्येव मलावसाने ॥ यथा सुलो हस्य सुद

र्पणाश्चिरं त्व संस्कृतो बद्धमूलो न शुद्ध्यति ॥ ६३ ॥ तथा मनुष्ये रस कृत्कृतं त्वथं न याति नाशं खलु काशिवासि

नाम् ॥ यथा सुखार्थं वितनोति काश्यां तेनास्य दुःखं दृढता मुपैति ॥ ६४ ॥ यदुःख मंगी कृतमिन्द्रियार्थं संकोचि

तस्तेन भवेन्मतिः ॥ अतो महांतः सुखलेश हेतो महत्सुखं काशिजं किं त्यजन्ति ॥ ६५ ॥ येविद्यमानेन्द्रिय भोगसा

धनम् ॥ त्यजन्ति गच्छन्ति सदा विमुक्तम् ॥ अतोऽति धन्या जनता विमुक्ते ये भजंत्यपो विश्व पतिं सदाप्तम् ॥ ६६ ॥

भजंति ये देह गेहेन्द्रियार्थमत्याय मत्यं परमल्पबुध्या ॥ तेतद्वदार्त्ताःसुख मोक्षहीना भजंति दुःखार्णव मात्मदीनाः ८
का० ॥ ६७ ॥ कामक्रोध परायणाःप्रतिदिनं लोभैक निष्ठा श्च ये॥हाहाकार विकारयुक्त मनसो दृष्ट्वा कलिर्हृष्यति ॥ येतु
॥ ९४ ॥ प्रत्यहमर्चयन्ति विभवैः श्रीविश्वनाथंपतिं कालः कालमलांकलिस्तु विशयान्तान्विमुंचते तान् पुनः ॥ ६८ ॥ ऋ
षय ऊचुः ॥ काश्यां कलेःप्रवेशो न भवत्येत च्छ्रुतं मुहुः ॥ अविमुक्त स्थितान् जन्तून् बाधते स कलिः कथम् ॥ ६९ ॥
सूत उवाच ॥ साक्षात्कलेः प्रवेशोऽत्र विद्यते न कदाचन ॥ वासना प्राणिनां पूर्वा विशत्येव तु तैः सह ॥ ७० ॥ शु
भामनः प्रवृत्तिस्तु सत्यमित्या सुरासतः ॥ अशुभा मनसो वृत्तिः कलिः साधुविगर्हितः ॥ ७१ ॥ पीडयन्त्र जनान
त्र कलि र्विशति मूर्तिमान् ॥ तस्यतस्याशुभाबुद्धिः कलिरित्युच्यते नृभिः ॥ ७२ ॥ युगानि मृत्युः कालश्च य
मोद्भूताः सुदारुणाः ॥ विश्वेशं दुःखु मायांति न तु विघ्नं प्रकुर्वते ॥ ७३ ॥ एतेषां शुभदान्यत्र संति लिंगानि सर्वतः ॥
नत्वयुग कृते धर्मैर्मुच्यन्ते सकृदर्च्चितैः ॥ ७४ ॥ कलि कालेश्वरं दृष्ट्वा चन्द्रेश्वर समीपतः ॥ कलिदोषैर्नरो ॥ ९४ ॥

जानन्नानु मुञ्चेत कर्हिचित् ॥७५॥ बहिष्कलिर्वास कृतः संभ्रमोद्भ्रमतोऽपि हि ॥ उपसर्गे समानोऽयं सति काश्यां सु

दुःखभृत् ॥ ७६॥ पूर्वजन्म सहस्रैर्यो अनुभूतः कलिर्बहिः ॥ न ह्यासना हृङ्कृतात्र कथं याति महर्षयः ॥ ७७॥ दृश्यंते

चात्र, पापानि लोकाः सम्यक्प्र कुर्वते, ॥ कलत्रमथ मांसानि, भक्षयन्ति नराधमाः ॥ परदार परद्रव्य परद्रोह परायणाः ॥

भवंति बहवः काश्यां महापातक कारिणः ॥ ७८॥ ते कथं यातना मध्यान्नि स्तीर्णा स्युः प्रमादिनः ॥ काल राज भयं का

श्यां, पापि नां नु बहिः कले: ॥ ८०॥ इक्षुकामः सुवर्णस्य हननं दुःखदं न हि ॥ क्षेत्रे विमुक्ते स विमुक्तमीश्वरं ॥ भजंति

ये संस्थित मात्म जीवनम् ॥ ते ते विमुक्ताः परमार्थ युक्ताः परस्य तत्त्वस्य पदं भवंति ॥ ८१॥ वाराणसीं प्राप्य सुदुर्लभां सु

रै ॥ रपीष्ट देवं जगतः पितामहम् ॥ नित्यं न पश्यन्ति सुदुर्धियो नरा ॥ व्यग्राः कलि ग्रस्त धियो भवंति ॥ ८२॥ विश्वेश्व

राराधन तत्पराणां ॥ विश्वेश्वर स्तत्परतामुपैति ॥ यो विश्वमासार्थ मिहाप्यमुत्र ॥ कृतार्थ भावं नयते कृतार्थान्

॥८३॥ इति श्री ब्रह्मवैवर्त्ते विश्वेश्वर काशि संवादे सप्तदशोऽध्यायः ॥ १७॥ ऋषय ऊचुः ॥ भगवद्वाक्य

२४

माकर्ण्य काशिका तापनाशिका ॥ किं किमुक्तवती देवं शंकरं लोक शंकरम् ॥ १॥ सूत उवाच ॥ इति श्रुत्वा देवमुखा ९८

का॰ त्पुनः काशी व्याजिज्ञपत् ॥ तच्छ्रू यतां महाभागाः कान्नू (महत्) दुःखं हितम् ॥ २॥ काश्युवाच ॥ पापि नां गुरुभारेण पीडिता र॰

॥८५॥ ऽस्मि जगद्गुरो ॥ तेन पाप कृतं भारं सोढुं शक्ता न शंकर ॥३॥ श्री भगवान् उवाच ॥ पापि नां दुर्लभो वासः सर्वदानंद

दायिनि ॥ मरणं दुर्लभं तेषां, त्वयि मृत्वापि यातनाः ॥ ४॥ प्राप्नुवंत्येव ते पापाः कालराज कृताकृताः ॥ कलौ नका

शी वसतिः स्थिरा भवेत् पापात्मनां दंडपाणि प्रभावात् ॥ ५॥ ममाज्ञया दंडनाथः शुभात्मा सुद्वास यित्यत्यथ पाप

कर्तॄन् ॥ वासं काश्यां दुर्लभं प्राप्य मूढा दुर्व्यापारान् कुर्वते साधु निंद्यान् ॥ ६॥ तैस्तै र्व्यग्रा स्त्वां न जानंति मांच

विन्न ग्राह ग्रस्त चित्ताः पतंति ॥ तीव्रै र्व्रतै र्दान तपोभि रुग्रै र्यज्ञैः समस्तै र्मम भक्ति योगैः ॥ ७॥ आराध्य मामा

त्मतया परेशं संप्राप्नुवंते मम काशिवासम् ॥ निस्तीर्णास्ते सर्व धर्मैः कृतार्थाः काशीं प्राप्य स्वानुभूतिं लभन्ते ॥

च ॥ कृत्वापी (त्थं) चक्षुं पुण्य सारं समंतात् भूयः काश्यां पापकृ दुःख भाक् स्यात् ॥ भवंति शांता नतु चित्त वृत्तयः क्व ॥८५॥

ष्टा पराणां तु सुखं मनोरमम् ॥ ९॥ तस्माद संसर्ग (सत् संग) विवर्जनैः परं स्यात्तव्य मानंद वने बलीयसा ॥ असत्संगा
गमः काशि पापादपि सुदारुणः ॥ पापं भोगात्क्षय यायेत पापाःपाप विवर्द्धनाः ॥ १०॥ काश्युवाच ॥ केते संतोम
हादेव तवानुग्रह थानकाः ॥ काशीं प्राप्याप्य सद्वृत्ता जायंते यत्समागमात् ॥ ११॥ श्रीभगवान् उवाच ॥ स्वदेषु
दारेषु धनेषु सक्ताः पुत्रेषु, धर्मेषु परं विरक्ताः ॥ दुर्भोग दौर्भाग्य जनेषु रक्ता अवैदिके ष्वेव नितांत भक्ताः ॥ १२॥ संगः
सदा स्याद्यदि तेषु काशि किं किं न कुर्वन्ति नराधमा भुवि ॥ अतोऽसतो वर्जनमात्रतो नरा भजंति मामेव शिवेति तत्प
राः ॥ १३॥ असत्संगान्नूनं भवति विविधं दुःखमुचितम् ॥ विचारो सदाचार प्रभृतिभिरपो याति विलयम् १४ अतः पुण्यास्त
तो यिविधा विकृति स्थान मखिलम् ॥ विहायास्यां कामं शिव सदनमेकांत सदनाः ॥ १५॥ असत्संगात्प्रत्यहं पाप
राशिर्वि चीयते सज्जनस्तं क्षिणोति ॥ अतः संतः सावधानेन सेव्याः सद्भिर्दीनो दुःखभारं जहाति ॥ १६॥ नीचा
नामपि देवेशि श्रद्धा शास्त्रे गुरौ दृढा ॥ जायते पूर्व सुकृतै, र्नेन्नमानां हि पापतः ॥ १७॥ इदमेव भवि ष्यं मे विदि

२५

का० तं पूर्वमेवहि ॥ निर्विस्मया गणिकया संवादोऽभ्रेतयाकृत ॥ १८ ॥ त्वयोपदिष्टा पश्चात्तु कथयस्व विशेषतः ॥ काश्यु र०
वाच ॥ १९ ॥ अहो अत्यद्भुतमिदं वेश्यावैराग्य संयुता ॥ कथं ममानया वादो भविष्यति दयानिधे ॥ २० ॥ कदाकु
॥१८६॥ त्र च को वादः किं प्राप्तं तया शिव ॥ किमाहारा किमाचारा कथं निर्वेदमापसा ॥ २१ ॥ श्रीभगवान् उवाच ॥ विदर्भ
नगरे काचिद्वेश्या सज्जन दर्शनात् ॥ विवेकं प्राप्य निर्वेदात्प्राप्ता वाराणसीं पुरीं ॥ २२ ॥ काश्युवाच ॥ कथं श्रद्धासु
महती तस्याः परमपूरुष ॥ एकेन श्रवणेनाशु जाता निर्वाण दायिनी ॥ २३ ॥ श्रीभगवान् उवाच ॥ विदर्भ नगरे राजा
वीरसेन इति इति स्मृतः ॥ वासुदेवैकभक्तोऽसौ मंत्रिणश्च तथाविधाः ॥ २४ ॥ पुरोहिता मात्यभृत्याः सर्वे विष्णुपराय
णाः ॥ नगरस्थो जनो भक्तो यथा राजा तथा प्रजाः ॥ २५ ॥ इत्येवं वीरसेनस्य राज्ञो नीचा अपि धार्मिकाः ॥ पुराण श्रवणे
सक्ता अनुरक्ताः स्वकर्मणि ॥ २६ ॥ प्रजाः सदाचार परा विष्णुव्रत शिवव्रताः ॥ एकदा वीरसेनस्य विचारः समजाय
त ॥ २७ ॥ अधिष्ठानं भगवतो विष्णोः कुत्र पुरीं वहि ॥ यत्र साक्षात्क्रियेताशु पामरैरपि केशवः ॥ २८ ॥ कश्यपः
॥२६॥

~~उवाच~~ ॥ प्रार्थिताः प्रोचुर्यथा नत्वं महाधियः ॥ वीरसेन महाप्राज्ञ शृणु विष्णुपरायण ॥२९॥ अधिष्ठानं भगवतो विष्णोः
कुत्र ~~पुरीषु हि~~ पुरीषु संस्थितो विष्णुरंशैः काश्यां स्वरूपतः ॥ काशी स्वरूपं विष्णोस्तु यत्र साक्षात् प्रकाशते ॥३०॥ अ
न्या सुरमते देवो भक्तानुग्रहकातरः ॥ काश्यां वसंति ये लोका द्विभुजास्ते चतुर्भुजाः ॥३१॥ भगवद्विग्रहाः शान्ताः स
र्वे पाप पराङ्मुखाः ॥ अधिष्ठानं महत्तत्र विष्णोः परं परंजय ॥ ३२॥ ऋषि वाक्यं विदर्भस्य राज्ञा लोकैश्च सालि
74 कैः ॥ श्रुत्वा काशीं विष्णुरूपां ममन्यत महायशाः ॥ ३३॥ काचिद्वेश्या विदर्भस्य श्रुत्वा माहात्म्यमुत्तमम् ॥ काशिका
याः कामकलाधिकृत्यात्मानमातुरा ॥ ३४॥ उवाच वचनं चारु श्रुत्वा संसार विक्रियाम् ॥ अहो मया मानुषस्य च-
देहं प्राप्य न तत्कृतम् ॥ ३५॥ येन मुच्येत्महापापात्संसाराख्याद्दुरासदात् ॥ कथं काशीं प्रयाम्यथ कथं द्रक्ष्या-
मि केशवम् ॥ ३६॥ उदग्वरां कथं स्वास्ये सधमा पापजीवरा ॥ केशवस्थानमासाद्य करिष्ये गानमुत्तमम्
॥ ३७॥ नृत्याद्दिनाल वंशादि दर्शयिष्ये शुभाः कलाः ॥ किं मया पापरूपिण्या कृतं विभोषितं मुहुः ॥ ३८॥ यदं

गं सं प्रसार्याशु धनं सर्वत्र कांक्षितम् ॥ धिक्कान्ये जगदुच्छिष्टं मांभजंति नराधमाः ॥ ३९ ॥ मां च धिक् पापपुरुषं नैभजा

का म्यविजितेन्द्रियान् ॥ अहो केशवमायायाः प्रभावः परमाद्भुतः ॥ ४० ॥ नरके सुखबुद्धिर्या परिहर्तुं न शक्यते ॥ अन्तर्मला र. १८

॥ ९७ ॥ दि संपूर्णं त्वगस्थ्यादि युतं बहिः ॥ ४१ ॥ शरीरं कृमि केशादि पूय दुर्गन्धि भाजनम् ॥ अयमेव परो भोगो नरकस्याद्भु

तः खलु ॥ ४२ ॥ देहं संयोज्य देहेन भोगबुद्धिः क्रियेत यत् ॥ अहो सत्संग माहात्म्यं पश्यता घविनाशनम् ॥ ४३

यत्समागमतः काशी स्मृता पापविनाशिनी ॥ बहिः कृतानि पापानि पूर्वजन्म कृतान्यपि ॥ ४४ ॥ काशी दर्शनमात्रे

ण नाशमेष्यंति नान्यथा ॥ तत्र गत्वा न पापानि करिष्यामि कथंचन ॥ ४५ ॥ विषयान् सर्वतस्त्यक्त्वा शोधयिष्येऽ

गमात्मनः ॥ पापं विषय संसर्गाज्जायते[1] वश्यमेव हि ॥ ४६ ॥ तांश्चेत्त्यजति खिन्नात्मा कुतः पापं कुतोऽसुखम् ॥ अ

द्यैव जननं काशीं गमिष्ये केशवप्रियाम् ॥ ४७ ॥ इत्युक्त्वा स्वयमेवाशु गमनाय कृता श्रमा ॥ प्रस्थान दिवसं ज्ञात्वा

ब्राह्मणैर्यन्निरूपितम् ॥ ४८ ॥ धनं विभज्य किंचित्तु गृहीत्वा नियमान्विता ॥ दास दासी समायुता प्रतस्थे केश ॥ ९७ ॥

१ पाठान्तर — "खिन्नात्मा" — "विश्वात्मा"

वं स्मरन् ॥ ४९॥ जय केशव देवेश जय काशीप्रियाच्युत ॥ काशीं प्रापय सर्वेश देहि वासं जनार्दन ॥ ५०॥ इ-
तिश्लोकं जपन् वेश्या विदर्भनगराच्छुभात् ॥ दिनैः कतिपयैश्शीघ्रं काशीं प्राप महाफलाम् ॥५१॥ पदे पदे पा
पमलस्तस्याः क्षीणो भवत्यलम् ॥ दृष्ट्वायां काशिकायां च गतः सर्वः सवासनः ॥५२॥ आगत्य मणिकर्ण्यां तु स्ना
28 त्वा दत्त्वा धनं बहु ॥ वपनं कारयित्वा तु स्थिता शुद्धा पयोव्रता ॥५३॥ भागीरथ्याः परिसरे स्थिता केशवतत्प
रा ॥ जय केशव देवेश जय काशीप्रियाच्युत ॥५४॥ काश्यां रक्षस्व देवेश देहि स्वाद्यां जनार्दन ॥ मंत्रेणा
नेन देवेशं प्रार्थयत् प्रत्यहं तु सा ॥ ५५॥ स्थूलवस्त्र इत्यादीना सर्वभोगविवर्जिता ॥ तरुणी रमणीयांगी रम
ते केशवे सदा ॥ ५६॥ दोषान्ददर्श भक्ष्याणां जीवहिंसादि संभवान् ॥ चंक्रमेष्वपि हिंसा स्यात्तस्मादेकत्र संस्थि
ता ॥५७॥ गंगातीरे सुरमणे रमयन्ती स्वमात्मना ॥ कदाचिद्रोदति पुनः कदाचिद्धसति स्फुटम् ॥ ५८॥ कदाचि
न्नृत्यति च सा कदाचिद्धासखेलति च ॥ क्वचिज्जनं प्रणमति क्वचिद्दूरे स्थिता जनात् ॥ विचारयति चात्मानं देवं

२१

कां० पतित पावनम् ॥ ५९॥ कामकलोवाच ॥ अहो महालिंग मयं जनार्दनम् ॥ पश्यामि काश्यां परमात्मरूपम् ॥ अनाहतं बीज

न पंचकात्मकम् विस्तारि गव्यूति युगं तु सार्द्धम् ॥ ६०॥ स्थूलं पतिं प्राप्य रमेमहर्निशं॥ सुपौरुषं वीर्य सुधीर्य मुक्तिदम्॥ ९०

॥८८॥ वेश्यापियं सेवमाना सती स्यात्तमात्मतंत्रं प्रभजे काशिनाथम् ॥ ६१॥ शुभाननः शांत वपुः सनातनो॥ रति प्रियो धन्यक

रः सुपावनः ॥ कुरूप दुर्भाग्य दरिद्र दारणः॥ सदा दयावान पराध खंडनः ॥ ६२॥ अहो कदर्पेण महाप्य मूर्तिना देहेन देवः

खलु काशिकायाम् ॥ भर्त्ता मया सर्वपतिर्जनार्दनः प्राप्तः स्ववश्यो विषयात्म नान ॥ ६३॥ अहो नु लोकः परिपूर्ण शो

कः॥ कथं न काश्यां रमते न पातकम् ॥ स्वानंद पूर्णं परिपूर्ण कामं॥ स्वानन्ददं देव देवैरुपास्यम् ॥ ६४॥ पश्यामि सर्व

त्र जनार्दनं पतिं॥ काशीश्वरं देववरैरुपास्यम् ॥ चित्तं सदानन्द मये निमग्नं॥ बहिर्न यात्यं अन्यत्न मोन रोचते ॥ ६५॥

सूत उवाच॥ इति निश्चित्य गंगाया स्तीरे तीरे विलासिनी ॥ विलसद्भ्रमणे नत्वा चिदानंद स्वरूपिणी ॥ ६६॥ पंचक्रोशात्मकं लिं

गमेक मेवानु पश्यति ॥ विचचार महासत्वा जितेन्द्रियमनो गुणा ॥ काचित्तपस्विनी काश्यां सुरसा ब्राह्मणी कृशा ॥

॥८८॥

१ पाठान्तर— "गच्छामि" - "इच्छामि"

पप्रच्छ वेश्यां सुभगां कौतूहल समन्विताम् ॥ ६८॥ सुरसा उवाच ॥ कात्वं वरोरू किंनाम तव देशः क उद्भवा ॥ जात्या
कास्थि स्थिता काश्यां निर्वेद रस संयुता ॥ ६९॥ कामकलोवाच ॥ अहं वेश्या कामकला विदर्भ नगरे स्थिता ॥ खिन्ना
निर्वेदमासाद्य काशीं गच्छामि[१] दीनवत् ॥ ७०॥ सुरसोवाच ॥ तव निर्वेद मूलं किमाश्चर्यं भाति मे न चे ॥ वयोरूपं तथा शीलं
धनामेवं सुदुर्लभम् ॥ कामकलोवाच ॥ वीरसेनो महाराजा विदर्भ नगरे ऽधुना ॥ वर्तते धार्मिको विष्णु भक्तः सत्कीर्ति
७८ कुत्रचित् ॥ ७१॥ तस्यैकदा विचारोभूदृषिभि स्तत्व दर्शिभिः ॥ कुत्र श्रीभगवान् विष्णु ~~परमात्मा सनातनः~~ ॥ लभ्यते
शीघ्रमेव हि ॥ ७२॥ निरूपितं तु ऋषिभिः काश्यां केशव मूर्तिधृक् ॥ वर्तते भगवान्विष्णुः परमात्मा सनातनः ॥ ७३॥
अतीव सुलभः साक्षात्कर्तुं शक्यो जितेन्द्रियैः ॥ महोप पातकानां च नाशनः स्मृति मात्रतः ॥ ७४॥ इति श्रुत्वा ह्यमा-
त्मानं धिक्कृत्य सुविचार्य च ॥ तत्र गत्वा ह्यम व्यग्रा रमे तेन दयावता ॥ ७५॥ विचार्यैवं मनसि च श्रुत्वा वाक्यं द्विज
न्मनां ॥ आगता केशवं द्रष्टुं पतिं पतित पावनम् ॥ ७६॥ सुरसोवाच ॥ लक्ष्मी पति स्तव पतिः कथं भवति सत्तमे ॥

१ पाठान्तर– "रूपं" – "लिंगं"

वेश्या जगत्पतिः पापा महान्कुत्सितकर्मकृत् ॥७७॥ कामकलोवाच ॥ वेश्यावश्यं पापरूपा सदाहं लक्ष्मीकान्तः पापसंघौघ
हारी ॥ त्यक्त्वा पापं दीनबन्धुः सुसेव्यो येनद्भक्त्या स्नानवश्यं भजेश्च ॥ ७८॥ सुरसोवाच ॥ कथमाहार यात्राते भविश्री
पापवर्जिता ॥ जीवाः सर्वत्र वर्तन्ते त्वं न यज्ञाधिकारिणी ॥ ७९॥ कामकलोवाच ॥ पयःपानं कदाचिद्धि करिष्यामि सुलो
चने ॥ पंचयज्ञाधिकारो हि येषां ते त्वन्नभक्षकाः ॥ ८०॥ स्यास्याम्यन्नेव जीवानां काशिकावासिनां यथा ॥ पीडां न जाय
ते मत्तः स्वच्चंक्रमणरंहसा ॥ ८१॥ सुरसोवाच ॥ किंचित्पश्यसि वामोरु क्षेत्रेऽस्मिन्कौतुकं परम् ॥ तत्समाचक्ष्व सुभगे
महानन्दवने शुभे ॥ ८२॥ कामकलोवाच ॥ पंचक्रोशात्मकं रूपं केशवस्य महात्मनः ॥ किंचिन्न्यूनं प्रपश्यामि सुरसेसा
धुवादिनी ॥ सुरसोवाच ॥ पंचक्रोशात्मकस्यास्य केशवस्य परात्मनः ॥ न्यूनतायाः प्रसंगः कः का दृष्टिस्तव सुव्रते ॥
८३॥ कामकलोवाच ॥ यावन्नममदेहोयं तन्मयो भाति सात्मकः ॥ तावत्पश्यामि चात्मानं न्यूनं देहोपचारतः ॥ ८४॥
प्रियादात्मानमन्यं तु यः पश्यति पृथङ्मतिः ॥ ८५॥ तस्य प्रियरतिः क्वास्ते क्व सुखं क्व महद्यशः ॥ कथं प्रियस्य विरहं ॥८८॥

सहन्ते सु विवेकिनः ॥८६॥ गतान्यनेक जन्मानि पत्याविरहितानि मे ॥ इदानीं कृपया सख्या दृष्टास्मि अपराधिनी ॥८७॥
स्वगृहं प्रापिता तुच्छा परव्यसन लालसा ॥ व्यभिचार परादीना प्रियस्नेहविवर्जिता ॥८८ येरहं वंचिता सुभ्रुनीं
चैरिन्द्रिय विभ्रमैः ॥ तानहं वंचयिष्यामि केशवेनाद्य सत्कृता ॥८९॥ नाहं बिभेमि निरयान्नासुखाद्गर्भवासतः ॥
२२ नदेहगेह दुःखाच्च यथाप्रिय वियोगतः ॥ ९०॥ बिभेमि मानुषं प्राप्य देहं सर्वार्थ साधकम् ॥ अहो प्रियस्यमा
हात्म्यं सुरसे पश्य सुंदरम् ॥ ९१ ॥ अपराधसहस्राणि क्षान्त्वा मामानय द्रुतम् ॥ अहो लोकः पापशोकपूर्णः सुकृ
तवर्जितः ॥ माधवं मद्धवं वीक्ष्य तथापि न विचारयेत् ॥ अहो पतित मय्याशु त्रस्तं शरण मागतम् ॥ ९२॥ त्यक्तुं न
शक्तो भगवान् केशवः काशि वल्लभः ॥ तं प्रियं परमानन्दं विहाय प्रियदर्शनम् ॥ ९३॥ भजंति ये दुरात्मान
स्तेषां प्रियकथाकुतः ॥ सूत उवाच ॥ इत्युक्त्वा सातु सुरसां, रुरोद गतचेतना ॥ मूर्च्छिता चापनापेति केशवं सा
वदनमुहुः ॥ ९४॥ विमृज्य नेत्रे सोवाच क्वासि क्वासि महाभुज ॥ मामालिंगा पतित्वंगी[1] विरहेण तवाच्युत

(interlinear: तै व्यं गिन)

1 पाठान्तर - "मामा लिंगा पति त्वंगी" — "मामा लिंग पति व्यंगी"

१ पाठान्तर—"जल्पामि"—"ज्जानासि"

२८

।।९५।। सूत उवाच ।। अनया परया रीत्या नित्यं तु रममाणया ।। नीतः कालः कामकलया गंगातीरनिवासया ।। ९६ ।। पु

का. नस्त्वां प्राह सुरसा देवस्ते मिलितो नवा ।। अद्यापि त्वां कामकलेना लिंगति हि सत्पतिः ।। ९७ ।। कामकलोवाच ।। २.

।।१००।। प्रियेण सुंदरेणाहं मिलिता न कथंचन ।। किंचिज्जल्पामि सुरसे कदा संगो भविष्यति ।। ९८ ।। सुरसोवाच ।। अहं

कारानिवृत्त्या तु केशवो नहि दूरतः ।। अहंकार युतानां च मध्ये पर्वत राशयः ।। ९९ ।। जानामि त्वां कामकले सदा

मधुरभाषिणीं ।। मां ज्ञास्यसि यथा रूपां तदा प्रिय मवाप्स्यसि ।।१००।। कामकलोवाच ।। का त्वं भद्रे कथं-

चाहं ज्ञास्ये त्वां करुणामयीं ।। तवाज्ञया करिष्यामि तत्सर्वं प्रियकाम्यया ।। १०१ ।। काश्युवाच ।। अधिष्ठात्री देव

तां त्वां क्षेत्रस्य करुणामयीं ।। काशीनिर्वाण चित्तां त्वां दृष्ट्वा प्रष्टुं समागता ।। १०२ ।। श्वः प्राप्स्यसि त्वं वरदं

केशवं केशवप्रिये ।। मध्याह्ने मणिकर्ण्यां तु विष्णुभाण्डं सु विसर्ज्य च ।। १०३ ।। इत्युक्त्वा तां स्वरूपं स्वं दर्शयामास काशि

का ।। श्यामा षोडशवार्षिकी सुकरुणा मूर्तिर्दधाना वरं हस्ताभ्यामभयं च विश्वजननी विद्योतिसागीयते ।।४।।

।।१००।।

माहष्टा स्मरणं गताऽपि सततं याकीर्त्तिता संस्तुता यास्पृष्टा न्वभिरात्मतत्वममलं दद्याद्ध्रुवं काशिका ॥४॥ सूतउवा
च ॥ इत्युक्त्वां तर्हिता मूर्तिः काश्याः परमसौख्यदा ॥ सातां दृष्ट्वा भगवती ननाम भुवि दंडवत् ॥५॥ काशिके दर्शया
यात्मानं केशवं प्राणवल्लभम् ॥ अतः परं पृथक् स्थातुं न शक्ष्यामि महेश्वरि ॥६॥ द्वितीये दिवसेप्येवं मुहु
र्वदन्ति विह्वला ॥ मध्याह्ने मणिकर्ण्यां सा स्नात्वा केशवमब्रवीत् ॥७॥ जयकेशव सर्वेश काशिवास सुखप्रद ॥
नयमामध्य भगवन् काशिवासिप्रियात्प्रिय ॥ सूतउवाच ॥८॥ एवमुक्त्वा ध्यानयुता पद्मासनवती च सा ॥ वि
ससर्जाशुभं देहं केशवेन समागता ॥९॥ स्वभर्त्रा मिलिता साध्वी दृष्टा लोकैस्तदा च सा ॥ जयकाशि महावि
ध्ये पतितानां च पावनि ॥१०॥ त्वामृते गतिरन्या न संसारे मज्जतामिह ॥ इत्याश्चर्यं निरीक्ष्याशु लोकः शो
कं जहौ महत् ॥११॥ काशिकायाः प्रभावज्ञः काशिकायां मनो दधे ॥ द्वेधा गतिः शास्त्रविचारकाणां वार्त्तेश्व
रः पुरुषार्थोप्यन्वास्यात् ॥१२॥ ईशात्प्रसन्नादविमुक्तवासः प्राप्यः परं पौरुषमेतदेव ॥ यस्याकथंचित्स्

रूपेण पौरुषैः कृतैः समस्तैरपि काशिवासे ।। यत्नः कृतो नश्यति नैव कुत्रापि जन्मांतरे काशिकां प्राप्नुमार्ह ।।१३।।
का. यत्रानृणः पितृदेवादिकांस्तु भजन्परां सिद्धिमवाप्नुयाद्वशी ।। यत्र प्रविष्टं पितृदेवमानुषा वदंति साक्षाद्धि र.
।१०१।। वरूपिणं नरम् ।।१४।। काश्यां देवः शंकरः केशवश्च काश्यां देवीत्यन्न पूर्णा रमा च ।। काश्यां ढुंढिर्विघ्नहर्ता गणेशः का
श्यां शास्ता कालराजो महेशः ।।१५।। काश्यां गंगा विष्णुरूपा काश्यां ब्रह्मा वेद घोषैरूपेतः ।। काश्यां दुर्गा दुःखदारिद्र्य (च काश्यां ।।)
हंत्री काश्यां सूर्यो व्याधिबाधानिहन्ता ।।१६।। किमत्र नास्तीति परं विमृश्यते यद्दुःखभारैर्युत मल्प सारैः ।।समा
गमोऽयं न शिवस्य लोके न विष्णुलोके न च सत्यलोके ।।१७।। काश्यां यथैकत्र समागमो महान्जातो न कुत्रापि तथा
भविष्यति ।। महत्समाजे खलु सज्जनत्वे कथा प्रवृत्त्या पुरुषार्थ भूष्णा ।।१८।। शारीरमात्रे विजितेन्द्रियाणां दो
षो न कश्चिच्च दुर्वितारिह काश्यां ।। विरुद्ध कर्म प्रतिवारणेन सुखाय काशी भवतीह नित्यम् ।।१९।। न देह गेहादि
सुतनूज जाया धनानि सर्वाण्यपि पावनानि ।। नरस्य कुर्वन्ति सुखं कदाचित्तस्मात्सु काशीगमनात्सुखी स्यात्
।।१०१।।

॥२०॥ इति श्रीब्रह्मवैवर्ते तृतीय विभागे कामकला पाख्याने अष्टादशोऽध्यायः॥ ऋषय ऊचुः॥ वीरसेनो महारा १८

जो विदर्भ नगरस्य च॥ किं काशिका गुणां श्रुत्वा चकार हरि वल्लभः॥१॥ पुनर्वेश्या वचो ब्रूहि न तृप्यन्ति महर्षयः॥ श्रुत्वा

श्चा मम धुरं सूत महाश्चर्य करं महत्॥२॥ सूत उवाच॥ वीरसेनः प्रसेनाय राज्यं पुत्राय दत्तवान्॥ विष्णुः भक्तः काशिका यामा

जगाम स्त्रिया सह॥ ३॥ वरणा यास्तटे रम्ये केशवस्य सुसन्निधौ॥ स्थित्वा दिकेशवं प्राज्ञ आराधयति भक्तितः॥४॥

७९ प्रातः स्नानं पादतीर्थेषु कृत्वा मध्याह्ने वै मणिकर्ण्यां निमज्य॥ दृष्ट्वा देवं विश्वनाथं ततस्तु देवी देवं केशवं माधवञ्च॥५॥

विप्रान्देवान्नदाने धनैश्च संतर्प्यायो पारणं संचकार॥ नित्यं राजा वीरसेनोऽतिशूरो जित्वा शत्रूनिंद्रियाख्यान्स्थितोऽ

भूत् ॥६॥ कस्मिंश्चिद्दिवसे राजा वीरसेनो जितेन्द्रियः॥ वेश्यां कामकलां स्मृत्वा कारयामास कौतुकम्॥७॥ आगतां तां सपप्र

च्छ किं करोष्यत्र संस्थिता॥ कामकलोवाच॥ भर्तृ शुश्रूषण रता कदाचिच्छ्वान मानसा॥ कदाचित्काशि माहात्म्य परि

शीलनतत्परा॥८॥ कदाचिच्छ्रवणासक्ता भर्तु र्गुणगणस्य हि॥ कदाचित्सत्सभामध्ये गोष्ठी श्रवणतत्परा॥९॥

३१

का॰ एवं कालेन मयानीतो नीयते च जनाधिप॥ नशक्नोमि पतिं त्यक्तुं बहुकाल वियोजितम्॥१०॥ राजोवाच॥ कस्ते पतिः- ८

॥१०२॥ क्व चास्ते स किं नामा कस्य संमतः॥ किं ददाति सुखं वित्तं मिलितासि कथं नु तम्॥ ११॥ कामकलोवाच॥ केशवो मेप

तिो राजन् सर्वत्रास्ते समस्त दृक्॥ तस्य नामान्यनन्तानि न चैकमपि वस्तुतः॥ १२॥ वेद स्मृति पुराणानां संमतो सात्म

दः प्रभुः॥ वित्तं तस्य जनानैव तेन दत्तमपि क्वचित्॥ १३॥ गच्छन्ति तत्पदे रक्ता मिलितास्मि गुरोर्गिरा॥ राजोवाच॥

कथमन्यस्य मिलनं कथं वा सेव्यते नरैः॥ १४॥ मिलितो न पुनर्याति कथं तस्मिन्प्रवर्तते॥ कामकलोवाच॥ गुरुभक्त्या

समित्यति स्मरणात्सेव्यते बुधैः॥ १५॥ मिलितोपि न लभ्येत जीवैरस्वभिकापरैः॥ राजोवाच॥ वर्णाश्रमेषु केतस्य वल्ल

भाः कस्य वल्लभः॥ यस्मिन्प्राप्ते मनोन्यत्र न गच्छेद्विषयान्तरे॥१६॥ कथं कामकले ब्रूहि परिजानासि तत्वतः॥ कामक

लोवाच॥ वेदमार्गरतास्तस्य वल्लभस्य च वल्लभाः॥ विषयो विषदृष्टीनां परमात्मा जनार्दनः॥१७॥ अन्तर्हितो न दृ

श्येत प्रत्यक्षोऽपि रविर्यथा॥ यत्र यत्र भवेत्प्रीतिर्जनस्य विषयात्मनः॥१८॥ तत्र तत्र मनो याति जनस्तन्मयतामि

॥१०२॥

यात् ॥ अतएव चिदानंदे परमात्मनि वल्लभे ॥ स्नेहः सर्वात्मना कार्यो यथाऽन्यत्र धनादिषु ॥ स्नेहाद्गमणं मासाध सुखं स
रमते वशी ॥ २० ॥ विषयस्नेहिनां राजन् न मिलन्ति कदाचन ॥ केशव स्नेहिना मात्मा साक्षाद्भवति माधवः ॥ २१ ॥ राजो
वाच ॥ विषयासक्तचित्तानामपि प्रयततां हरौ ॥ कथं मिलति देवेशः केशवः क्लेशनाशनः ॥ २२ ॥ कामकलोवाच ॥ वि
८० षयासक्तचित्तानां श्रवणे यदि मानसम् ॥ प्रवर्तते काशिकायां मिलत्यात्मा जनार्दनः ॥ २३ ॥ राजोवाच ॥ सर्वेश्वर्यवत्तिं
[द्वं] सद्वंद्वे स्थित्वा काशिकथां मुहुः ॥ कथं न साक्षाद्भवति भगवान्मधुसूदनः ॥ २४ ॥ कामकलोवाच ॥ गुरोस्तु शा
स्त्रे च महती श्रद्धा पुण्यैरवाप्यते ॥ अश्रद्धया हताशानां कथं साक्षाद्भवेद्धरिः ॥ २५ ॥ यस्य साक्षाद्भगवति
गुरौ शिववत्तौ परे ॥ मत्या शास्त्रीः श्रुतं तस्य सर्वं नश्यति नान्यथा ॥ २६ ॥ राजोवाच ॥ किं तत्पुण्यं वतां महाभा-
गे येन श्रद्धाऽति निर्मला ॥ जायते वर्द्धते चापि यया साक्षाद्भवेद्धरिः ॥ २७ ॥ कामकलोवाच ॥ श्रुतिस्मृतिपु
राणोक्तं क्रियते कर्म यच्छुभं ॥ ब्रह्मार्पण धिया सर्वं कर्तव्यं विष्णुवल्लभ ॥ २८ ॥ राजोवाच ॥ श्रद्धापूर्णाति

३२ चकथं ज्ञातव्या सुखकारिणी ।। यामासाद्य नरो भक्त्या प्राप्नुयात्केशवं पतिं ।। २९।। काम कलोवाच ।। पूर्णा श्रद्धा महा
का० राजतदा ज्ञेया मनीषिभिः ।। किं सत्य मननं चेति विचारः संप्रवर्त्तते ।। ३०।। विचारेऽपि कृते राजन् न सत्य परिवर्जनम् ।। ९०
।१०३।। सिद्धं भवति, पूर्णा स्यात्तदा श्रद्धा महाफला ।। ३१।। अत्रैवोदाहरंतीम मितिहासं पुरातनम् ।। यं श्रुत्वा श्रद्धया पूर्णो
भवेत्सार विचारकः ।। ३२।। विंध्याद्रि कोटरे राजन् भिल्ल पल्ली सुविस्तृता ।। तस्यां वसति पापात्मा भिल्लो रौद्राक्ष
नामधृक् ।। ३३।। मार्गमागच्छतोवीक्ष्य जनान्पल्लीपतिः सच ।। हत्वा हत्वा धनं सर्वं गृहीत्वा पल्लिमाविशत् ।। प्रत्य
हं जीवहननं प्रत्यहं कर्त्त कर्त्तनम् ।। प्राणीनां प्रकरोत्येव रौद्राक्षः क्षीण सत्क्रियः ।। ३५।। एकदा ब्राह्मणाः शांता मिलिता मा
र्गमध्यगाः ।। रौद्राक्षेण धृताः सर्वे पृष्टाश्च शुभदर्शनाः ।। ३६।। के यूयं कुत आयाता दीयतां सर्वमेवहि ।। नोचेद्धत्वा
हरिष्यामो धनं जीवं यशोबलम् ।। ३७।। ब्राह्मणाः ऊचुः ।। गृहाण सर्वं हि धनं यत्किंचित्वर्त्तते वसु ।। शरीरं त्यज नोभि
र्क्लेशयेन काशी समाप्यते ।। ३८।। धनमूलं मनुष्याणामायुः परम दुर्लभम् ।। तच्चेद्धृतं भोग हेतुर्जीवितेन किमाहितेः ।।

३९।। विप्रा ऊचुः ।। धनेन किं पापशोकाधिदुःखमूलेन सर्वार्थविनाशकेन ।। आहारमात्रादतिरिक्तसंग्रही नश्यत्यव
श्यं परलोकशून्यः ।। ४०।। भिल्ल ऊचे ।। पापं किमुच्यते विप्रा न जानामि तदुच्यताम् ।। पापेन क्रियमाणेन किं नश्य
ति ममापि हि ।। ४१।। विप्रा ऊचुः ।। पापं दुःखस्य मूलं हि सुकृतं सुखकृन्मतम् ।। पापिनो निरयं यान्ति स्वर्गं सुकृतिन-
स्तथा ।। ४२।। भिल्ल उवाच ।। मया पापं कृतं घोरं कथं सुखमवाप्यते ।। नहि दुःखं विजानामि यावज्जीवमनाग
पि ।। विप्रा ऊचुः ।। सुखं यत्प्राप्यते भिल्ल पूर्वजन्मार्जितेन च ।। सुकृतेन, महामूर्ख दुःकृतं दुःखकृद्भवेत् ।। ४४।। भिल्ल
उवाच ।। दुष्कृतस्य स्वरूपं किं सुकृतस्यापि किं पुनः ।। वदन्तु सुविचार्याशु न जाने किं मतं त्वरम् ।। ४५।। विप्रा ऊचुः
8 | ।। परपीडाकरं भिल्ल परद्रव्यादिहारकम् ।। सन्निन्दामात्मदर्पं च तां दुःखदं दुःकृतं मतम् ।। ४६।। सुकृतं सर्वसु
खकृत्परद्रोहविवर्जितम् ।। संस्कारैः संस्कृतस्यात्र शुभे चित्तं प्रवर्तते ।। ४७।। भिल्ल उवाच ।। संस्काराः क
ति संतीह बाह्याभ्यन्तरशोधकाः ।। शुद्धस्य लक्षणं किं तथेन संस्कृत उच्यते ।। ४८।। विप्रा ऊचुः ।। संस्कारा

दशकल्पन्ते देहिनः शुद्धि हेतवः॥ आदौ सद्भिः संगतिर्हि ततो विस्तार बुद्धिता ॥४९॥ ततः सत्स्वान्नु परतावि
का॰ चारस्तदनन्तरम् ॥ततश्चानुभवास्वाद स्ततो विषयं मोचनम् ॥५०॥ आहार शुद्धिश्च पुन स्ततः प्रीतिर्जना र॰
॥१०४॥ र्दने॥ ततः सर्वं विष्णुमयं सर्वदानंद स्वच ॥ ५१॥ भिल्ल उवाच ॥ सत्संगेऽपि न कस्यापि दृश्यते सन्मनोग
तिः॥ तत्कथं श्रवणेनापि सद्बुद्धिर्न च जायते॥ ५२॥ विप्रा ऊचुः ॥ यावत्पापैस्तु मलिनं हृदयं तावदेव हि ॥
न शास्त्रे सत्य बुद्धिः स्यात् सद्बुद्धिः सद्गुरौ तथा ॥ ५३॥ अनेक जन्म जनित पुण्यराशि फलं महत् ॥ सत्सं
ग शास्त्र श्रवणादेव प्रेमादि जायते ॥ ५४॥ ऋषय ऊचुः॥ स्नेहो यत्र प्रभवति विषयेवा जनार्दने॥ तद
र्थं कुरुते सर्वं शुभं वा यदि वा शुभम् ॥ ५५॥ विषयेस्नेह वृद्धीना मशुभान्येव सादरम् ॥ भवंति केशव स्नेहा
च्छुभान्येवास्य वाधिया ॥ ५६॥ भिल्ल उवाच ॥असाध्योऽपि हि साध्यं स्यात्कथंचित्तद्वदं तु नः॥ महापातक
युक्तस्य ममापि खलु निष्कृतिः॥ ५७॥ जायते चरणोपांते न्यपतन्नायतां शुभम् ॥सत्संगवासिनो विप्रान जान
॥१०४॥

न्ति शुभाशुभम् ॥ ऋषय ऊचुः॥ असाध्योऽपि भवेत्साध्यो महारस निषेवणात् ॥ पथ्य पुन्नाशनाच्चैव नान्यथाज
न्मकोटिभिः ॥ ५९॥ भिल्ल उवाच ॥ कोरसः किंच पथ्यं स्यात्सर्वस्य जगतः कथम ॥ एकएव महाव्याधि सहस्र
परिनाशनः॥ ६०॥ ऋषयऊचुः ॥रसो महाविष्णुःकथा तदुक्तं पथ्यमुच्यते ॥उपदेष्टा सुहृद्वैद्यो रोगः संसारए
वच ॥ ६१॥ भिल्लउवाच ॥ सर्वं मिलातिच्चैकत्र कुत्रब्रूमहर्षयः सदा ॥सर्वेषां रोगिणां रोगनाशनाय महौषध
म्॥ ६२॥ ऋषय ऊचुः॥ काश्यां मिलति सर्वं हि विनाऽयासेन धर्मतः॥ तत्र पापकृताद्रोगादन्यत्र मरणं भवेत ॥
62 ६३॥ मृता अपि विमुच्यंते यातनान्ते सुसंस्कृताः ॥ भिल्ल उवाच॥ नयन्तु मां काशिकां रोगहंत्रीं पापात्मानं देव
विप्रद्रुहञ्च ॥ ६४॥ अतः परं गरव स्तारयंतु मामात्म तंत्रं शरणागतं हि॥ ऋषय ऊचुः॥ त्वं भिल्लराजः सह
सा कथं परं वैराग्य मालंब्य विहातुमिच्छसि ॥सर्वं जगज्जाल मिदं शनैः शनैस्त्यजस्व सद्भिः खलुसंगतश्चि
रम्॥ भिल्लउवाच॥ पूर्वजन्म सुकृतैर्भवद्विधाः संगता मम महाघनाशनाः॥ तान्विहाय यदि चात्र पापकृत्संग

नः पुनरपीह सामतिः ॥६६॥ ऋषय ऊचुः ॥ आगच्छ राज्यं पुत्राय दत्त्वा काशीं भवापहाम् ॥ श्रुत्वा ह्यनन्तरं कृत्वा नयथा र॰
का॰ पूर्वसंस्कृतिः ॥ कामकलोवाच ॥ ६७॥ वीरसेन महाराज श्रुत्वा भिल्लो ह्यच्युतः ॥ श्रद्धाबुद्धियुतो धीरः समायात्केश १८
॥१०५॥ वीं पुरीम् ॥ ६८॥ प्रवेशमात्राद्धन्यो महापापयुतोऽपि सः ॥ काश्यामागत्य सततं कथाश्रवणतत्परः ॥ ६९॥ श्र
द्धाबुद्धिं परां प्राप महामोहविनाशिनीं ॥ महर्षयोऽपि नियताः कृपया पूर्णमानसाः ॥ ७०॥ जितेन्द्रियं महाधीरं
सश्रद्धं दृढनिश्चयम् ॥ आहूयोपदिशंत्यत्रं कृपया गुरुसेवकम् ॥ ७१॥ राजोवाच ॥ काश्यामागत्य मुनिभि
रुपदिष्टं किमुच्यताम् ॥ नन्दामि मयि गच्छामि तव वाक्ये महद्गुणैः ॥ ७२॥ कामकलोवाच ॥ ज्येष्ठेश्वरसमी
पेतु ऋषयः सन्निकेतनाः ॥ वदन्त्यहर्निशं भक्त्या शिवकाशिहरेः कथाः ॥ ७३॥ तत्र शृणोति सततं भिल्लः श्र
द्धासमन्वितः ॥ श्रद्धया गुरुदेवे हि ज्ञानं सिध्यति नान्यथा ॥ ७४॥ ऋषय ऊचुः ॥ अत्रैव गाथां गायंति
सिद्धा ब्रह्मर्षयोऽमलाः ॥ तथा रामेण कृष्णेन कृष्णद्वैपायनेन च ॥ ७५॥ शिवभक्तः काशीवासी ह्यर्जुनेन समो ॥१०५॥

ऽपिहि ॥ कृष्ण एव विजानाति शिवतत्वं सनातनम् ॥ ७६ ॥ येन सनेत्र पद्मेन पूजितोऽविंकया सह ॥ विश्वेशोवि
विधैर्भक्तैः मार्गैर्बाह्या भ्यन्तरैरपि ॥ ७७ ॥ संपूजयति देवेशं शंकरं शंकरार्थदम् ॥ शंकरोऽपि सदानन्दो देवदे
वं जनार्दनम् ॥ ७८ ॥ निरन्तरं भजत्येव सांबः सांबसुतस्तुतम् ॥ यन्नामधेयं वचसा मनसा रूपमुत्तमम् ॥ ७९ ॥
शिरसा पादतीर्थं तु गृहीत्वा काशि संश्रयः ॥ यस्य स्वरूपं सर्वात्मा काश्या मुपदिशत्यलम् ॥ ८० ॥ तारकं ब्रह्म
येनास्य लोकस्य न पुनर्भवः ॥ हरिभक्तः शिवः साक्षा द्धरिः शिव परायणः ॥ ८१ ॥ विचारतो न भेदोऽस्ति न च भेदः
प्रकल्पितः ॥ भक्ति रानीय देवं स्वं समर्पयति सर्वगम् ॥ ८२ ॥ महाकृपा समुद्रं यत् स्वरूपं तन्मयं विष्णुः ॥ यज्ञदानत
83 पोयोग तीर्थ विद्याऽऽश्रमादिभिः ॥ ८३ ॥ साध्यते भक्ति रचला देवे हरि हरेऽनिशम् ॥ ते धन्याः कृतपुण्यास्ते भक्ति
र्येषां महाफला ॥ ८४ ॥ उज्जृम्भते सुमहती पुण्यभारैः सुखप्रदैः ॥ नारायण परः काश्यां महादेव परोऽथवा ॥ ८५ ॥
भूत्वा सदाचारपर स्तिष्ठेत्काश्यां न चान्यथा ॥ वेदकर्त्ता वेदरूपो वेदमार्ग प्रवर्त्तकः ॥ ८६ ॥ वेदमार्ग रतान्देवो

स नु गृह्णाति तत्परः ॥ अतोऽर्थमपरैर्भोग्यमीश्वरैर्धर्मरक्षकैः ॥ ८७ ॥ पूर्णाः पूर्णतरा भवंति यदनुध्यानाज्जयान्ना
का॰ मतः ॥ सोऽपि ब्रह्मरसायनैकफलदं कर्माचरन्नुध्यति ॥ ८८ ॥ काशीनाथपरं परात्मनयनं कर्मापरं कामिनाम् ॥ - र॰ ९८
॥१०६॥ अंतः क्षालनकृन्कृतांतभयहृत्सत्कर्म काश्यां चरेत् ॥ ८९ ॥ स्वयमेव भवो भावैः पूजयेच्छाश्वतं शिवम् ॥ अत
एव जनैः काश्यां पूजनीयो भवः सदा ॥ ९० ॥ यात्रा पूजा नाम संकीर्तनादिं स्नानं तीर्थेष्वेव नक्तादिनेषु ॥ सत्सं
गोऽन्येन नैव संभाषणादिं कुर्यादेवं देवदेवोऽदिदेश ॥ ९१ ॥ सत्ये स्वयं श्रद्दधते हि लोकाः स्त्रेतायुगे शास्त्रगु
रूपदेशात् ॥ न द्वापरे श्रद्दधते हि केचित्कलौ किमत्रास्ति हरो हरेरितिः ॥ ९२ ॥ स्नातव्यं जाह्नवी तोये द्रष्टव्यः
पार्वतीपतिः ॥ स्मर्तव्यः कमलाकान्तो वस्तव्यं काशिका स्थले ॥ ९३ ॥ कामकलो वाच ॥ एवं कथावसाने स
उत्थाय कृतनिश्चयः ॥ गत एकांत सदनं पश्चात्ताप समन्वितः ॥ ९४ ॥ शिवस्मरणसंपूर्णहृदयः क्षुत्तृड्
र्दितः ॥ कदाचित्किंचिदश्नाति कदाचिन्नापिबत्यपि ॥ ९५ ॥ एवं नयति कालं स भिल्लः सज्जन सिद्धिभाक् ॥

शृण्वन् हरिकथां शुद्धां पापघ्नीं पापविच्युतः ॥९६॥ श्रद्धया काशिकां प्राप्य मोक्षसिद्धिमवापह ॥ श्रद्धा धर्मस्य
मोक्षस्य श्रद्धा पापप्रणाशिनी ॥९७॥ श्रद्धया सुखिनो लोकाः श्रद्धया शान्तिरप्यते ॥ एवं त्वमपि सश्रद्धः परां
सिद्धिमवाप्स्यसि ॥९८॥ इति श्रुत्वा वीरसेनो राजा श्रद्धायुतो महान् ॥ भजन्हरिं काशिकायां सिद्धिं प्राप नराधि
पः ॥९९॥ सूत उवाच ॥ इति कामकलाख्यानं विशदीकृत्य वर्णितम् ॥ विचार पूर्व श्रवणो (ध्रुवेत्) कार्यं न चान्यथा ॥१००
श्रवणेन परा सिद्धिः श्रवणेन परं सुखम् ॥ श्रवणेन परं ज्ञानं धर्मादि श्रवणेन च ॥ (१०१) १॥ अन्यत्सर्वं परित्यज्य श्रवणं
परिसाधयेत् ॥ श्रवणे सर्वमस्तीह श्रवणं नान्यतः क्वचित् ॥ (१०२॥) इति श्री ब्रह्मवैवर्त्ते तृतीय विभागे एकोन विंशोऽध्यायः
७१ ॥१९॥ अथ षष्ठ ऊचुः ॥ श्रवणस्य विधिं ब्रूहि श्रुतं धर्मादि सिद्धिदं ॥ यथा भवति लोकानां वक्तृ श्रोतृ गुणान्वद १ ॥ सू २
त उवाच ॥ वक्तारि प्रथमं विश्य कृष्णद्वैपायनो हरिः ॥ प्रवर्त्तयति विप्रेन्द्रा सूतो वक्ता प्रवर्तते २ ॥ यथा भगवतो विष्णोः
कृपा भवति सत्तमाः ॥ प्र(त)था वक्तुर्मुखाद्वाणी (द्वा) सरसा संप्रवर्तते ॥ ३ ॥ पतितोऽपि महापापो मूर्खोऽपि व्यसनान्वितः ॥

कामक्रोधादियुक्तोऽपि कृपणोऽपि विषादवान् ॥४॥ इत्यादिदोषयुक्तो यन्मुखाद्विष्णु सत्कथाम् ॥ श्रुत्वा ८

का॰ विकाश मायानि सवज्ञा परमो गुरुः ५ येनोपदिष्टाः पापीष्ठा अपि कामातुराः शठाः॥ परंज्ञानमवाप्यापि शाश्व

॥१०७॥ तं यांति तत्पदम् ॥६॥ निरपेक्षः कृपायुक्तः शिवस्मरण तत्परः॥ एवंविधो गुरुर्ज्ञेयो लोकोद्धरण क्षमः॥७॥

आदौ पापात्संनिवर्त्त्योऽशु धर्मं भूयाद्धितापत्य सौख्यादि युक्तम्॥ श्रद्धां दृष्ट्वा धर्मसत्कर्मके षु नैष्कर्म्यं तान्या

जयेत्सद्गुरुर्यः॥ नैष्कर्म्यधर्मे यदि शुद्ध बुद्धिः श्रद्धा पुनस्स्याद्भगवत्प्रसादात् ॥ तदा हरेर्भक्तियुतान्स्वधर्मानादि

श्यदेवस्य शिवस्य वार्तान् ॥९॥ ततोऽतिमुख्यं भजनं शिवस्य हरेश्च कृत्वा स्ववशं च गौणम् ॥ समादिशेद्गुरुरु

स्वपःक्रमेण हरिं परात्मानमथो विकल्पम् ॥१०॥ संसारदोषे विषयेन्द्रियादिदोषेश्च वैराग्य मुखेन चैव॥ खे

दं समुत्पाद्य परात्मनिष्ठं कृत्वा गुरुः स्याच्छिव विष्णुरूपः ॥११॥ निष्ठाहेण गुरुणा जनतापाः शाक्यते सकल

सिद्धि विधानम् ॥ नान्यथा विविध लोल युतेन, मोचनं सकलसिद्ध विरुद्धम् ॥१२॥ अथ पञ्चः॥ महर्षयोऽपि ॥१०७॥

तत्सुखं सूत जीवन्नप्यहत्वा निष्कृतिः कथम् ॥

राजन्यो गच्छन्ति गुरुदक्षिणाम् ॥ सूत उवाच ॥ वक्ता सरागो नीरागो द्विविधः परिकीर्तितः ॥ सरागो लोलुपः कामी तदु
क्तं हृन्न संस्पृशेत् ॥१३॥ नीरागो द्विविधः प्रोक्तो स्वेकः शिष्यपरीक्षकः ॥ मयि देवे काशिकायां धर्मेषु विविधेषु च
॥१४॥ प्रीतिरस्य समुत्पन्ना न वेति प्रविचारयन् ॥ याचते याज्ञवल्क्यादिरपि ब्रह्म परात्परः ॥१५॥ परीक्षितुं श्रोतृ
गुणं स्नेहं स्वस्मिन्करोति वा ॥ अन्यस्तु वीतरागो यो दत्तात्रेयादि सद्गुरुः ॥१६॥ उपदेशं करोत्येव न परीक्षां क
रोति च ॥ अपरीक्ष्योपदिष्टं यल्लोकनाशाय तद्भवेत् ॥१७॥ वक्तारं नाशयत्येव रागधिष्ठात्र देवता ॥ ततो
विचार्य वक्तव्यं श्रुतिं स्मृत्वा रहस्यगाम् ॥१८॥ अन्यथा श्रावयन्कामात् लोकात्पतति दुर्मतिः ॥ न चात्मनो न च
लोकाय तदुक्तमपरीक्षितम् ॥१९॥ ऋषय ऊचुः ॥ कथं वा याज्ञवल्क्येन दत्तात्रेयेण वा कथम् ॥ उपदिष्टं
85
महाभाग केभ्यस्तद्वद तत्त्वतः ॥२०॥ सूत उवाच ॥ आसीद्राजा महासत्त्वो मिथिलायां दृढव्रतः ॥ विचार
स्तस्य सु महान्जातो ज्ञानविनिर्णये ॥२१॥ किं करोमि कथं ज्ञानी द्विजः समुपलभ्यते ॥ जीवादपि अधि

३

श्रोतृ गुणान्

का. कं वित्तं दास्यामि ज्ञानदे गुरो ॥ श्रुतं मया श्रुति गणान् परीक्षन्ते महाधियः ॥ ज्ञानं श्रेष्ठतमं चास्य धनं वास्ते

॥१०८॥ तृ भाजनम् ॥ २३॥ प्रार्थयन्ति यथा किंचित्पामराः स्तेरभागिनः ॥ धनं वास्य प्रियं चाहं गुरुर्ज्ञानोपदेशकः ॥ २४ ५.

विचार्येति महाराजो जनकः सज्जनाग्रणीः ॥ गवां सहस्र मयुतं स्थापयामास चत्वरे ॥ २५॥ हिरण्यं रूप्यं बहुलं २०

कौशेय चामरादिभिः ॥ अलंकृतं सर्व गुणै रूपेतं घट दोहनम् ॥ २६॥ आहूय विप्रान् प्राहाशु जनको जीव

कोविदः ॥ भवत्सु वीतरागो यो ज्ञानवान्धर्मतत्ववित् ॥ २७॥ सोऽङ्गी करोतु गाएता नान्यः संसार दोषकृत् ॥

इति श्रुत्वा याज्ञवल्क्यो बभाषे जनकं नृपम् ॥ २८॥ धन्योऽसि कृत कृत्योऽसि अधिकार्यसि सत्तम ॥ जाना

सि जीव भावं त्व मात्मनः परमां स्थितिम् ॥ २९॥ प्रीतिर्न विद्यते यस्य विषये विषम प्रदे ॥ नानाधिकारम

तुलं लभते स महामतिः ॥ ३०॥ धनादि स्नेह कृ धस्तु सपापाऽत्माति वंचकः ॥ आत्मघाती न शुध्येत श्रु

तेः शास्त्रै रनेक धा ॥ ३१॥ यस्तु वित्तं तृणी कृत्य धर्मादिषु प्रवर्तते ॥ तस्य धर्मोदयः सिद्धा भवन्त्येव नसं

ज्ञायः ॥ ३२॥ अनोगाः स सुवर्णाश्च दोहिं विप्रेभ्य एव च ॥ पृच्छस्व मामतः शुद्धं ज्ञानं दुःख विघातकम् ॥ ३३॥
याज्ञवल्क्य मुखाद्राजा विवेकं लीन् ॥ स सुवर्णाः पृथग्दत्त्वा ब्राह्मणेभ्यः परार्थिना ॥
सूत उवाच ॥ इति श्रुत्वा याज्ञवल्क्यस्ततः प्राह जनकाय महात्मने ॥ वेदान्तायोपनिषदं ज्ञानं प्राहाधिका
रिणे ॥ ३४॥ जीवात्मनोर्विभागेन पुनरैक्येन तत्त्वतः ॥ प्राह प्रीतो गुरुः सर्वं वेदार्थं सान्वयं शिवम् ॥ ३५॥
ततः स राजा जनको ज्ञात्वात्मानं गुरोर्मुखात् ॥ कृतार्थोऽस्मि प्रसादात्ते सर्वत्र स्नेहवर्जितः ॥ ३६॥ परमात्म
न्य द्वितीये परप्रेम्णा नराधिपः ॥ रमते गुरुवक्त्राब्धि श्रुत्वा श्रुति रसायनम् ॥ ३७॥ याज्ञवल्क्योऽपि जनकमुपदि
86 श्य महामुनिः ॥ गतो यथेष्टं सर्वात्मा गुरुर्विष्णुः परः सदा ॥ ३८॥ ऋषय ऊचुः ॥ याज्ञवल्क्येन शिष्याय जन
काय परीक्ष्य च ॥ दत्तं ज्ञानं ब्रह्म परमज्ञान ध्वान्त नाशनम् ॥ ३९॥ दत्तात्रेयेण मुनिना सुपादिष्टा बहिर्मु
खाः ॥ कथं जाता नरास्तात तद्वदस्वानुपूर्वशः ॥ ४०॥ सूत उवाच ॥ दत्तात्रेयो हरेरंशस्त्रियुगे कलिग
श्चलोऽ
णात्परः ॥ कलौ यत्ने नीति तेजस्वी कदाचिदुपलभ्यते ॥ ४१॥ नानावेषैः सुगुप्तात्मा विंध्य शैलादिषु स्थि

पंक्ति ४५ "मायेतीह विजृंभते॥ देहेन्द्रियादि रूपेण तत्रकाऽऽस्था शुभात्मनि॥ किं साधनं कश्च साध्यः कोवा साधयिता जनः॥ सर्वे"

३८

नः॥ कदाचिन्नर्मदातीरे चातुर्वर्ण्यजनेषु च॥ ४२॥ मिलितेषु स विश्वात्मा वक्तुं समुपचक्रमे॥ एकः परात्मा प्रकृ

का· तेः परशिवः सत्यः सदानन्दमयः सनातनः॥ ४३॥ महानुभावः सकलानुभावः परावरात्मा विकृतेः परःपरः॥ अना र·

॥१०९॥ दिमध्यान्त मनन्यदेकं ब्रह्मैव भात्यर्थरूपं विशुद्धं॥ ४४॥ न चान्यदस्तीह सनातनात्परं विशुद्ध विज्ञानघ २०

नाच्छिवा च्छिवम्॥ वैष्णवी शक्तिरमला मायेति विज्ञाय निर्व्यापारः परो भवेत्॥ ४५॥ को गुरुः कश्च स-

च्छिष्यः उपदेश्यं किमस्ति च॥ यदस्तीह तदस्तीति ज्ञात्वा लोकः सुखीभवेत्॥ ४६॥ शृण्वन्तु साधवः

सर्वे सर्वे वेदार्थमादरात्॥ दृश्यमात्मेति विज्ञाय न धर्मादिषु क्लिश्यति॥ ४७॥ सिद्धस्य साधने स्वच्छे

गुरुशास्त्रादिभिस्तु किम्॥ नहि दीपेन सूर्यस्य दर्शनं चोपदिश्यते॥ ४८॥ तस्मात्सर्वं परित्यज्य सा

त्मानमनुचिंतयेत्॥ अचिंतितोऽपि भगवान् स एव परिजृंभते॥ ४९॥ सूत उवाच॥ इत्यादिवचनैर्लोका

धर्मादि परिवर्जिताः॥ आत्मानुसंधानपरा जाताः साधनवर्जिताः॥ ५०॥ को गुरुः कश्च वा वेदः किं वा-

॥१०९॥

शास्त्रं क भावना ॥ यदस्तीह तदस्तीह ध्येयं ध्यानं च नास्ति सत् ॥ ५१॥ विवदन्ते तथाऽन्योन्यं कथं धन परो भ
वान् ॥ धन पुत्राप्त गेहादि सक्तः कथमवाप्स्यसि ॥ ५२॥ ज्ञानं विशुद्धं विगुणं विषयादि विवर्जितम् ॥ इति
श्रुत्वा वदत्यन्य उपहासयुतं वचः ॥ ५३॥ आहार मैथुनाद्यास्तु देहधर्माः पृथग्विधाः ॥ तत्र दृष्टिर्न कार्या
हि यत्करोति करोतु तत् ॥ ५४॥ आत्मैव वर्तते नान्यद्विकारं परिकल्पितम् ॥ वन्ध्या पुत्र द्वयोर्युद्धं यथा
नास्ति विचारतः ॥ ५५॥ आहार मैथुनादीनि देहकार्याणि वस्तुतः ॥ न संति विमलाकाशे चिदानन्दे
९७ परेऽव्यये ॥ एवं विवदमानास्ते गेह देहादि तत्पराः ॥ वैराग्य वार्त्तामपि नो शृण्वन्ति कथयन्त्यपि ॥ ५७॥
ऋषय ऊचुः ॥ भगवान्वेद मर्यादा स्थापनाय शरीरभाक् ॥ कथमेवं विश्वं ब्रह्म रहस्यमुपदिष्टवान् ॥ ५८॥
सर्व साधारणं कृत्वाऽनधिकारि जनाय हि ॥ तद्वदस्व महाभाग महाकौतूहलं हि नः ॥ ५९॥ सूत उवाच ॥ ईश्वरः
सत्ययुगे गृहीतं स्वमेवेह वदत्येव न चान्यथा ॥ लोको जितेन्द्रियः श्रुत्वा न भ्रमत्येव न चान्यथा ॥ ६०॥ अव

३८ त्रौ भगवतो ज्ञानमेव निरूप्यते॥ स्वस्वभावैः स्वाधिकारा भावान्नाशं गताः नराः॥ ६१॥ दत्तात्रेयेण मुनिना स
का. त्यमेव महात्मना॥ उपदिष्टं सत्ययुगे गृहीतं स्वाधिकारतः॥ ६२॥ अतैः स्तदेव त्रेतायामंतः करण शुद्धितः॥ गृहीतं, ८.
११०॥ द्वापरे तद्धि ज्ञानं विषय मिश्रितम्॥ ६३॥ प्रकाशानेन सुभगं (खर्द.) भेद दृष्टया (ष्ट्या) निराकृतम्॥ विषयात्मनाम शांतानामवे २०
द पथ मीयुषां॥ ६४॥ कलौ नाशाय भवति ज्ञान मार्गोऽशुभात्मना॥ दत्तात्रेयेण मुनिना स्वाधिकारेण वर्णितम्
॥ ६५॥ अधिकार विहीनानां नदेवा सुखदं महत्॥ केनापि प्राप्य युक्तेन मुनिना वेद रूपिणा॥ ६६॥ निरूपितमभिप्रा
य स्तस्य न ज्ञायते जनैः॥ अन्यै र्विचार्य वक्तव्य मधिकारानुरूपतः॥ ६७॥ साधारणेन कथयन्नन्यायैः संयुतो
भवेत्॥ अधिकारिणे विशुद्धाय ज्ञानद स्सर्वदः स्मृतः॥ ६८॥ अधिकारविहीनाय वदन्नरक मृच्छति॥ ऋ
षय ऊचुः॥ उपदेश क्रमं ब्रूहि ज्ञानस्य परमात्मनः॥ श्रोतुर्हृदि यथा तिष्ठेत् विक्षेपादि विवर्जितम्॥ ६९॥ सू
त उवाच॥ आदौ धर्म कथाः श्राव्या स्त्रिवर्ग फलदायकाः॥ तत्रानित्यत्व कथना द्विरागो जायते नृणाम्॥
॥११०॥

॥७०॥ निवृत्ति धर्मनिरता लोका ज्ञानाधिकारिणः॥ देशाधना सन्न तमं ज्ञात्वा ऽऽत्मान मुपादिशेत्॥ ७१॥
यस्य भक्तिर्भगवति हरौ परम पूरुषे॥ तस्य श्रुतं फलत्यत्र नान्यस्य विकृतात्मनः॥ ७२॥ सर्वाणि शास्त्राणि
समस्त धर्मान् सर्वाः कलाः सर्व गुणान्यथेच्छम्॥ सुधार्मिके चैव वदेत्समस्तं ज्ञानं विरक्ताय हरि प्रियाय॥७३॥
वर्णात्मकेषु मंत्रेषु गुरु शिष्य व्यवस्थया॥ प्रवृत्ति रुक्ता महती सावधानै र्महात्मभिः॥ ७४॥ अतो विचार्य
कालेन महता धार्मिकेषु च॥ वक्तव्यं ज्ञानमतुलं जगदात्म प्रबोधनम्॥ ७५॥ आयुः स्वल्पमिति ज्ञात्वा कला
रुपदिशन्ति ये॥ अधिकार विहीनाय वंचका धनलोलुपाः॥७६॥ पतन्ति गर्भ वासेषु ते स्वात्म परवंचकाः॥ न
४४ हि व्यावृत्त चित्तानां ज्ञानं समुपदिश्यते॥ ७७॥ खेदो विरागः संतोषः कामादि मल वर्जनम्॥ दृश्यंते यत्र चै
तानि मुमुक्षाच्च हरौ रतिः॥ ७८॥ तस्मिन्नभिन्ने सत्पात्रे क्षिपेज्ज्ञानामृतं महत्॥ विष्णु भक्तिः सुमहती निःपा
पाकाशिका स्थितिः॥७९॥ उपदेश्यो मोक्ष हेतुः सर्व वर्णाश्रमेषु च॥ सर्वेऽधिकारिणो लोकाः पापव्यसन

वर्जिताः ॥ मुमुक्षवः सर्वदा स्युः काशिवासे शिवाज्ञया ॥ न काशीसदृशं किंचित्साधनं विद्यते नृणाः ॥ ८१
का. शास्त्रमार्गेण वसता मिराप्नुवन्न दुर्लभा ॥ मोक्षः साधनसंघैर्हि प्राप्यते न तु यः क्वचित् ॥ ८२॥ अतो विरिंचि ८.
॥१११॥ त्रा महती महाश्चर्यमयी स्थली ॥ यत्र सर्वैर्म्रियमाणैर्मोक्ष एव प्रलभ्यते ॥ ८३॥ विश्वेश्वरोप्यात्मर
तः परात्मा ॥ विश्रामसौख्यं लभते यदत्र ॥ विश्रामहीनाः खलु मानवा ये ते किं जनन्या जठरे न संति ॥ ८४॥
अहो भवानीसदने निषीदतां प्रदक्षिणीकृत्य यथा यथा सुखम् ॥ न तत्सुखं योगयागादिसाध्यं मंत्रापुरः
प्राणभृतां यदाविः ॥ ८५॥ दीनं वदान्यं महदल्पकं वा ॥ पुण्यं महापातकसंयुतं च ॥ आराधिता सम्मतां सं
विधत्ते ॥ प्र दयापरा भोगमोक्षैकहेतुः ॥ ८६॥ न ये भवानीं भवभावभंजनीं ॥ भजंति भावेन भवार्णवे भवाः ॥
भवंति ते सौख्यसमाधिभाजः कथं च चिंतारहिताः समंततः ॥ ८७॥ चिंतितार्थपरमार्थदायिकां ॥ ना
यिकां परमशंकरस्य च ॥ ब्रह्मविष्णुऋषिशेषसेवितां ॥ तां परां भजत भावभाविताम् ॥ ८८॥ अहो विरिंचि
॥१११॥

त्रं जगदंबिकाया। विचित्र मायैरपि दुर्विभाव्यम् ।। काश्यां प्रदेशे खलु संस्थितापि स्वभक्तभाग्या प्रकरोत्य
नन्तम् ।। ८९ ।। गृहं न काशी सदृशं सुखाय। पिता न विश्वेश समः क्वचिद्भवेत् ।। माता भवानी सदृशी न गर्भदा ।।
कुटुम्ब मन्नत्यजनो जनार्दनम् ।। ९० ।। क्षेत्रे विमुक्ते जगतामथांबिकां। पश्यन्ति नित्यं सुकृतैः प्रमोदिताः ।। तां
स्तान्त्र पश्यत्यथ सा जगन्मयी। स्वचक्षुषायेन च ते सुचक्षुषः ।। ९१ ।। भोगार्थिनं दीनजनं समाश्रितां। मो
क्षार्थिनं बन्धन कोटि मुक्तम् ।। भोगं च मोक्षं च ददाति सत्कृता। शिवा शिवानन्दमयी जगज्जनिः ।। ९२ ।।
महांति पापानि सुदुर्द्धराणि। कर्माणि तेषामति दारुणानि ।। भवंति मातुः पुरतो नयैर्हि। निवेदितं दुःखमदुः
89 खिनः किम् ।। ९३ ।। परः परात्मा परया प्रदायां। माशिलष्य मारावसरे न एषः ।। प्रदर्शयामास निरिन्द्रिय
स्य स्वात्मारते जीव विभाव भावम् ।। ९४ ।। स्तुतिं प्रकुर्वन्ति महानुभावा नित्यं सदानन्दमयां जनन्याः ।। त्वं
ब्रह्मविद्या भजतां जनानां। मभक्तिभाजां किल कालरात्रिः ।। ९५ ।। देहादि संसक्त धियां विमोहनीम्—

५१

का॰ मायां परानन्दमयीं सतद्धियां ॥ शिवे शिवानन्दमये अधीश्वरी श्री पार्वति ज्ञानघनेऽम्बिके शिवे ॥ ९६ ॥ मातर्विशालाक्षि भ
वानि सुंदरि त्वामन्नपूर्णे शरणं प्रपद्ये ॥ एवं शिवानन्दमये शिवालये येभक्ति युक्ताः सततं भवानीं ॥ ९७ ॥ स्मरन्ति शृण्वंति ८
॥११२॥ गृणन्ति नित्यशो यजन्ति ते दुर्गति पारगामिनः ॥ शिवः शिवाज्ञां प्रतिपालयेत्सदा विशाख ढुंढी हरिकेशकेशवौ ॥ २०
९८ ॥ श्री कालराजः प्रमथाधिपास्तथा नंदीश भृंगीश मुनीश सूर्याः ॥ सर्वे यदाज्ञा प्रसमीक्ष्यका मुहुः काश्यां स्थितिं प्रा
प्नुवते सुखाय ॥ ९९ ॥ सुरासुराः कामहता मनुष्या विद्याधराः किन्नर यक्ष सिद्धाः ॥ नागाश्च गाः स्थावर जंगमाद्यं सर्वे वसन्त्यत्र
तव प्रसादात् ॥ १०० ॥ आहारमारोग्यमविघ्नवासं संप्राप्नुवन्ते गणिनाम याते ॥ तस्मान्न दैन्येन धनेन वास्या ह्रासः सतां
त्व चरणार्चनेन ॥ १ ॥ श्रीमद्भवानी सदनं समाप्य प्रदक्षिणीकृत्य तथाष्ट वारम् ॥ स्तुतिं प्रकुर्वन्ति नरोत्तमा ये प्रकृष्ट
गंधादिभिरुत्तमास्ते ॥ २ ॥ ते नत्कृतं प्राप्य मुदा मुकुंद ब्रह्मेन्द्र तुल्याः सुखिनो भवन्ति ॥ जय जय जगज्जननि जगज्जंबाल
न जाल निवारिणी ॥ जाता जात विश्वं मंजंतु जात जीवातुलते ॥ ३ ॥ जय जय यज्ञादि सकल धर्म फल प्रदे । जय जयम ॥११२॥

१ पाठान्तर- "मंजतु" - "मजातु"

१ पाठान्तर – "रिते" – "रते"
२ " – "निलमाद्या:" – "नामधेया"

हादेवि महादेव प्रिये महाफल प्रदे॥ महाक्षेत्र निवासिनि महा पातकौघ तूलदहने कृपावलोके॥ ४॥ जयजय भवानि
भवप्रिये भावभावित भावभक्त भवे जयजय पार्वति अपर्णे पर्ण फल प्रदान दारित दारिद्र्य पंजरे॥ जयजय उमे उन्न
मोन्नम सेवित चरण कमल नख किंजल्क प्रभे॥ ५॥ जयजयान्नपूर्णे अन्नप्रदान रिते अन्न प्रदानार्थि संघतत्परे
॥ अंधबधिर पंगु पतित महापापि शरणागत त्राण निरते॥ मोक्षार्थिनां मोक्षद नामधेया धर्मार्थिनां धर्म दर्चित
माध्या॥ ६॥ अर्थार्थि नाम धिद पाद पद्मा कामार्थिनां कामद कल्पवल्ली॥ उद्यद्भास्कर सन्निभां त्रिनयनां मा
१० णिक्य वर्णां शिवां पाशांकुश मिक्षुचाप मनिशं बाणान्दधानां पराम्॥ ७॥ ध्यात्वा कल्पलतां समस्त फलदां
नित्यां नितांत प्रियाम्॥ विश्वेशास्य विनायकस्य जननीं गौरीं नमे शंकराम्॥ ८॥ ये ये विमुक्ते श्रुति मातरं शि
वां शिवांक गां साधित भक्त कार्याम्॥ आर्यां भजन्ते परमादरेण दारिद्र्य बंधादि भयं न तेषाम्॥ ९॥ सर्व तीर्थ
मयी गौरी सर्वदेव मयी शिवा॥ सर्वधर्म मयी नित्या पूज्या काश्यां विशेषतः॥ १०॥ नी र्थानि सर्वाण्य गा हितानि॥

४२

यैः कोटिशः पुण्यपरैः कृतार्चैः ॥ ततोऽधिकं काशिकायां लभन्ते फलं विशालाक्षि तीर्थवेष्टन ॥११॥ ततोऽपि को

का० टिगुणितमंतर्गेहप्रदक्षिणाम् ॥ अंतर्गेहाद्दशगुणं भवानीसेवनं दक्षिणाम् ॥१२॥ प्रदक्षिणीकृता येन महापात र०

॥११३॥ कनाशिनी ॥ अष्टवारं सुकृतिभिर्नतेषां भ्रमणं भवेत् ॥१३॥ पत्रं पुष्पं फलं तोयं यत्किंचित्तु समर्पितम् ॥ 20

तदक्षयं फलं विप्रा भगवत्यै भवाज्ञया ॥१४॥ काश्यां भवानीं विभवैर्यजन्तो भवंति भावैर्भवपाशमुक्ताः ॥मुक्ताः

समस्तैः पुरुषार्थसंघैर्भवन्ति संभ्रान्ति पुनः कदाचित् ॥१५॥ भवानी पूजिता भीतिं नाशयत्येव नान्यथा ॥का

श्यां तेषां महाशान्तिर्जीविते जीविते तरे ॥१६॥ भर्त्ता सदानंदमयः परः शिवः पुत्रः सदा विघ्नरोगणाधि

पः ॥ आज्ञाकरो दंडपाणिस्तु यस्याः सा किं न यच्छत्यनुकूलदात्री ॥१७॥ काश्यां पापकृतो मोहिं कृत्वा-

काशिकया मृतम् ॥ पश्चात्तापेन संयुक्तो भवानीं भावयेद्वशी ॥१८॥ न करोति पुनः पापं मुक्तो भवति

तत्क्षणात् ॥ यातनास्तस्य नश्यन्ति कालभैरवचिंतिताः ॥१९॥ श्रीमद्भवानीं भवभावभंजनीं सेवन्ति ये

॥११३॥

भावयुता भवाब्धिम् ॥ तरंत्यवश्यं तरुणार्क सन्निभाः भवन्ति भाभिर्गतकल्मषाश्च ॥ २० ॥ मातरो भवभयैक भेषजं ॥
जन्तवः कृतरुजः स्वयं वत ॥ इन्द्रियैर्विषयदोषदूषितैः संगता नहि नमन्ति मातरम् ॥ २१ ॥ इति श्रीब्रह्मवैवर्त्ते
तृतीय विभागे भवानी माहात्म्ये विंशोऽध्यायः ॥ २० ॥ सूत उवाच व्यासेन तु पुरा प्रोक्तं नीचानामपि सत्तमाः ॥ २१
वस्तूत्तमं क्वचित्प्राप्य नाथमे रमते मनः ॥ १ ॥ मुनिभिस्तु पुरा पृष्टो व्यासो भागीरथी तटे ॥ प्राह काशिकथां दि
व्यां मुनींन्ना मन शृण्वताम् ॥ २ ॥ व्यास उवाच ॥ शृण्वन्तु ऋषयः सर्वे मुक्तिबीजमनुत्तमम् ॥ श्रद्धावते विरक्ता
य गुरुभक्ताय साधवे ॥ ३ ॥ देयमेतत्कथारत्नं श्राव्यं श्रवणमंगलम् ॥ काशीरहस्य मतुलं नानारत्नसमुद्भव
म ॥ ४ ॥ काशी दृष्टा येन पुंसा सुरार्च्या द्रष्टुं चान्यन्नेच्छते रूपवच्च ॥ श्रोत्राभ्यां वै यैः श्रुता काशिवार्त्ता तेषां
श्रोत्रं श्रोतुमन्यन्न वेत्ति ॥ ५ ॥ ये काशी गुणवर्णनेष्वभिरता स्तेषां न जिह्वा पुनर्निःसारं जनजन्मजीवनमति
प्रायं पुनर्वर्णयेत् ॥ येषां पादयुगं विसर्प्पति सदा श्रीकाशितीर्थे ध्वहो तेषां चंक्रमणं न भवेत्कैलासलोके

का. च्चपि ॥६॥ मनसा यैः काशिकायाः स्मृत मौदार्य मार्म्यकैः॥ तेषां मनो न सरति स्मरारि नगरीं विना ॥७॥ काशी काशीति
काशीति रसना रस संयुता ॥ यस्य कस्यापि भूयाच्चेत्सरसज्ञो न चेतरः ॥८॥ शृण्वन्तु रसिकाः सर्वे रसस्य परमां स्थिति ८.
॥११४॥ म् ॥ यामाश्रित्य रसः सम्यक् ज्ञायते रस कोविदैः ॥९॥ पुरा देवा सुरैः सर्वैर्मथितः क्षीर सागरः ॥ तत्र रत्नानि बहुधा २१
जातानीश्वरलीलया ॥१०॥ धन्वन्तरि करात्कुंभं गृहीत्वा सुरदानवाः ॥ अमृतस्यार्थे जगृहुः सुरा पानं समुत्थताः
॥११॥ स्त्री रूप मादाय जनार्दनेन कराद्गृहीतः कलशोऽमृतस्य ॥ तेषां सुरान्पाययदात्मतंत्रः सुधां सुरां दानव दैत्यव
र्यान् ॥१२॥ अप्यतेषु पिबत्स्वादौ सुरां सुरवरेषु च ॥ सैंहिकेयो वंचितान् स्वान् ज्ञात्वा देवेष्वपागमत् ॥१३॥ प्रवि
श्य दीनवदनो मां पायय सुधां हरे ॥ प्रपन्न पालनपरः प्रपन्नं पातु मर्हसि ॥१४॥ वेदैस्तपोभिर्ननु मंत्र यंत्रैर्मायाभिर
न्याभिरपि स्वर्थीभिः ॥ न वंचितुं त्वामल मत्र कश्चित्तस्माच्छरण्यं शरणं प्रपद्ये ॥१५॥ इत्युपांशुवचो राहोः श्रु
त्वामृत मपाययत् ॥ अखंडित ज्ञानवपुः परमात्मा जनार्दनः ॥१६॥ देव पंक्तौ प्रविष्टाय यस्मैते विष्णु परिचक्षते ॥

येदैत्य

दैत्यदानव गणास्ते पश्यन्ति हि मोहिनीम्। अर्द्धपीतेऽमृते राहुः पुष्पवन्तौ सुसूचितः ॥ तदेव तीक्ष्णधारेण शिरश्चि

च्छेद सत्पतिः ॥ १८॥ द्विधाकृतोऽपि स दैत्यो जीवितं न जहौ पुनः ॥ ग्रहेषु हरिणा युक्तः स आस्ते सम्मतं स्मरन् ॥

१९॥ कदाचिद्दानवा दैत्या मिलिताः पानकर्मणि ॥ राहुमाहूय ते चोचुः पीयतामासवं मधु ॥ २०॥ राहुरुवाच ॥ ना

हं पिबाम्यासवं हि मादकं ज्ञाननाशकम् ॥ पीत्वा पीयूषममृतं कः पिबेदासवं पुनः ॥ २१॥ दैत्या ऊचुः ॥ विना मांसं

विना मद्यं न क्षणस्तव गच्छति ॥ स्वल्पेनामृतपानेन बहु मद्यं त्यजस्यहो ॥ २२॥ राहुरुवाच ॥ २२॥ न विस्मरेद् ममा

१२ तं क्षणार्द्धमपि भोऽसुराः ॥ पीतामृतस्य जानाति स्वादुं नान्यः कथंचन ॥ २३॥ यस्मिन्मुखे विनिक्षिप्तममृतं

विष्णुना द्रुतम् ॥ तस्मिन्न पावनं मद्यं कथं दद्यां वराकवत् ॥ २४॥ व्यास उवाच ॥ इत्युक्तास्तेऽसुरा जग्मुरुपहस्य

तु मुह्यता ॥ अहो ऽति मूर्खोऽयं राहुः स्वल्पं पीत्वा बहु त्यजति ॥ २५॥ अत एव रसो येन यत्र प्राप्तः शुभाशुभे ॥ तत्रैव र

मते नित्यमविचार्य पुनः पुनः ॥ २६॥ सतां त्वधिकमेनश्चिद्विचारणवतां नृणाम् ॥ यद्वेद शास्त्रोक्तं रससेवि

का॰ ॥११५॥

नां काशिवासिनाम् ॥ २७॥ देवेन्द्रियाभिर्यैस्तु सेविता काशिका नृभिः ॥ तैरेवान्यरुचिश्चेत्स्यादज्ञत्वं किमतः परम् ॥ २८॥

शत्रुर्दैत्यः सुरापश्च देवब्राह्मणनिंदकः ॥ सदैवादमृतं प्राप्य न स्मरत्यन्यसौरसम् ॥ २९॥ किन्तु यैः काशिका दृष्टा स्तुता

चोक्ता च सेविता ॥ तेपि चेत्काशिकां शुद्धां ब्रह्मामृतरसप्लुतिम् ॥ ३०॥ न सेवन्ते सर्वरसां नीरसास्ते नराधमाः ॥ आदि

मध्यावसानेषु सरसा सुरसा त्वियम् ॥ ३१॥ काशिका सर्वरसिकैः सेव्या प्रार्थ्या त्वहर्निशम् ॥ काशी गंगा सेवनीया

प्रयत्नैः सर्वैर्लोकैः सिद्धसंघैर्दुरापा ॥ ३२॥ दृष्टा स्पृष्टा स्नानपानादिभिश्च मोक्षद्वारं संप्रयच्छेद्दृगाख्या ॥ पवित्रभा

व्यास्वयमेव गंगा पुनश्च्युता विष्णुपदात्ततोऽपि ॥ ३३॥ ब्रह्मापि लोकादपि मूर्ध्नि शंभोर्निपातानाद्भूतिसुपांडुरांगी ॥

उल्लंघ्य मार्गश्च भगीरथस्य काश्यां प्रविश्याप्य विमुक्तमंतः ॥ ३४॥ वाराणसीमध्यगतेष्वशेषेष्वाप्लुत्य कूपेषु स

रस्सु देवी ॥ महत्सु चाल्पेष्वपि पल्वलेषु वापीषु तत्स्यासु नदीषु पुण्या ॥ ३५॥ आराध्य लिंगान्यपि तत्रतत्र शंभोस्स्व

यंभूनि पवित्रभूता ॥ देवीमिमां सर्वयतोपदेशांत्संस्थाप्य लिंगं च परं स्वनाम्ना ॥ पुनस्तदन्तेपि समस्तभावैराराध्य ॥११५॥

१ पाठान्तर "तावन्" - "तावद"

विश्वेश्वर मर्पयेव ॥ मनोरथं सूर्य गुरोः स्मरन्ती प्रति श्रुतं तत्स्वयमात्मनोऽपि ॥ इहैवदिव्यावपुषास्थितापि प्रवाहतस्ते
न ययौ सरैव ॥ स्नानं शिवाभ्यां विधिनाच कर्त्री महाऽद्रोस्मिन्मणि कर्णि संज्ञके ॥ विश्वेश्वरौ तावन पूजयंती परैव
भक्त्याऽखिल देवताभ्याम् ॥ ३९ ॥ यज्ञार्थिनां यज्ञफलं यदत्र तीर्थार्थिनां तीर्थ फलं पवित्रम् ॥ योगार्थि नां योग फलंम
हृदानार्थि नां दानकृतं फलं स्यात् ॥ ४० ॥ गंगायां काशिसंबंधाद्विशेषेण प्रलभ्यते ॥ प्रायश्चित्त फलं सर्वं चतुर्वर्ग फलं
च यत् ॥ ४१ ॥ ब्रह्मविष्णु शिवरूपिणी सर्वयज्ञ फलदा शिवप्रदा ॥ सर्वदान जपभोग मोगदा गंगया नहि समं जग
त्त्रये ॥ ४२ ॥ गंगामनाराध्य जगत्प्रसूतिं प्रसूति मुक्तिः कथमातुरस्य ॥ ब्रह्मादिषां व्याकुलमानसानामयोगिनां व्याप्
13 त गात्र वाचां ॥ ४३ ॥ दरिद्रदीनान्ध कुकर्मिणां च गंगैव निस्तार गणेषु मुख्या ॥ गंगा सुतीर्थैः परिसेवितेयं मा
ध्याविमुक्ते परिसेवितेया ॥ ४४ ॥ सुदुर्लभं श्रद्धया मानुषाणां गंगापरार्थे रहिता नितान्तम् ॥ काश्यां गंगा प्राप्य
ते पुण्य भारैर्विश्वेश्वरस्यानुग्रह साधुचेत्स्यात् ॥ ४५ ॥ तेषां श्रद्धा जायते मोक्षहेतु गंगैवात्मा विष्णुमूर्तिर्जला

६५

ज्ञा ॥ अत्रैवोदाहरन्तीमा मितिहासं पुरातनम् ॥ ४६॥ गंगा माहात्म्य संयुक्तं शृण्वन्नु परमप्रियः॥ पांड्य देशाधिपोराजा

का० पुण्यकीर्त्ति रिति श्रुतः॥ ४७॥ विविधानि पुराणानि इतिहासान्यथा शृणोत्॥ विश्वाः काव्यानि सद्वृत्तः शृणोति सनि ८

॥ ११६॥ रन्तरम्॥ ४८॥ सर्व शास्त्रेषु गंगैव महद्भिः प्रतिपाद्यते॥ गंगेव पुरुषार्थो हि सर्व सार विचारिणाम्॥ ४९॥ मानुष्य

देहं संप्राप्य यदि गंगां न सेविनः॥ गर्भवासादि शमनं न तेषां जायते क्वचित्॥ ५०॥ गंगैव धर्मः खलु मोक्षोऽपि गंगा॥

गंगा सुखं चार्थ इयंपि गंगा॥ जलं चतुर्विधस्यापि सुखस्य दात्री गंगां भजे द्विष्णु शिव प्रियोयः॥ ५१॥ इति

शृण्वन्पठन् राजा गंगाजल निसेवकः॥ स्नान भोजन पानादीन् सर्वं गंगा जलेन हि॥ ५२॥ करोति श्रद्धया युक्तो

गंगा स्मरण तत्परः॥ एवं स राजा गंगात्मा सर्वावस्था सु तत्परः॥ ५३॥ चकार साक्षात्त्रिस्रोतां वरं वरय भाषिणीम्

॥ राजोवाच॥ प्रत्यहं यदि देयोवरो मत्सं देवि प्रार्थं वदस्व तत्॥ ५४॥ येन त्वां प्रत्यहं मातः पश्यामममत रूपिणीम्॥

गंगोवाच॥ ॥ प्रत्यहं देवतानां च दर्शनं न भवत्यलम्॥ ५५॥ कदाचिद्दूर कालेच दर्शयन्तीह देवताः॥ प्रत्यहं राज शार्दूल द ॥ ११६॥

र्शनं त्वं यदीच्छसि ॥ ५६॥ तदा मद्गेह मागच्छ भविष्यति न संशयः॥ राजोवाच ॥ ब्रह्मांड सूत्र रूपिण्याः क्वास्ते गेहं
तवार्थदे ॥ ब्रह्मांडानामनेकानामाधारः प्रकृतिःपरा ॥ ५७॥ त्वमेव सर्व जगतां चिच्छक्तिः साधु संमता ॥ त्वयाततं
मिदं देवि जगदात्म स्वरूपया ॥ ५८॥ ब्रह्मविद्या गृहं मातर्न दृष्टं न मया श्रुतम् ॥ तद्गृहं ज्ञातु मिच्छामि मन्त्रत्वां
प्रत्यहं त्वहम् ॥ ५९॥ पश्यामि सर्वजगतां मातरं मानवर्जिताम् ॥ गंगोवाच ॥ ब्रह्मांड व्यापिकाचाहं मवश्यं राजस
त्तम ॥ ६०॥ तथापि काश्यां मद्गेहं रमेतु भर्त्रा सुसंगता ॥ काश्यां सर्वात्मना विष्णुः शिवः सूर्यो विधिस्तथा ॥ ६१॥
94 अन्येऽपि देवप्रवरा ऋषयो योगिनस्तथा ॥ वसंति काश्यां सततं परब्रह्म सुखार्थिनः ॥ ६२॥ जितेन्द्रियाणां शान्तानां
विषयाग्रस्तचेतसाम् ॥ जायते परमानन्दो ह्यस्कल्मषधियां सदा ॥ ६३॥ गच्छ राजन्काशिपुरीं मां द्रक्ष्यसि निरन्त
रम् ॥ पुत्राय राज्यं विनिवेश्य सद्धनम् ॥ प्रशस्य निर्विण्ण मनाः सभार्यः ॥ ६४॥ गत्वा भक्तेश्वर पूजकः सुखं तिष्ठस्व
काश्यां विजितेन्द्रियारिः ॥ पश्यंति सर्वे मनुजाः सर्वान् देवाञ्शिवालये ॥ ६५॥ स्वल्पपापासे न सक्षेत्रःसामर्थ्येन

गत क्लमाः ॥ इत्युक्त्वा तर्हिता गंगा रूपिणी भक्तवत्सला ॥ ६६ ॥ राजापि गंगावचनं श्रुत्वाश्चर्य समन्वितः ॥ गंगावक्त्र
मनुस्मृत्य काशीं गंतुं समुद्यतः ॥ ६७ ॥ पुत्राय राज्यं विनिवेश्य भार्यया गंगां स्मरन् काशिवासाभिलाषिणः ॥ चचाल
गेहात्सु समृद्धि पूरितो गंगां दिदृक्षुः सततं सिद्धि रूपाम् ॥ ६८ ॥ सपुण्यकीर्तिः सुसमेत्य काशीं स्त्रिया स्वभृत्यैः परमर्षिभि
श्च ॥ स्नात्वा परार्द्धे सच विष्णु पद्यां देवं ददर्शाग्निहरं हरिं च ॥ ६९ ॥ सर्वस्वं ब्राह्मणेभ्यश्च ददौ राजा महामनाः ॥ भृत्य
वर्गं विहायात्र महिष्या सह संस्थितवान् ॥ ७० ॥ गंगास्नानं त्रिषवणं चकार श्रद्धयान्वितः ॥ पूजनं स्मरणं सेवां गंगा
याः श्रवणं नतिम् ॥ ७१ ॥ पुण्यकीर्तिर्महातेजाः करोति विधि पूर्वकम् ॥ एवं राजा भजन्नित्यं ददर्श सुरनिम्नगाम् ॥
प्रसन्न वदनां गंगां वरदाभयसत्कराम् ॥ ७२ ॥ उवाच राजन्वरयस्व कामान् संप्रार्थितान्देव गणैरलभ्यान् ॥ का
श्यां प्रपश्यस्व महानुभावान्देवानृषीन्वरदां मां च विश्वाम् ॥ ७३ ॥ राजोवाच ॥ पश्यामि मातर्वरदां भवाब्धिना
वं विचित्रां भव पारनेत्रीम् ॥ सुदर्शनस्पर्शसुचिंतनाद्यैः कृतः कृतार्थो ऽस्म्यहमीश्वरि त्वया ॥ ७३ ॥ पश्यामि देवान्

देवाश्चैव विष्णुश्चात्र गणेश सूर्य प्रभृती न्सुरस्ते ॥ तव प्रसादात्पुरुषार्थ दायिनी त्वया कृतार्थोस्म्यनघैव सारिणी ॥ ७४॥
गंगोवाच ॥ न मत्प्रसादो न तवोऽथ धर्मोऽयं श्री काशिकायाः परमः प्रभावः ॥ यदत्र देवा मुनयः सुसंयुता स्तिष्ठन्ति दृश्याः सुजि
तेन्द्रियाणाम् ॥ ७५॥ राजोवाच ॥ अहो माहात्म्य मतुलं काश्याः सर्व सुर प्रियम् ॥ त्वं चापि यां दिवा रात्रं स्मरस्याश्चाजग
ज्जनिः ॥ ७६॥ कथं काशी किं भावा केनाख्याता कियत्स्थितिः ॥ केन प्राप्या किं प्रयच्छत्यहो मातः प्रकथ्यताम् ॥ ७७॥
गंगोवाच ॥ चित्कला काशिकातात प्रभावो ऽस्या विमोचनम् ॥ विष्णुना ख्याति मायाति पंचक्रोशात्मका स्थितिः ॥
॥ ७८॥ जितेन्द्रियै र्धर्मपरैः प्राप्या यच्छति शाश्वतम् ॥ राजोवाच ॥ प्रभाव श्रवणे श्रद्धा मे प्रवृत्ता मुत्व न्मुखात्परम् ॥ ७९
नान्यं वरं वृणे मातः काश्यां शंस कृपावति ॥ गंगोवाच ॥ न मया वर्णितुं शक्या काशी वर्ष शतैरपि ॥ तथापि तव संतु
95 ष्ट्यै वर्णयामि शृणुष्व तत ॥ ८०॥ पवित्र माम्नाय सतत्त्व गम्यं पञ्चब्रह्म संसाधयितुं प्रयत्नः ॥ देव द्विज ब्रह्म सुदेवता
नां तत्काशि रूपं सुलभं न सम्यक् ॥ ८१॥ उमासहायः शशि शेखरोऽत्र लक्ष्मी सहायो मधुसूदनोऽत्र ॥ धर्मः सुखं श

८१

का.

न्नि युतं यदत्र सतो विमुक्तं परमं पदं यत् ॥ ८२॥ यज्ञार्थीनां यज्ञफलं यदत्र तीर्थार्थीनां तीर्थफलं पवित्रम् ॥ योगा

र्थीनां योग फलं न येश दानार्थीनां दानफलं विशिष्टम् ॥ ८३॥ भवेदवश्यं नहि संशयः शुभः काश्यां कृतो देवपराभ २:

॥११८॥ वः स्यात् ॥ देवं पराभूय जगद्गुरुं हरिं संयात्यवश्यं नरकान् शेषान् ॥ ८४॥ काशिका सकलतीर्थ सेविता काशि २१

का सकलदेव पूजिता ॥ काशिका सकल शास्त्र रूपिता काशिका पर पद प्रकाशिका ॥ ८५॥ स्थितिः काश्यां

येषां परम सुख संतान सुखिनां सतां संगान्नित्यं हरिहर कथा स्वादन जुषाम् ॥ न चेदेकान्ते येर्विविध जनवा

दादि रहिते विविक्ते तैः प्राप्तं शिवमखिल सौख्यैक निलयम् ॥ ८६॥ शांताः सज्जन वृत्तयः सुमनसः सारं

ग संगान्विताः सेवन्ते सततं शिवो शिवपरा विष्णु प्रियाः साधकाः ॥ सामान्य व्यवहार दूर मनसः संप्रार्थिताः

सौख्यदाः सारासारविवेक युक्त मनसो भूयु यदत्रास्ति तत् ॥ ८७॥ आस्वादन परा येच काशिजं परमामृतम्

॥ त एव पृष्ठा यद्भूयुस्तत्सुखं मोक्षलक्षणम् ॥ ८८॥ नहि व्यापृत चित्तानां लुब्धानां काम कामिनाम् ॥ ८९॥

॥११८

१ पाठान्तर -- "नियतितस्य" - निपातितस्य"

प्रकाशते परब्रह्म शांत साध्यं दुरात्मनाम् ॥ राजा श्री क्षेत्राधिकारः कर्ता सिंहासनस्थितः ॥ ९० ॥ कथं राज्ये
सुखं तत्र वद्धो नियतितस्य च ॥ योगे यज्ञे स्तीर्थे सद्गुन दाने लोकस्यात्मा साधने व्याकुलः स्यात् ॥ ९१ ॥ काश्यां
शान्त्या संस्थितानां नराणां मुख्या शान्तिर्जायते नेतरेषाम् ॥ न भोगभूमिः खलु काशिकेयं न धर्मवंधोऽपलवोऽ
पि चात्र ॥ मोक्षोऽपि नानाविधसाध्यसिद्धेर्न साध्यतेऽन्यत्र यथा दुरापः ॥ ९२ ॥ भोग बुद्ध्याङ्कुरापानं परदारा
भिमर्शनम् ॥ निक्षेपहरणं स्वर्णद्रोहः सर्वस्य चापिहि ॥ ९३ ॥ सर्वा प्रवृत्तिर्भूतानां सुखबुद्ध्या न चान्यथा ॥
काश्यां त्यागोऽपि हि तथा विज्ञेयः कामकारितः ॥ ९४ ॥ सुखमेव न जानन्ति विषयासक्तबुद्धयः ॥ सुखं का
शिज मेवाहुः शांताः सद्गुनयोऽमलाः ॥ ९५ ॥ जले विलोडिते प्रसन् कालुष्यं विंबघातकम् ॥ स्वच्छे बिंबे प्रति
९६ बिंब प्रतीतिः पुरुषस्य हि ॥ ९६ ॥ तथा काश्यां व्याप्तानां नैवात्मा प्रतिबिंबति ॥ अतः कदाचिथ्ये केचित्त्र
भुवन्ति गतव्यथाः ॥ ९७ ॥ येषां प्रियतरः कृष्णः परमात्मा प्रियाप्रियः ॥ नान्ये पुत्राः पुत्र पुत्राः प्रियादापः प्रिया

४-८

का. जनाः॥ ९८॥ अतो वै चिद्घनं रूपं काश्यां पश्यन्ति साधवः॥ धनधान्य गृहक्षेत्र मित्राणि पशवस्तथा॥ ९९॥ यत्संपर्कात्प्रि
॥११९॥ याणि स्युस्तमात्मानं हरिं भज॥ यदनुग्रहलेशेन काशिका न सुदुर्लभा॥ १००॥ प्रियाणि किं शोककराणि संति प्रियाणि र.
किं व्याकुलयन्ति चित्तम्॥ प्रियाणि किं वस्तुवस्तूनि संति प्रियः परात्मा हरिरेक एव॥ १॥ राजोवाच॥ कथं परात्मा काशि
कायां हृदि वर्तते निशं कथं प्रियार्थं यतते जनः शुचिः॥ २॥ गंगोवाच॥ येनत्यजन्ति सततं गुरुं सच्छास्त्रविग्रहम्॥
तेषां हरिः प्रियतरो भवत्येव न संशयः॥ ३॥ सत्सु प्रीत्या कथा प्रीति स्तत्प्रीत्या विष्णुरव्ययः॥ वल्लभो जायते नृणां श्रु
तवल्लभ वल्लभः॥ ४॥ ये शास्त्रविग्रहं देवं गुरुं न प्रभजन्त्युत॥ सेवनैर्दान मानैश्च न तेषां श्रवणं भवेत्॥ ५॥ ते
षां श्रवणमपार्थाय श्रुतं श्रवणं विना॥ तेषां न वित्तं न शरीर सेवा परोपकारोऽपि न चास्ति सम्यक्॥ ६॥ न ते सुपापे
षु वसन्त्यवश्यं कथामृतं काशिकायाः प्रियायाः॥ ये पश्यन्ति महादेवं गुरुं मानुषरूपिणम्॥ ७॥ धर्मज्ञानादिवक्ता
रं न तेषां हरिदर्शनम्॥ हितं न जानन्ति जना महात्मा हितं सदा श्रवणं कारयेध्थः॥ ८॥ देवेषु शास्त्रे ष्वपि चोत्तमा

॥११९॥

१०९

दो॥ गुरुः सुसेव्योसविमुक्तबक्ता ॥ कुलं शील मथाचार मविचार्य गुरुं हरिम् ॥ ९॥ भजेत श्रवयाव्यर्पीं सर संसार
सागरम् ॥ गुरुर्ध्वति शयोवत्स ज्ञातव्यः सु महात्मसु ॥१०॥ येषा मनुग्रहात्पुंसां समदृष्टिः प्रवर्तते ॥ तेषां मत्कोशभू
तानां नापराधं समाचरेत् ॥११॥ गुण एव सदाग्राह्यो, न दोषो हि कथंचन ॥ गुरूक्त शास्त्र संपर्कात् अन्ये ह्यपि
राजोवाच॥
शनैःशनैः ॥१२॥ दोष दृष्टिं न कुर्वीत श्रुत्वा शास्त्रामृतं महत् ॥ मातः के गुरवः कार्याः किं शीलाः किंच जानताः ॥
येषां प्रसादाच्छास्त्रार्थ स्ति छन्यात्मनि संमतः ॥१३॥ गंगोवाच ॥ विष्णु प्रियाःशिव रता वेदवेदार्थ रूपकाः ॥ भ
क्ता भक्ति प्रदाः शांता गुरवः परिकीर्तिताः ॥१४॥ भक्ताः पापहराः समस्त जगतां भक्ताः परं साधवो भक्ताएव पु
नन्ति तीर्थ नन यो भक्ता सुसक्ता मयि ॥ भक्ते ह्येव सुनिश्चिताः परनराः संसिद्धयो भूरिशो भक्ता नाशुन संत्यजे
97 न्सु मनसो भक्तेषु विष्णुःस्थितः ॥१५॥ सूत उवाच ॥ इत्युक्तां तर्हिता गंगा पुण्य कीर्तिं महीपतिम् ॥ सोऽपि काश्यां
ददर्शातो देवान् गंगांच नित्यशः ॥१६॥ काश्याः परां कथा मेतां गंगा माहात्म्य संयुतां ॥ यः शृणोति श्राव

यति सर्व पापैः प्रमुच्यते ॥१७॥ अविमुक्तस्य गंगाया गुरोर्विष्णोः शिवस्य च ॥ यः शृणोति कथां दिव्यां स याति परमां ग

का. तिं ॥१८॥ इति श्री ब्रह्मवैवर्त्ते तृतीय विभागे एकविंशतितमोऽध्यायः ॥२१॥ ऋषय ऊचुः ॥ सूत काशिकथां श्रुत्वा ये

॥१२०॥ ऽलं बुद्धिमुपासते ॥ तेऽलं सुखाय मोक्षाय धर्मादिगुण संयुताः ॥१॥ नरकार्णव भीत्यापि न काशीं श्रयते जनः ॥ मोक्षधर्मा

दिकामाय भजनं कुत्र प्रकल्प्यताम् ॥२॥ सूत उवाच ॥ नरकार्णव भीतिः कथनोपहत चेतसाम् ॥ धनेषु लग्नं हि मनः

केन संह्रियते पुनः ॥३॥ द्विविधं धनमित्याहुः पंडिताः पारदर्शिनः ॥ एकं बंधाय पापानामपरं मोक्षसाधनम् ॥४॥

पापाय देहादिषु यत्प्रयुक्तं पुण्याय विप्रादिषु यत्प्रयुक्तम् ॥ पुण्योपि पक्षद्वयमादरेण ध्यायन्नु काम्यं त्वपमुक्तिरेतम् ॥५॥

काम्यं विषय भोगार्थमिहामुत्र प्रयुज्यते ॥ मोक्षाय सुकृतं तद्धि ब्रह्मार्पणधिया कृतम् ॥६॥ धनार्थं मानुषं देहं व्ययीकुर्वंति

ये नराः ॥ न तेषां जन्म सारत्वैः पापस्यान्तः प्रजायते ॥७॥ नरके परिपच्यन्ते पामरा धनलोलुपाः ॥ ऋषय ऊचुः ॥ कति संती

ह नरकाः पापिनां दुःखहेतवः ॥ केन पापेन कः कस्मिन्नरके परिपच्यते ॥८॥ कुत्र वा नरकाः संति लक्षणं किं महामते ॥ न

22

रकाणां स्थलं कीदृक् कियद्दूरं तदुच्यताम् ॥ सूत उवाच ॥ ९॥ संख्या पाप विशेषाश्च पापिष्ठाः स्थानमेव च ॥ लक्षणं कियद्दू
रं कालादि गणनं पृथक् ॥ १०॥ नरकाणां स्वरूपं च राज्ञा संवरणे न च ॥ पृष्टो देवर्षि वर्योऽत्र नारदः कथयिष्यति ॥ ११॥ तत्
नः प्रवक्ष्यामि श्रृणवं तत्त्र समासतः ॥ धर्मराजस्य नगरी शुभा संयमनी मता ॥ १२॥ तत्र धर्म सभायां तु राजानो धार्मिकाः स
दा ॥ सभा सदो धर्मपरा महासुख समन्विताः ॥ १३॥ धार्मिकाणां धर्मराजः पापिष्ठानां महायमः ॥ यमदूतैः परिवृतो दृश्य
ते भीषणाकृतिः ॥ १४॥ धर्मराज सभायां तु ऋषयो ब्रह्मतत्पराः ॥ ब्रह्मार्थ कोविदा ब्रह्म विचारण परा मुदुः ॥ १५॥ यमं क्रूरः
स सर्वेषः छिंधि भिंधि विपाटय ॥ यमदूतं सभायां तु वदत्याकुल मानसः ॥ १६॥ निर्दय स्ताडन परस्तत्त कर्म प्रवर्तितः ॥
तस्य तस्य तथा शास्तिं करोति क्षालयन् यमः ॥ १७॥ दुष्कृतं स्मारयन् जीवान्मानुष्यं पुरुषार्थ दम् ॥ ऋषय ऊचुः ॥ पापि
98 नः संयमिन्यां किं सर्वे नीयन्त एव हि ॥ १८॥ किंवान्यत्रापि नरकाः सन्ति सूत वदस्व नः ॥ सूत उवाच ॥ ज्ञात्वा ज्ञात्वापि–
ये पापं कुर्वन्ति मनुजाः सदा ॥ १९॥ ज्ञात्वा ज्ञात्वा तस्य भोगः कार्यते ह परत्र च ॥ ऋषय ऊचुः ॥ ज्ञात्वा कृतानां पापा

१५ शब्दाः "प्राय:" — "स्वनः"

५०

का॰ नां कथं प्रायः प्रवर्तते ।। २०।। अज्ञात्वापि कृतानां च कथ्यतां सत्तम सुव्रतः ।। सूत उवाच ।। वक्तारः सर्व शास्त्राणां श्रोतारश्च म

हाधियः ।। २१।। कुर्वन्ति स्वेच्छया पापाः पानि विविधानि ये ।। तेषां नरक संदोहः संयमिन्याः प्रदायते ।। २२।। तानुपालभते धर्मराजः

।। १२१।। कालवपुर्नरान् ।। मानुष्यं प्राप्य धर्मादि साधनं नाशितं कुतः ।। २३।। सहध्वं यातनास्तीव्रा दुःसहा विविधाः स्वयम् ।। एवमुक्त्वा

यमो दूतानाह क्रोधसमन्वितः ।। २४।। ताडयध्वं ताडयध्वं हि निर्दया मम शासनात् ।। इत्युक्त्वा विमना भूत्वा गतो धर्मसभां

यमः ।। २५।। ऋषय ऊचुः ।। कथं स विमना जातो धर्मराजः प्रकुप्य च ।। किंवा धर्म सभायां च एष्टः सद्भिरुवाच रः ।। २६।।

सूत उवाच ।। ऋषयो देव ऋषयो राजानो धार्मिकास्तथा ।। अन्येऽपि शुभ कर्तारो धर्मराज मुपासते ।। २७।। तैर्दृष्टो वि

मनाः स्वामी संयमिन्याः प्रतापवान् ।। पप्रच्छुस्ते सदस्यास्तं शिवविष्णु परायणम् ।। २८।। अथ चिंता समस्ती दृश्यते तव

सर्वग ।। न तन्मूलं विजानीमो मन्यसे तद्वदस्व नः ।। २९।। धर्मराज उवाच ।। शृणवन्तु देवा ऋषय आश्चर्यं महदद्य मे ।।

मनुष्या भारते खंडे बलाद्दुःखं हि भुंजते ।। ३०।। जंबूद्वीपं महासारं पृथिव्याः सर्व सौख्यदम् ।। तत्रापि भारतं खंडं तत्रा

र्यावर्त भूमिका ॥ तत्रापि सर्वतीर्थानि सर्वक्षेत्राणि सत्तमाः ॥ धर्माधिकारिणो येच येच ज्ञानाधिकारिणः ॥ ३२॥ तेऽ

प्यकाम पराभूत्वा नाशयंति जनाः शुभम् ॥ भोगाभासेन मुग्धाक्षा धर्मवैराग्य वर्जिताः ॥ ३३॥ लभन्ते यातनादीना मानु-

ष्यं प्राप्य सर्वदम् ॥ अहो वराकाः संहृष्टा॰ रोदितव्ये मुहुर्मुहुः ॥ प्रहृष्टाः प्रहसन्तोऽन्यान् विरक्तान्विषयात्मकाः ॥ मानुष्य

देहममतं साधनं प्राप्य दुर्धियः ३५॥ विषयेषु विषज्जन्ते घातयंति स्वमात्मना ॥ मानुष्यं प्राप्य सुभगाः साधयन्ति परं

पदम् ॥ ३६॥ तदेव प्राप्य दुर्वृत्ता इहामुत्र च दुःखिताः ॥ भवंति, माययात्मानं घातयंति स्वयं शिवम् ॥ ३७॥ सद-

हु

स्या ऊचुः ॥ कथमात्मा मुद्धृत स्यात्संसारादुःखरूपिणः ॥ कथं सुखमवाप्येत मनुजैर्मोहवर्जितम् ॥ ३८॥ वेदवे

धर्मराजेश्वर।

दार्थतत्त्वज्ञ ईश्वरः सर्वदेहिनाम् ॥ क्रममाचक्ष्व मनुजा यथा सुखमवाप्नुयुः ॥ ३९॥ सभ्याः शृणुत भद्रं वो यथा

धर्मराजोवाच ॥

१० नृणां शुभात्मनां ॥ पुण्यभाजां प्रभवन्ति तथावच्मि क्रमात्तमम् ॥ ४०॥ महासुकृतिनां संगः सतां भवति निश्चलः ॥

चा

तत्प्रसादाद्धर्मकथा वर्णाश्रम निबंधनाः ॥ ४१॥ सदारमनः शुद्धिकारिण्यो मार्गदानृणाम् ॥ भवन्ति पुण्यभाजां

का॰ तायावज्जीव मनारतम् ॥ ४२॥ शास्त्र सज्जन संसर्गो महतामेव जायते ॥ विध्वितः पाप पाखंड विषय ग्रस्त चेतसां ॥४३॥ र॰
॥१२२॥ श्रवणं धर्म शास्त्राणां सदाचार स्ततः परम् ॥ ततो धर्मप्रवृत्ति र्हि ततो विश्वास उत्तमः ॥ ४४ ॥ धर्मप्रवृत्ति र्द्विविधा 22
सकामा कामवर्जिता ॥ विधि वैगुण्य रहिता इहामुत्र सुख प्रदा ॥ ४५॥ स्वनुष्ठितो वेद मार्गः साधयेत्किं नदेहिनाम् ॥
स्वर्गार्थर्यं कृतः सभ्याः सावधानै र्महात्मभिः ॥ ४६॥ अवश्यं साधयत्येव तत्तत्फल मना मयम् ॥ सभ्या ऊचुः ॥ निष्कामं
कोनु मिच्छा मे मार्गं वेदस्य तद्वद ॥ ४७ ॥ कोऽधिकारी फलं तत्र धर्मराज वदस्व नः ॥ धर्मराज उवाच ॥ गर्भवासा
दि गहने यस्य खेदः प्रजायते ॥ सनैष्कर्म्य परोभूत्वा संसारे सुख मानुयात् ॥४८॥ एक एवोभयत्रापि धर्मः कामी मुमुक्षु
भिः ॥ कृतस्तत्या द्विधा सभ्याः सुखं मोक्षंच यच्छति ॥ ४९ ॥ श्रुति स्मृति पुराणोक्तं लौकिकंवापि सत्तमाः ॥ अर्पितं
ब्रह्मणि परे कर्म संसार मोचकम् ॥ ५०॥ विराग रागयोः सभ्याः फलं मोक्षोऽप्य बन्धनम् ॥ विरक्ता नश्वरं सर्वं पश्यंति ब्रह्म बुद्ध
यः ॥ ५१॥ वैराग्या त्सुदृढं ज्ञानं वैराग्यात्सु दृढं तपः ॥ वैराग्या त्सुदृढो धर्मो वैराग्या त्सुख मुत्तमम् ॥५२॥ भवत्येव न्नया

मन्न वैराग्यात्पाप संक्षयः ॥ तस्माद्विरक्तैर्धर्मादि यत्कृतं सफलं भवेत् ॥ ५३॥ ऋषय ऊचुः ॥ केचित् क्रूरं महाभीमं के
चिद्धर्म तनुं शुभम् ॥ पश्यंति त्वां धर्मराज ह्येक मेव द्विधा कथम् ॥ ५४ ॥ धर्मराज उवाच ॥ एक एवाहमव्यग्रो ना
न्योऽस्मि हि कदाचन ॥ पुण्य पापात्मनां दृष्टिः क्रूरा क्रूरतरा अपि ॥ ५५ ॥ स्वहृद्भवजनाः क्रूर मक्रूरं कल्पयंति हि ॥ पुण्य
पापानुरोधेन तेषां दृष्टिः प्रवर्तते ॥ ५६ ॥ पुण्यात्मनां शुभा दृष्टि रशुभा पापकर्मिणाम् ॥ बलात्पतंति नरके नरादे
न्य विहिंसिताः ॥ ५७ ॥ सर्वत्र दैन्यत्यागेन क्व दुःखं निरयश्च कः ॥ यदा धनादिषु प्रीतिर्न भवेत्सुकृतैर्धनैः ॥ ५८ ॥ ता
दा प्रीतिर्भगवति वासुदेवे शिवे भवेत् ॥ एकमेव मनः सम्यग्विषये वा परात्मनि ॥ ५९ ॥ योजितं याति सततं नृणा
मेव तदात्मताम् ॥ धनस्नेहा दधो ज्ञाति पुण्य स्नेहा दुपर्यति ॥ ६० ॥ हरि स्नेहाद्व्यापकत्वं विचार्य स्नेह माचरेत् ॥ नरः
140 कनक बद्धो यः कनकान्मुच्यते हि सः ॥ ६१ ॥ पवित्रं कनकं प्रोक्त मपवित्रं परं मुस्मृतम् ॥ भोग साधन बुद्ध्यात् रक्षितं
नरकावहम् ॥ ६२ ॥ अपवित्रं परं प्राहु र्द्रव्यं शुद्धि विघातकम् ॥ व्ययीकृतं विष्णु बुद्ध्या महा पावन पावनम् ॥ ६३ ॥

का. मदीय सुख पुंगस्य साधनं मदुपार्जितम्।। पुत्र पौत्र प्रपौत्राणां जीवनं नङ्क्षविष्यति ।।६४।। नश्यत्येव धनं सम्या राजन श्चौ
॥१२३॥ रतः स्वतः।। पुत्र मित्र कलत्रार्थे भुज्यते पाप संचितम्।। ६५।। संचितं धर्मतो वित्तं द्विजैर्धर्मेण भुज्यते।। इति लोभपरः र.
स्वर्ण संग्रहेच्छुरनात्मवान् ।। ६६।। नरकं याति कृपणः स्वर्ण काम समावृतः ।। तदेव सर्वेश्वरगं सर्वार्थदमनिन्दितम्।। २२
६७।। लक्ष्मीकान्तस्य सकलं धनं लक्ष्म्यां शतः खलु ।। स्वाम्यहं वित्तजातस्या भिमानादिति च ध्रुवम्।। ६८।। नरकं
याति पुरुषः पुण्य ज्ञान विवर्जितः।। न सुवर्ण समं मित्रं न सुवर्ण समो रिपुः।। मैत्रीं विहायानुकथं शत्रुत्वं साधये द्वु
धः।। कलौ कलिर्वासम कल्पयत्स्वं सुवर्ण सौवर्ण विकारवत्सु ।। ७०।। समस्तवस्तुष्व विचारिणां नराणां ज्ञानिनां
लोलुपध्वन्तिचेतसाम्।। एतज्ज्ञात्वा यो विचार्याशु विष्णौ रौद्रं रेतः संविभज्यार्पयेत।।७१।।मोक्षं दध्यादन्य देशेऽपि विष्णुः।।
वित्तं दध्यात्किं पुनः काशिकादौ।। परं पदं काशिकां विष्णुरूपां निध्याय बद्धानाद्रियंते धनाशाः।। यथे छ भोगाचरणाः
सुदुर्धियो, देहे गेहे ध्वध्मः साधु शून्याः ।। प्रमादात्पतिते पापे प्रायश्चित्तादिना जनः ।।७३।। नाशयत्यात्मनः पापं नव

ष्ठि कृत मप्यपि ॥ पुत्रस्यापि पिता शास्तिं कुर्यात्प्राण समस्य हि ॥७४॥ अपराधिनं पुनः शिक्षां करोति स्नेह[illegible]तोऽसकृत् ॥ उक्त पुनर्दौष्ट्यं पापरूपं माकुरु त्वेति शिक्षयेत् ॥७५॥ पुनः करोति चेद्दुष्टः अपराधं सुदुर्मनाः ॥ अप्रियो जायते पुनः प्रियोऽपि पितृदोषकृत् ॥७६॥ तथा जगत्पिता रुद्रः शास्तिं कृत्वा सुतारयेत् ॥ दुःखं दत्वा तथा कृत्वा भुक्त्वा तरणं किं प्रकाश्यते ॥७७॥ अन एवान्यथा पाप परित्यागः शुभो मतः ॥ काश्यां जीवन पर्य्यासं हिरण्यं सुखदं भवेत् ॥७८॥ भुंजते ये महात्मानस्तदा वाराणसिवासिनः ॥ अनित्यतानुसंधेया जगतो विकृतात्मनः ॥७९॥ परतः स्वतस्तथा शास्त्रा दृष्टश्रुत विचारतः ॥ तथापि नवसेच्चेतो यस्य तं नाभिभाषते ॥८०॥ उपदेशः प्र[illegible]स्तराणां नहि स्वार्थकृदुच्यते ॥ बंधोनादिर्मनुष्याणां प्रवाहेण पुनः पुनः ॥८१॥ स एव रोचते येषां वद्धास्ते पशवो यथा ॥ पशवो विबुधा दैत्या ऋषयः पन्नगाः खगाः ॥८२॥ सर्वे वद्धाः
10 / पाशजालैः प्राकृतैर्मनुजोऽधिकं ॥ बद्धा एव पुनर्बंध्यं दृढयन्त्य विपश्चितः ॥८३॥ अतः पशुपतिं देवं भजेत्पाश विमुक्तये ॥ भजनं दुर्लभं तच्च भवेत्काश्युन्मुखस्य च ॥८४॥ काश्यां प्रविश्य पुरुषो भवेद्रुद्र तनुर्मरान् ॥ नव्रते

र्न तपोभिश्च न पांडित्यादि साधनैः ॥ ८५ ॥ न योग नु यागादियमैः प्राप्यते केशवाज्ञया ॥ नीराग मानसैर्भक्तै र्निष्पापैः पु
ण्य तत्परैः ॥ ८६ ॥ प्राप्यते मोक्ष जननी महापाशु पतैस्तथा ॥ सुसाधन सहस्रैस्तु न प्यातु ष्यातिन क्वचित् ॥ ८७ ॥ यथाः र॰
ऽत्य जनानांच यथा शक्त्युप कारतः ॥ काशिस्थाश्च जनाः सर्वे शिव विष्णु स्वरूपिणः ॥ ८८ ॥ तस्मात्काशीजनान्नैव
दूषयेदपि पापिनः ॥ नध्यर्मः काशि जनता सेवनात्सुभगः परः ॥ ८९ ॥ न पापं काशि लोकाना मपराधादतः परम् ॥
न्चिन्तं सभ्याः पाप कर्तु र्नास्थितिं प्रति पद्यते ॥ ९० ॥ प्रच्युत्या नाश मायाति जनः सुजन वर्जितः ॥ निरालम्बं मनो राज्यं क
रोति विषयैर्युतम् ॥ ९१ ॥ काश्यां न पातकै र्योगः संपाद्यः साधुभिः सदा ॥ सावकाशा नराः सर्वे पूर्वाभ्यास कृत क्रमाः ॥ ९२
गच्छन्त्य शास्त्र मार्गेण सर्व धर्म विवर्जिताः ॥ अतः सत्संग शास्त्राणि शिव विष्णु परायणः ॥ ९३ ॥ अवकाशानि
राधार्थं साधयेज्जीवितावधि ॥ इदं शरीरं मानुष्यं परमोत्कर्ष हानिदम् ॥ ९४ ॥ उत्कर्षार्थं प्रयुंजीत नापकर्षार्थमा
दरात् ॥ स्वरूपतो न शुद्धं तच्छुद्धं तु पुरुषार्थतः ॥ ९५ ॥ तन्नि गसहठाद्धीरो योजयेत्पावने पथि ॥ क्व काशी क्व शरीरं हि

मानुषं पुरुषार्थदम् ॥ ह्यपापविषयाः सर्वे परिणामार्त्ति शोकदाः ॥ न काश्यां व्याकुलीभूय निरसेषु मनो नयेत् ॥ ९७ ॥ अनेन
जन्मनैकेन स्वीकुर्याच्छाश्वतं पदम् ॥ जीवतां यत्सुखं काश्यां अविक्षिप्तेन्द्रियात्मनाम् ॥ ९८ ॥ न तत्सत्ये न कैलासे न वैकु
ण्ठे कथंचन ॥ अतो न कुर्वन्ति महानुभावाः पापं कदाचिन्मनसाऽपि काश्याम् ॥ ९९ ॥ न पापयुक्ताः खलु लौकिकं हि भोगं
प्रपश्यन्ति कुतः श्रुतीरितम् ॥ १०० ॥ इति ब्रह्मवैवर्त्ते तृतीयविभागे द्वाविंशोऽध्यायः ॥ २२ ॥ ऋषय ऊचुः ॥ धर्मराजं २३
सदस्याः किं पृष्टवन्तो वयस्यिति भ्॥ श्रुतिस्मृतिपुराणानाम् महासारः श्रुतो महान् ॥ १ ॥ सूत उवाच ॥ सभासदैः
धर्मराजः पृष्टो नरकयातनाः ॥ पापानि कथयामास यातनाश्च पृथग्विधाः ॥ २ ॥ सदस्याः ऊचुः ॥ कति पापानि
धर्मज्ञ यातनाः काश्च तत्कृताः ॥ पच्यन्ते कासु के पापाः तद्वदस्वानुपूर्वशः ॥ ३ ॥ धर्मराज उवाच ॥ मनसा पापमाया
102 ति वचसा कर्मणा तथा ॥ न संख्या स्तीह पापानां यातनानां च सत्तमाः ॥ ४ ॥ स्वल्पान्यपि च पापानि लीलयाऽपि कृता
नि च ॥ उपपातकतां यांति संग्रहाभ्यासचिंतनैः ॥ ५ ॥ महापातकतां यान्ति पुनस्तानि चितान्यलम् ॥ स्वं स्वं वृद्धिक्रमे

५८ णैव महापातककोटयः ॥६॥ नृणां संचयमायान्ति प्रायश्चित्तादिवर्जनात् ॥ तथापि काश्चिद्वक्ष्यामि यातनाः पापसंयुताः ॥
का॰ ७॥ सर्वत्र नरकाः संति गर्भवासादयोऽशुभाः ॥ स्वर्गापवर्गोऽपि च पुण्यपापानुसारतः ॥ ८॥ संयमिन्यां यातनाया भवन्ति- र॰
॥१२६॥ ममशासनात् ॥ मुख्योपलक्षणार्थं ताः संभवन्ति नृणामिह ॥ ९॥ मौक्तिकानां यथा गौणा मुख्या मंडयिकाःकृताः ॥ प्राणि
नामवरोधाय प्रभवंति तथाऽत्र तु ॥१०॥ तत्रतत्र निगृह्यंते प्राणिनो विषये रताः ॥ तथा विषयसंयुक्ता यातनाश्च पृथक्
पृथक् ॥ ११॥ देहाभिमानाध्वत्यापं न तद्गोवधकोटिभिः ॥ प्रायश्चित्ताद्भवेच्छुद्धिर्नृणां गोवधकारिणाम् ॥ १२॥
देहाभिमानिनां ज्ञानं मृत्युवीणां तद्धि दुर्लभम् ॥ अहंममाभिमानोत्थैर्दुःखैः पापच्यते जनः ॥ १३॥ सुखवृष्णा प्रवृत्त
स्य कुतो ज्ञानं कुतः सुखम् ॥ ममताकुलचित्तानां नरका ये सुदारुणाः ॥ १४॥ भवंति न च ते नृणां गोवधादिप्रकुर्वता
म् ॥ नश्वरे विकृते शुद्धे दुःसाध्ये च सुदुर्लभे ॥ १५॥ प्रवृत्तिर्विषये नृणां पातकं किमतः परम् ॥ कारागृहे यातनावाक्
तिरस्कारादयोऽपि च ॥ १६॥ अहं देहधियां ये स्युर्न ते निरयकोटिभिः ॥ प्रमत्तं मानुषं दृष्ट्वा भीतिर्भवति मेऽपि हि ॥ अ
॥१२७॥

अप्रमत्तं नरं दृष्ट्वा हृष्यामि च पुनः पुनः ॥ देहाभिमानजामार्तिं मनुभूयापि पामरः ॥१८॥ नात्मानमनुसंधत्ते हरिं पापस्तं हरम् ॥ महताऽ
पि प्रयत्नेन दुष्कृतं साधयत्यलम् ॥१९॥ अनायासेन सर्वेशमात्मानं नानुपश्यति ॥ अतः परं किमत्रास्ति पापं परम दारुणम् ॥
२०॥ कस्त्वं पृष्ट इति ब्रूयाद्देहोऽहमिति पातकी ॥ चक्रवर्तिपदे निष्ठ-महासिंहासने शुभे ॥२१॥ आत्मानं मन्यते दीनं चाण्डा
लं दुःखभाजनं ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥२२॥ भरतेन च संवादं जनकेन विपश्चिता ॥ ज्ञानध्वजो ना
म महान् जनको मिथिलाधिपः ॥२३॥ तीरे तीरे देवनद्याः प्रददर्श ऋषीन्बहून् ॥ कर्मज्ञानरतान् सर्वान् स्वस्वशा
स्त्रकृतश्रमान् ॥२४॥ पप्रच्छ वेदतात्पर्यं विनीतः प्राञ्जलिर्द्विजान् ॥ केचिद्दानं तपः केचित्तीर्थान्यग्नींश्च तथाऽपरे ॥
10 ३ २५॥ यज्ञवैराग्यविज्ञानव्रतानि विविधानि च ॥ वदन्ति चापरे विप्राः स्वाध्यायाश्रमसत्क्रियाः ॥२६॥ तत्र तत्र ऋषि
भ्यो ज्ञः श्रुत्वा राजा महामनाः ॥ स्वं स्वं मतं समालम्ब्य वदतामग्रतोऽब्रवीत् ॥२७॥ जनक उवाच ॥ अहो मुकुन्दस्य विचित्र
रूपा माया यया मोहिता विप्रवर्याः ॥२८॥ यस्याभिमानेन मनो यतो यतः प्रवर्तते भान्ति विदस्ततस्ततः ॥ सूत उवाच ॥—

५५

का॰ एवं स राजा जनकः सर्वान्यप्रच्छ भूरिशः ॥ उपक्रमोप संहार तात्पर्य ज्ञाने के न च ॥ २९ ॥ अवधूतः पूर्णवपुश्चीरवासाः परिभ्रमन् ॥

॥१२८॥ प्रसन्नवदनः प्राप्तो गंगाकूले द्विजैर्युतः ॥ ३० ॥ आहूतो जनकेनाशु राज्ञा तत्वं विजानता ॥ प्रतिपूज्य नृपो विप्रं स्थितो व्याकुल मानसः ॥ र॰

कुल मानसः ॥ ३१ ॥ ज्ञानध्वज उवाच ॥ कस्त्वं प्रसन्नः परिपूर्ण कामो निष्किंचनो भोगयोगादि शून्यः ॥ किंच त्वयासं सुवि

चारितं कृतं येन त्वमात्मा नमनं जनं कृपाः ॥ ३२ ॥ कुतः समागमनं तेऽथ पूर्ण गंतासि कं देशमितः कृतार्थः ॥ जात्यासि कः किं

च तवात्यभीष्टं केन प्रयुक्तः प्रकरोषि किंच ॥ ३३ ॥ अवधूत उवाच ॥ अहं जगत्त्राण निरोध सृष्टि कर्त्ता प्रतीतं मयि

भाति सत्ये ॥ अतो न कर्त्ता करणं न कार्यं जात भ्रमः पश्यति दृश्यजालम् ॥ ३४ ॥ प्रसन्नता तत्र नयनं शोकाः शोकैर्यु

तः कलुषी भूयदीनः ॥ भवत्यजस्रं निरयार्णवस्य पात्रं पवित्रं स विसृज्य दूरात् ॥ ३५ ॥ मूलं परं ब्रह्म रसायनं हरिं वि

भुं परानन्द मयं सनातनम् ॥ आस्वाद्य कामान् समवाप्य पूर्णः पूर्णस्य किं कामलेशाः सुखाय ॥ ३६ ॥ निष्किंचनाः किं

चन नाडियन्ते विष्णुं सदानन्द मयं विहाय ॥ न सर्व विन्यास धृतो महात्मा सुकिंचनो विषया सक्त चित्तः ॥ ३७ ॥

॥१२८॥

भोगास्तु रोगा इव दीनचेतसं दहन्ति दैन्याधि विषाद मूलाः ॥ ततोऽप्रति त्यक्त्वा प्रविहाय भोगान् भजस्व विष्णुं निरवद्य

भोगम् ॥३८॥ यमादिभिः साध्य लभ्योलिकया दृढ प्रयुक्ते नियमैः स्तु योगः ॥ अतः परानन्द मये निमग्न स्तन्वीश्वरे

वासुदेवे कृतार्थः ॥३९॥ अहो मयात्मा विषयेषु दत्तः पूर्वं महानर्घ्य मणि प्रकाशः ॥ सच्छास्त्र सत्संग हरिप्रसादा

त्पुनः प्रलब्धो हि करान्मुनेर्मया ॥४०॥ विचारितं मंक्षु विविक्त चेतसा सत्यं त्व सत्यं ज्ञाति चेतसा प्रभुः ॥ विचा

र्य सत्यं प्रशृ शील मध्यमे गतं त्व सत्यं स्वयमेवाथ चिरम् ॥४१॥ मनुष्य देहेन सुसं कृतेन कर्तुं सुयोग्यं भव

तीर यत्सत् ॥ कृतं तदेवाथ मया महामते धिक् ता नरान्ये मानुषं नाशयन्ति ॥४२॥ पूर्णोऽसि संबोधनतस्त्व

येव सद्गुरु भवान् वदामि किं ते ॥ पूर्णस्य गत्यादि न संभवत्यलम् देहादि दृष्टिः खलु देहिनां भवेत् ॥

104 ४३॥ जात्यादि देहादि विवर्जितोऽमले गतागतं वदतां हानिरेव ॥ अहं[1] प्रयोक्ता सकल सज्जन यथार्थवि मंगलव्याधि

वासः ॥४४॥ जनक उवाच ॥ बहुभिर्जन्मभिर्विप्र ततेयं विमलामतिः ॥ एकेन जन्मना प्राप्तिः कथं

१ पाठान्तर 'अहं' — "अहो"

५६ ज्ञानस्य तद्वद ॥ ४५॥ जड़भरत उवाच ॥ एवमेव पुरा देवः पृष्टो देवैः पिनाकधृक् ॥ कैलाशशिखरे रम्ये सांबः स्कन्दादिभिर्यु रु.

का. तः ॥ ४६॥ एकेन जन्मना मोक्षो भवत्येव न चान्यथा ॥ सर्वेषां प्राणिनामत्र तथा वद सनातन ॥४७॥ श्रीमहादेव उवाच ॥

॥ १२९॥ इदमेव पुरा पृष्टो विष्णुर्ज्ञानघनः परः ॥ एकेन जन्मना ज्ञानं कथं सिद्धं भवेन्नृणाम् ॥४८॥ श्रीविष्णुरुवाच ॥ जन्मानि क्र

मशो यस्य निष्पाप सर्वप्राणिनां च ॥ तस्य त्वयि भवेद्भक्तिस्ततो भेदो मया सह ॥ ४९॥ अभेद दृष्टिः सर्वत्र ज्ञानदा ज्ञानना

शिनी ॥ वैराग्यादि महामुख्यैः साधनैः संप्रवर्तते ॥ ५०॥ तदावरातिथ्यकालेकस्य चित्तप्रजायते ॥ अतो ज्ञानगृहं मेऽस्ति

काशी विबुध दुर्लभा ॥५१॥ एकेन जन्मना तत्र मरणावसरेऽमलम् ॥ ज्ञानमुत्पद्यते जंतोः श्रुतिभिर्यन्निरूपितम् ॥५२॥

ब्रह्मभूमेः स्वभावोऽयं महाज्ञानप्रदो नृणाम् ॥ अन्यथा साधनवरैः कदाचित्संभविष्यति ॥५३॥ अपराधविहीनानां का

शिका संप्रयच्छति ॥ श्रीऽप्रमेव महादेव यातनान्तेऽपराधिनां ॥ ५४॥ महादेव उवाच ॥ श्रोतुमिच्छामि देवेश सपराध

न जगद्गुरो ॥ केऽपराधाः कृतैः किं वा अकृतैः किं च जायते ॥ ५५॥ श्रीविष्णुरुवाच ॥ ब्राह्मणक्षत्रियविशां शूद्राणां च

॥१२९॥

सदाशिव ।। अपराधाः पृथग्गोक्ताः सर्वेषां च विशेषतः ।। ५६ ।। प्रतिग्रहो ब्राह्मणानामनाचारस्तथापरः ।। तथाऽस्व
धर्माचरणं शूद्रान्नं शूद्रसेवनम् ।। ५७ ।। क्षत्रियाणां प्रजाद्रोहो रणाद्भीतिर्न पापभीः ।। यथेष्टं व्यवसायादि मान
कूटं महाविशाम् ।। ५८ ।। अपराधा भवंत्येव शूद्राणां शृणु शंकर ।। द्विजसेवावेदवादः प्रतिग्रहरुचिस्तथा ।। ५९ ।।
मद्य मांसादि व्यसनं मायया लोकवंचनम् ।। पूज्यबुद्धिरसेवा च वर्णानां वेषधारणम् ।। ६१ ।। ब्राह्मणाद्यैः काशि
कायामेतद्वर्ज्यं पृथक्पृथक् ।। विरुद्धाचरणं काश्यां न कार्यं स्वस्य वा परम् ।। ६२ ।। विरुद्धाचरणे नास्मान् का
श्यादीन्दुसते ऽवशी ।। यादृच्छा पाप संघोथान् स्मृता जन्म शतस्य च ।। ६३ ।। स्पर्धा शत सहस्रस्य नाशय
त्येव काशिका ।। काशिका जीवजननी काशिका सर्वशोकहृत् ।। ६४ ।। सर्वदा सुखदा काशी तां काशीं को विरो
105 धयेत ।। पितृमातृ द्रुहां नृणामपि जन्म शतैरपि ।। ६५ ।। निष्कृतिः स्यान्न काश्यां हि स्थित्वा काशी द्रुहां क्वचित् ।।
मात्रासह समानत्वं काश्यपि रीति कुत्रचित् ।। ६६ ।। गर्भवासप्रदा माता काशी गर्भविनाशिनी ।। काशिका

५७

का. दुःसते ज्ञैः किं सन्त्काराल्ल गुरु तन्मैरः ॥६७॥ मलमूत्रादि नरकदेहस्थं विनाशिनीं आदिमाः सुताः ॥ तिरस्क्रियन्ते मात्रान पुण्यापाप र.

॥ १३०॥ कृतोऽधमाः ॥६८॥ वासनापिहि धर्मस्य सुखदाऽभयदामता ॥ किं पुनर्धर्म कर्तारः काश्यां सुखमवाप्नुयुः ॥६९॥ धर्मोमदात्मको देवत 23

स्माद्धर्मं न संत्यजेत् ॥ मत्स्मृत्या सर्वदुःखघ्नं विस्मृत्या पापयुग्भवेत् ॥७०॥ यदा यदा विस्मरणं करोति तदा तदा दूरतरं प्रयाति ॥ यदा मां

स्मरते महात्मा तदैव मध्यं प्रविशामि यन्थुः ॥७१॥ यदा जनो यस्य समागमेन स्मरन् यथा याति विकार मन्तः ॥ तदा तदा कारतया प्रवर्त

ते सर्वत्र लोके ह्यपि वैदिकेषु ॥७२॥ पुण्यैः सुसंपूर्णतरे महात्मा मोहान्धकार प्रशमेन मां भजेत् ॥ मनोमहानन्दमयं महात्तनुं माया

परं मोक्षदं धर्मं साधनम् ॥७३॥ मक्षिकेव दुरात्मायो भ्रमरेण समो महान् ॥ कस्तूरिकां विहायाशु पूये रमति मक्षिका ॥७४॥ तदा दुरात्मा

मां हित्वा विषयेषु विषज्जते ॥ अहं प्रसन्नः प्रददामि काशी मन्ये पदार्थाः खलु गर्भवासम् ॥७५॥ तस्मान्मुमुक्षुः सुविचार्य यत्नाद्भजे

त मां काशिका वीं पराय ॥ वेदान्त सारो बहुधा स्मारितो हितकृन्मया ॥७६॥ भोगा भुक्ता बहुावस्था स्वैश्वर्यं प्रकाशितम् ॥ नीतोऽभि

मानो वृद्धिं च धनं धान्यं सुसेवितम् ॥७७॥ सुखबुद्ध्या कृतं यच्च तत्तद्दुष्कृत कारणम् ॥ महानरक जालेषु भोगबुद्धिः सुखाय किम्

॥१३०॥

१ प्रा० "नश्यति — पश्यति"

।।७८।। सर्वं विचार्य हे लोकाः सत्यो भोगो हि भुज्यताम् ।। यो न नश्यति नो दुःख मिह संपादने ऽकरोत् ।। ७९।। न द्वेषो हि भवेत्कैश्चि
न्नैर्ष्यो न क्रय विक्रयौ ।। नास्थिक्यं न धना कांक्षा न पापं काल एव च ।। ८०।। शृणुध्वं यदि वा पुण्यं यदि वः पाप संक्षयः।।सर्वभोगै
क निलयां परमानन्द दायिनीम् ।। ८१।। भजध्वं काशिकां कान्तां ममानुग्रह शेवधिं ।। त्रयी मयीं तन्मयास्तु ममानुग्रह भोगिनः।।
८२।। भोगो यं दुर्लभो नृणां भोग विक्षिप्त तेजसाम् ।। उपदिश्य प्रसन्न धी त्वद्द्वारा लोक कोटयः ।। ८३।। उपदिष्टा मया देव कृपयाग
र्भवासिनः।। श्री महादेव उवाच ।। त्वं भक्तवर्गार्थिहरः परात्मा भावप्रियो भाव कृतां सुदूरः।। ८४।। अभावना ऽभाग्यवतां परास्या
द्भाग्यं विना किं तव भावना स्यात् ।। त्वदाज्ञया याति जनो ऽजनत्वं त्वदाज्ञया संवृणुते परं तत् ।। ८५।। त्वदाज्ञयाहं कृतिहा
भवत्यलं त्वदाज्ञया नाशितया स्वयं नशेत् ।। यावन्न जानाति तव स्वरूपं नास्वाद्य तावद्भ्रमतीह विष्णो ।। ८६।। तव स्वरू
पामृत पान तृप्तो विषाग्निना दह्यति किं जगत्सु ।। न शास्त्रवादे न गुरूपदेशतो न लोक दृष्ट्या न च संप्रचारैः ।। ८७।। त्वदी
10 न भक्तिं परिहृत्य वाञ्छते जनः कदाचिद्द्विविधान्न वादैः ।। त्वत्सेवनादेव तथा नरः परं पदं प्रपश्यत्यवशः सुदुर्लभम् ।। ८८

का० नवेद वादैर्नच शास्त्र विस्तरै र्वचोभिराप्येत सुध्यातु मंथनैः ॥ श्रीविष्णुरुवाच ॥ न मे प्रियाः केपि न चाप्रिया वा समस्य शुद्धस्य सना १०
॥१३१॥ तनस्य ॥ ८९॥ तथापि दीनं प्रभजामि मानवं येनात्मसात्सर्वमिदं जगत्कृतम् ॥ न वास संस्कार विकार मानसैः प्राप्यः परात्मात्मतन्द्रि २३
तः क्वचित् ॥ ९०॥ हृदि प्ररूढासि वनैः सपूय विण्मूत्र केशास्थि मयैः सकामैः ॥ काम प्रधानाः पुरुषार्थ हारका वसंति यत्र त्यवने
कुतस्कराः ॥ ९१॥ तेर्लुंठितं वेत्ति न राज मन्दिरं दीनो वहिर्धावति मध्य शून्यः ॥ ममापि सामर्थ्यमनेन नाशितमंतर्गतस्यापि ब
हिः कृतं यत ॥ ९२॥ गृहे स्थितं पद्मनिधिं विनाश्य वहिर्बहिर्याति वराटिकार्थं ॥ येरहं सुकृतैर्दृष्टः स्पृष्टः संपूजितः श्रुतः ॥ ९३॥
स्मृतस्त एव मां नित्यं न त्यजन्ति कदाचन ॥ पीत्वा पीयूष ममृतं नासवं पातुमिच्छति ॥ ९४॥ मयि किन्न महादेव किं वा न क्रियते म
या ॥ अतोनु मयि रतिं कुर्यात्सर्वदे पापहारिणी ॥ ९५॥ यदि मां प्राप्तुमिच्छन्ति प्राप्नुवन्त्येव नान्यथा ॥ कलौ कलुष चित्तानां
स्वल्पायुः प्रभृतीनि च ॥ ९६॥ भवंति वर्णाश्रमिणां ननु मच्छरणार्थिनाम् ॥ कलावपि प्रसन्नोहं प्रयच्छामि महेश्वर ॥ ९७
काशीं येन प्रमुच्यन्ते संसाराद्दुःख सागरात् ॥ इयमेव परा भक्ति रिदमेव परंतपः ॥ ९८॥ इदमेव परं ज्ञानं काश्यां पाप ॥१३१॥

विवर्जनम् ॥ कलौ काशी सावधानैः संसेव्या नाजितेन्द्रियैः ॥ ९९ ॥ अजितेन्द्रिया महापापाः किन्न कुर्वन्ति पातकम् ॥ कलौ कुलं नैव
यथाक्रमेण मात्रादि दोषेण सुनिश्चितं स्यात् ॥ १०० ॥ तपो जपः प्राण निरोधनादि दानं तथा तीर्थ निवास यज्ञाः ॥ सर्वे सरागैः
परिकल्प्य माना भवंति रागादि समृद्धयेऽलम् ॥ [101] १ ॥ अतः कलौ दानमेकं कथंचित्काशी सुतीर्थेषु समाश्रयेत ॥ नमन्त्रया
त्वा विवशः स्मरन्वा मुच्येत लोकः खलु काशिकायाम् ॥ [102] २ ॥ नोचेत्स्वधर्मा श्रम कर्म वर्त्तनं दुर्गं कलौ काल मलेऽजितेन्द्रियैः
॥ तस्माद्धरौ राज्यमैः साधुयत्नैः काशी सेव्या सावधानैः सुमेध्यैः ॥ [103] ३ ॥ लाभस्थानं रक्षणीयं प्रयत्नात्सेव्यो धर्मो दानमुख्यैः
सदात्र ॥ ये काश्यां विहरन्ति पुण्य परमाः सच्छास्त्र निष्ठाः सतां संगात्प्राप्त समस्त सौख्य निचया जीवन्त स्वाधिकम् ॥ [104] ४ ॥
येतु व्याकुल चित्तदेह वचसोऽसत्संग युक्ताः परं ते षां कुत्र सुखं मताः शिवपदं यान्त्येव भोगादनु ॥ [105] ५ ॥ इति श्रीब्रह्मवैवर्त्ते त
तीय विभागे त्रयो विंशतितमोऽध्यायः ॥ २३ ॥ ऋषय ऊचुः ॥ काशी कथां पुनः शम्भुः कां पप्रच्छ समाधवम् ॥ न तृप्तिमधि २८
107 गच्छामो महारस निषेवणात् ॥ १ ॥ सूत उवाच ॥ शृण्वन्तु ऋषयः सर्वे कथां सर्वाग माश्रिताम् ॥ ममापि परमानन्द दायि

नीं दुःखनाशिनीम् ॥२॥ पुनः शिवेन सहरिः पृष्टः काशि रहस्यकं ॥ कथयामास संपृष्टः पुनः काशि कथादृतः ॥३॥ श्रीविष्णुरुवाच

॥ यः काशिकां प्राप्य जनो न मुंचति श्रीमान्ममाज्ञापरिपालकः सः ॥ मुंचत्यथो मूर्खतमो वराकः सपापराशिः खलु पामराणा

म् ॥४॥ अहं विचार्याखिल शास्त्रजालं सुखस्य मोक्षस्य निधानमेकम् ॥ प्रसन्नरूपः खलु वेदिशामि काश्यां स्थितिं

मरणां पापशून्यां ॥५॥ बिभेति यस्तिष्य युगादतीव योमध्य माविश्य जनः प्रवर्तते ॥ वहिः समीचीनतरं विधाय धनेषु

दारेषु-अजितेन्द्रियार्थैः ॥ ६॥ सकाशिकायां निवसत्यजस्रं धर्मावलम्बः स्वतविघ्नपुगः ॥ गुरुं सुधन्यं प्रतिपूजयन्त्यः से

वेत स्वात्र परत्र पूज्यम् ॥७॥ यदुक्तवाचो विभवैः कृतार्थाभवन्ति लोकाः परिपूर्णकामाः ॥ नये गुरुं स्वात्मरहः प्रकाशं

भजन्ति भावैः सकलैर्मनुष्याः ॥८॥ न तत्श्रुतं कार्यकरं भवत्यलं मुमुर्षवेदन्त सिवोसर्वथं परम् ॥ सर्वात्मना ये प्रभजन्ति

सद्गुरुं न तेषु शास्त्रं विफलं कदाचित ॥ ९॥ काश्यामेवं ये वसन्तो मनुष्यास्ते वै काश्याः प्राप्नुवन्ते सुखं स्वम् ॥ स्नानं

दानं विष्णु गुर्वर्चनं च नित्यं भक्तिं काश्याः कुर्वतां कुत्र बन्धः ॥१०॥ धर्मोत्तमं शक्तस्न सारतो ये कुर्वन्त्यवश्यंभा

श्रवणं रसेन ।। तेकाशिकाया मपराध्यहीना भवन्ति नित्यं श्रवण प्रयाना: ।।११।। गजस्य मत्तस्य यथांकुशोभवे 89
त्तथा नृणां श्रवणं मार्गदायि ।। श्रुत्वापि ये पापरता वराका स साध्यपिण्डे नहि कृत्य मोषयेः ।। १२।। श्रुतैस्तपो
भिर्व्रतदानजप्यैः समस्तदेहादि जयैरुपायैः ।। साध्यं मनः स्थैर्य मदीन सत्वे नो चेच्छ्रमः स्याच्छ्रमतोस हीनैः ।।
।।१३।।प्रियं यथा यस्य मनः स्मरेत्त तथा प्रवृत्तिः खलु तस्य पुंसः ।। हरौ हरे वा कनके रतौ वा प्रीतिः प्रिये स्यान्नियता
मिका श्रुतिः ।। १४।। पुण्यस्य पापस्य निदानमेकं शृणुष्व देव प्रवदामि सत्यं ।। मनुष्यदेहं परमं समाप्य स्वात्म
न्रतिर्वा विषये भयेच्छा ।। १५।। नाडनं धन गृहादि नाशनम् रोगभोग परिवर्जनादिञ्च ।। विघ्नजातमितिनो
भवत्फलं काशिका विरह एव विघ्नदः ।।१६।। देहादि विघ्नं सोढ्वान यस्तिष्ठेत्प्रीति भाग्नरः ।। सुनिर्विघ्नः पुरुषः सेवेत
108 सविघ्नः का काशिकां त्यजेत ।। १७।। विघ्नज्ञानं न येषां हि कथ्यंते शास्त्र वित्तमाः ।।१७।। श्री महादेव उवाच ।। विघ्न
ज्ञाने महाविष्णो कथं निर्विघ्नता भवेत ।। विष्णुरुवाच ।। मनः क्षोभो विघ्नपूगो विघ्नाः कामादयो मताः ।। १८।।विष

का· ह्यात्मना तु बहवो भवंत्यसुख हेतवः॥ अप्रवृत्या मनर्थेषु निर्विघ्ना काशिका स्थितिः॥२०॥ इत्यादौ रत्याते विघ्नजाले वैहि विघ्ना भवंति र·
।१३३॥ हि॥ वहि विघ्नैः काशिवासो निःफलस्यात्सुदुर्मतेः॥२१॥ अयमेव परोधर्मो ह्ययमेवोत्थमः परः॥ यत्काश्यां विघ्न रहिता भवेत्सुकृति २४
नां स्थितिः॥२२॥ अत्रैवोदाहरन्ती ममिति हासं पुरातनम्॥ तच्छृणुष्व महादेव निर्विघ्न प्रति पादनम्॥२३॥ काश्यां कश्चिद् द्विजवरः
सनातन इति श्रुतः॥ वेदशास्त्रार्थ तत्वज्ञः सर्व विद्या विशारदः॥ २४॥ पुत्र पौत्र प्रपौत्रादि कुटुम्ब सहितः सुखी॥ ससदा काशि
माहात्म्य श्रवणा सक्त मानसः॥२५॥ निर्विघ्न कामः सततं काश्यां वा सुखान्वहम्॥ शृणोति काश्या महिमानमद्भुतं वदत्यजस्रं
स्मरतीह काशीं॥२६॥ करोत्यजस्रं प्रतितीर्थ मज्जनं प्रदक्षिणं क्षेत्र भवं करोति॥ तस्य पुत्रा स्त्रयः पौत्रा भवन् सर्वे दुरत्ययाः २७
कलह द्यूत पाखंड भंडवैतण्डित प्रियाः॥ पितरं मातरं शुद्धं ताडयन्ति वहि मुखाः॥२८॥ वेश्या व्यसन पापार्द्धि व्यसनेन समन्विताः॥
ज्येष्ठ स्सनातन सुतः सिनिः सौम्या कृतिः खलः॥ २९॥ ज्योतिषशास्त्रं प्रकटयन् स्त्रैणः स्त्री मोहनो वशी॥ स्वकरांतः पर स्त्री णां कर
रेखा परीक्षता॥३०॥ जज्ञ्या काचिद्राज पत्नी सिनिना सुंदरेण हि॥ स्वयमेव व्यभिचरन् दृष्टो राज्ञा सुबाहुना॥३१॥ धृतः पाशे
॥१३३॥

दृढं बद्धः कस्त्वं पृष्ठश्च ताडितः॥ नागरैः ससिनि दृष्टो बद्धो पाशैर्दृढैः पुनः॥ ३२॥ बध्यतां हन्यतामेष पापात्मा ब्राह्मणब्रुवः॥
इति लोका सु मिलिता स्ताडयन्ति पृथक् पृथक्॥ ३३॥ कश्चिद्वदति चौर्येण नीतं सर्वं दुरात्मना॥ कश्चिद्वदति राजेन्द्र
दूषिता मम कन्यका॥ ३४॥ कश्चिद्वदति भार्यां मे नीत्वा विक्रीय चागतः॥ कश्चिद्वदति दग्ध्वं मे गृहं वित्तं प्रलुब्ध (६०)
च॥ ३५॥ इत्यादि दोषजातं तु तस्योक्त्वा नागरो जनः॥ देशान्निस्सारणं तस्य प्रार्थयामास भूपतिम्॥ ३६॥ तस्माद्
तःपिता राज्ञा सनातन उदारधीः॥ उपालभ्योक्तवान् राजा पुत्रवानसि सत्तम॥ ३७॥ ब्राह्मणत्वा मयात्यक्तो गच्छ पु
(१०७) त्रैर्यथा सुखम्॥ मम राज्ये त्वया विप्र न स्थेयं पुत्रकामुक॥ ३८॥ ब्राह्मण उवाच॥ राजन्पुत्रांस्त्यजाम्यद्य काशी
वासार्थमातुरः॥ ममन्येदपराधस्स्यात्तदा वद मतामते॥ ३९॥ राजोवाच॥ अपराध्यसि विप्रेन्द्र यस्त्वं पुत्रपरायणः॥
पुत्रादि संग्रहात्पुंसा मपराधाः पदे पदे॥ ४०॥ शुभाशुभं पुत्रकृतं ग्रसते चेन्न मानवैः॥ नापराधस्तदा कोऽपि स्नेह
हीनस्य खेदिनः॥ ४१॥ स्नेहाद्बन्धनमायाति स्नेहाद्गर्भं विशत्यलम्॥ सस्त्ववन्ध कृत्स्नेहो बंद्धः काश्याविमो

का० चनः॥४२॥ सदानन्द मये क्षेत्रे भोग मोक्षादि सिद्धये॥ स्नेहः कश्च पुत्रादौ कृतो वन्धन कोविदः॥४३॥ ब्राह्मण उवाच॥ र०
॥१३४॥ त्यक्ता मया पुत्र पौत्राः काश्यां वासाभिलाषिणा॥ नान्यथेच्छं महाराज शिक्षयस्व यथार्थतः॥४४॥ राजोवाच॥ गच्छ
विप्र यथान्यायं काश्यां तिष्ठ यथासुखम्॥ पुत्रादि स्नेहिनां ब्रह्मन् काश्यां वासो न शर्मणे॥४५॥ श्री विष्णुरुवाच॥
एवमुक्तः स विप्राग्र्यो राज्ञा शिव सुबाहुना॥ पुत्रापराधेऽपि सच नापराध्यति कर्हिचित्॥४६॥ कदाचित्तस्य सुदती
भार्या कलह कारिणी॥ शपत्यविरतं लोकान् स्त्रियो बालानपि स्वतः॥४७॥ राजानं राजपुत्रांश्च राज पत्नीश्च दुर्मु
खी॥ लोकैः सर्वैर्मिलित्वा सा राज्ञोऽग्रे विनिवेदिता॥४८॥ राजन् वृथा शपत्येषा त्वामस्मांश्च निरन्तरम्॥ निर्निमि
त्तं डाकिनीयं एच्छन्तां शास्यतामपि॥४९॥ राजोवाच॥ आनयन्तु द्विजं शुद्धं सनातनमृषिं कविम्॥ काश्यां सु
खं कुतस्तस्य यस्यैषा कर्कशा गृहे॥५०॥ विष्णुरुवाच॥ आनीतः किंकरैर्विप्रो राज्ञोऽग्रे विनिवेदितः॥ पृष्टश्च
राज्ञा काश्यार्थी प्राह राजानमातुरः॥५१॥ सनातन उवाच॥ पुत्राः प्रथमतस्त्यक्ता भार्यामपि विचारतः॥ त्यजामि

नापराध्यसि शास्यतां यदि रोचते ॥५२॥ येन केन भवेद्विघ्नः काशीवासस्य भूभुज ॥ तत्त्यजामि न चिरं न काशीं करुणामयीं
॥५३॥ राजोवाच ॥ सनातन मुने गच्छ काश्यां तिष्ठ यथासुखम् ॥ अपराधिन स्त्वया त्यक्ता न काशी सर्वदुःखहृत् ॥५४॥
विष्णुरुवाच ॥ एवं विप्रः काशिकायां सर्वं त्यजति विघ्नदम् ॥ धिक्कृत्य विषयांस्त्यक्त्वा काशीं सर्वपरार्थदाम् ॥५५॥
काशी प्रदेशान्पश्यन्स तीर्थो निस्नाति नित्यशः ॥ काशी लिंगान्यर्चयति काशिनामा मतं जपन् ॥५६॥ एवं वसन्काशिकायां
भ्रातृभिः पुत्रबन्धुभिः ॥ बद्धः सनातनो मुनिर्धनार्थं धनवर्जितैः ॥५७॥ धनं देहि धनं देहि धनं देहीति वादिभिः ॥ बद्ध्वा राज
गृहं निन्युर्बान्धवो वै धनप्रियाः ॥५८॥ राज्ञा पृष्टाः किमर्थं धिग्बद्धः पाशैर्यथा पशुः ॥ मुच्यतां मुच्यता मेष काश्यां पीनापराध्यति ॥
110 ॥५९॥ ते ऊचुः ॥ अयमस्ति धनी राजन् वयं धनविवर्जिताः ॥ कथं जीवेम सर्वस्वं विभज्य न ददाति हि ॥६०॥ पितृ पैतामहं वित्तं
सर्वेषां भाग मर्हति ॥ शठोऽधन मतिः क्रूरः कदर्यो निर्दयोऽधमः ॥६१॥ क्लिश्यामहे महाराज विभज्य प्रददातु नः ॥ धनधान्यञ्च यत्किंचित्
पितृ पैतामहं वसु ॥६२॥ राजोवाच ॥ सनातन मुने वित्तं वर्तते तव सन्निधौ ॥ ददस्व पुत्र भ्रातृभ्यो यथाशास्त्रं विभज्य हि ॥६३॥ नो

१२ चेद्बहि र्यास्यसि त्वं काश्या मत्प्रेरितोऽप्यकृत् ॥ सनातन उवाच ॥ राजन्ददामि सर्वस्वं न गृह्णामि च किंचन ॥ रक्षस्व काशिका
का. यां मांत्यजामि सकलं वसु ॥ ६४ ॥ इति तान् गृहमानीय दत्वा सर्वस्व मप्युत ॥ जगौ गाथां शांतमनाः काश्यर्थी वित्त दुःखितः र.
॥१३५॥ ॥ ६५ ॥ सनातन उवाच ॥ अहो मया ब्रह्म सुखं समग्रं प्राप्तं कलत्रादि विवर्जनेन ॥ गुरुर्मदीयः सुमहायशास्त्वयं राजा सुचतुर्विधं
यान्न्यवारयत् ॥ ६६ ॥ अहो महादेव मयादेह कृतेऽति भीषणं कृतं महापाप कृतां विकर्म ॥ कलत्र पुत्रास धनादि सेवनं न सेवनं
विश्वगुरोः कृतं हरेः ॥ ६७ ॥ काश्यां ध्यार्थं नैव कुर्यात्कदाचिं द्विधा वित्त ध्यान योगादि दानैः ॥ सिद्धैः साध्यो मोक्षधर्मादि
र्थैः केयं काशी नह्रिदां वासनेत्रीमु ॥ ६८ ॥ दीनः काश्यां योवसे द्विश्वनाथं दीनानाथैः प्राप्य माराधयेत ॥ वाग्भिः कार्यै मौन
सैः स्मृताद्यैः स्तोत्रानन्दे वास माप्नोति मोक्षम् ॥ ६९ ॥ अत्राभिमानो बहुदुःखकारी द्वेषादयो हानि करा वृषस्य ॥ कामादयो हानिक
राः सुखस्य हर्षादयो व्याकुलयन्ति चित्तं ॥ ७० ॥ काशी कथामूल मिदं हि सर्वं कथा सतां संसदि जायतेऽत्र ॥ संतः सुसेव्याः
सततं प्रयत्ना द्येषां वचोभिः सुख दुःख हानिः ॥ ७१ ॥ काश्यां स्थितानामपराध पूगा भवंत्यवश्यं गुरुवर्जितानाम् ॥ गुरो ॥१३५॥

गुरुः संदिशते स्थितिं पराम् ॥ निवारये यश्च महाप्य संकटात् ॥ ७२॥ तीर्थेषु देवेषु कृतोपराधो ॥ मोहादवश्यं मनुजैर्मदान्धैः ॥
गुरु गरीयान्प्र मजत्यवश्यं ॥ शास्त्रोपदेशात्सुमहानुभावः ॥ ७३॥ गुरुं शिवं शास्वत शास्त्र विग्रहं ॥ यो वज्ञया पश्यति शास्त्र दृष्टिः ॥
नश्यन्ति सर्वाशुभ दृष्टयस्तु ॥ तस्याथ मस्याऽथिगतस्य नित्यम् ॥ ७४॥ गुरुं विना तिष्ठति यो वराकस्तस्याभिमानो दृढतामुपैति ॥
निरंकुशाः पापरता गुरुद्रुहा ॥ भवंत्यवश्यं श्रवणादि विच्युताः ॥ ७५॥ पतन्ति घोरे नरकेऽति दारुणे ॥ यथेष्ट कामाभिरता विषा
दिनः॥ श्री विष्णुरुवाच ॥ इति गाथां गीयमानां श्रुत्वा लोकाः सुविस्मिताः॥ गुरु शास्त्रानुभाविनीं श्रद्दधुः काशिवा
सिनः॥ ७६॥ अतोऽथमेव शास्त्रार्थो स्वयमेव गुरुक्रमः॥ विसृज्य सर्वत्र रतिं काश्यां कुर्यात्सुखावहाम्॥ ७७॥ अनाया
सेन येषां हि योगक्षेमोऽस्य कोऽपि हि ॥ नैष्ठिकार्थं त्यजंत्येनां धर्मद्रोहोऽत्र दारुणः॥ ७८॥ एकाकिनां धनं यच्च प्रविश्वेश्वर
रसात्कृतम्॥ भवेद्येषां कृतार्थानां ते क्षेत्र फल भागिनः॥ ७९॥ वाराणस्यां समुत्पाद्य वसुत्यक्त्वा म्रियेत यः॥ सकालराज
पाशेन बद्धः प्राप्नोति यातनाम्॥ ८०॥ प्रीतिं कुर्यात्काशिकायां न धनेन गृहादिषु ॥ यत्र प्रीतिः फलं तस्य लभ्यते मानवैः स्फु

६३

का. २५ ॥ १३६॥

ष्टम् ॥ काशीं विहाय नश्यन्ते न पुनार्यो विदोजनाः ॥ ८१ ॥ कुर्वन्ति कृतिनः स्नेहं जन्मनाश विदो यतः ॥ ८२ ॥ सूत उवाच ॥ ए
वंसदा शिवः श्रुत्वा महाविष्णोर्मुखात्कथां ॥ अतर्क्यं गुणसंपूर्णां काशीं सर्वात्मनाऽभजत् ॥ ८३ ॥ इति श्रीब्रह्मवैवर्ते
तृतीयविभागे चतुर्विंशोऽध्यायः ॥ २४ ॥ सूत उवाच ॥ न लोकाश्चिन्तयन्त्येते पापात्काश्यां सकृत्कृतम् ॥ चिंतयन्त्येव
विघ्नानि दुःखानि च पदे पदे ॥ १ ॥ विनाऽपराध्यं न च दुःखभारो भवत्यवश्यं हि कदापि केषाम् ॥ भवन्ति विघ्नाः खलु
पापकर्मणाम् काश्यां निवासे मरणे सुजीविते ॥ २ ॥ उक्तं मया पुरैवैतल्लोक शिक्षार्थमुत्तमम् ॥ व्यासोऽपि काश्या
निःकाश्य गंगा पारं प्रतारितः ॥ ३ ॥ काश्यां स्वलपराधेन च न ते काशि निवासिनः ॥ सिंहासनोपविष्टानां दैन्यं दुः
खाय केवलम् ॥ ४ ॥ सार्वभौमक्रिया जुष्ट श्चर्वणं चणकस्य च ॥ मनोरथ सहस्रैस्तु प्रार्थयत्येव पापकृत् ॥ ५
मोक्षलक्ष्मीप्रदे क्षेत्रे विषयेषु दरिद्रता ॥ आकण्ठमग्नो गंगायां म्रियते स पिपासया ॥ ६ ॥ काश्यामंतर्यो
वसेत्स्वावस्थानः कश्चित्साधुः साधयत्येव सर्वम् ॥ नो चेद्विद्या वादचातुर्य वित्तैः श्रीकालेशं वंचितुं संप्रवृत्तः ॥ ७ ॥

॥ १३६ ॥

अहो विचित्रा महती शिवस्य विष्णोः परामोह कर्त्री च माया ॥ यया विमूढं त्व मती कृत्य लोकाः सुवंचितास्त्वमतं भत्य
रूपम् ॥ ८ ॥ ऋषय ऊचुः ॥ कलौ न धर्मो न ज्ञानं न वैराग्यं न केशवे ॥ भक्ति र्विशुद्धा सुभगा न काश्यां तथुता स्थितिः
॥ ९ ॥ विचारतो न निर्वार्थो वार्त्तापि सुलभाऽसताम् ॥ कथं संसार कूपाच्च निःकाशः कामिनामिह ॥ १० ॥ सूत उवाच ॥
आसीत्पुराकृत युगे महापाशुपतः कृती ॥ शिव पादाब्ज सुरति र्जितेन्द्रिय मनो गुणः ॥ ११ ॥ धर्मेश्वर समीपेतु
विरक्तस्त्वपरिग्रहः ॥ महातपस्वी शिवनाम तत्परो महानुभावः परिपूर्ण कामः ॥ १२ ॥ हिरण्य गर्भः सकदाचिदत्र ॥
112 महाभिमाना त्स पिशाच दुःख भाक् ॥ जातः पिशाचः परमादरेण श्री कालराजेन सुताडयमानः ॥ १३ ॥ असत्समा
जेन तथा प्रवृत्या दुःखं पुनः प्राप्य घनन्त्वयं परम् ॥ १४ ॥ ऋषय ऊचुः ॥ असत्समा गमात्सर्वं सुकृतं तस्य नाशित
म् ॥ कथं कथं वा पैशाच्यं प्राप्तः काश्यां मृतोऽपिहि ॥ १५ ॥ सूत उवाच ॥ धर्मेश्वर समीपेतु मठिका तस्य योगि
नः ॥ जितेन्द्रिय स्तपो निष्ठो दृष्ट्वा जातो न शास्त्र भाक् ॥ १६ ॥ कदाचित्तस्य परमः प्रियः पाशुपतः कृती ॥ आ

२४

का. ध्यानमकरोद्विप्रा मुनिर्धर्मनिधिः प्रियः॥१७॥ धर्मनिधिरुवाच ॥ हिरण्यगर्भ सततं किं करोषि महामते ॥ काश्यांस्थि

॥ १३७॥ तिः कथं तेऽत्र सत्यहं प्रतिपाद्यते ॥१८॥ हिरण्यगर्भ उवाच ॥ जपेन तपसा श्रद्धया विद्यया योगयोग्यया ॥ समाधिदान र.

मानाद्यैः पूर्णस्तिष्ठामि सर्वदा ॥१९॥ धर्मनिधिरुवाच ॥ अहो पाशुपताचार्य कथमेवं प्रभाषसे ॥ अभिमानयुतं वा- २५

क्यं व्यासाद्यैर्यन्न चोच्यते ॥२०॥ सर्वज्ञः शंकरो देवो नान्योऽस्ति भुवनत्रये ॥ परमात्मा महेशानः कोऽन्यो जीवस्त्व

दं वदेत् ॥२१॥ हिरण्यगर्भ उवाच ॥ अहमेव शिवः साक्षाच्छंकरो लोकशंकरः॥ नान्यद्द्वितीयं मत्तोऽन्यच्छुद्धं

यद्दृश्यते बहु ॥२२॥ धर्मनिधिरुवाच ॥ त्वमेकः शिव सन्न्यासी ब्रह्मविज्ञानवर्जितः ॥ पूर्णोऽहमिति मत्वापि विषय

स्नेहसंयुतः ॥२३॥ विषयस्नेहसंयुक्तो ब्रह्माहमिति यो वदेत् ॥ गर्भवाससहस्रेषु पच्यते पापकृन्नरः ॥२४॥ वि

षयाक्रान्तदेहस्य श्रवणादि सुखावहम् ॥ सत्संगश्रवणं विष्णोः काश्यां वासः शिवार्चनम् ॥२५॥ भवत्येव सतां सं

गात्सत्संगः सेवधिर्नृणाम् ॥ हिरण्यगर्भ उवाच ॥ पूर्णस्य किं कथालापैः सत्संगादिभिरप्यहो ॥ पंचामृतं भुक्तव

॥ १३७॥

तः किमिन्धन परिग्रहैः ॥ २७ ॥ धर्मनिधिरुवाच ॥ अहो धार्ष्ट्यं तव मत्ब्रह्मज्ञानाभिमानिता ॥ दासदास्यादियुक्तस्त्वं गोमहिष्या
दिसंयुतः ॥ २८ ॥ हिरण्यगर्भ उवाच ॥ धनधान्यादि यत्किंचिद्दृश्यते कल्पितं हि तत् ॥ अधिष्ठाने परार्द्धेऽपि मम पूर्णस्य सर्वदा ॥ २९ ॥ सूत उवाच ॥
इत्युक्तो गच्छ पापेति रुष्टः प्रोवाच तं मुनिः ॥ पुनः प्रतिग्रहपरो दासदासी युतोऽनिशम् ॥ ३० ॥ व्यग्रो वार्द्धुषिकः शैवो वैष्णवो,
धनलोलुपः ॥ निर्लेपः परमात्मा हि देहादिभिरनन्वितः ॥ ३१ ॥ देहं स्वकार्यं कुरुते मायिको मायिकप्रभुः ॥ किं पापं कस्य
वा पापं पुण्यं वा कश्च पुण्यभाक् ॥ ३२ ॥ कः स्वर्गो नरकः कश्च परमात्मन्यनामये ॥ अयं पुमान्ययं योषा मायया कल्पितो
118 भ्रमः ॥ ३३ ॥ मदीयं च त्वदीयं च धनं धान्यं स्त्रियो मृषा ॥ पंचात्मके शरीरेऽस्मिन् जातिवर्णक्रमो वृथा ॥ ३४ ॥ ब्रह्मानं
दरसे मग्नो न देहादिषु रज्यते ॥ ईश्वरोऽहं समस्तात्मा नियामक विनाकृतः ॥ ३५ ॥ लीलया सर्वकार्येषु प्रवृत्तिर्मम नान्य
था ॥ सूत उवाच ॥ ३६ ॥ धनार्थं प्रत्यहं यत्नं करोति भ्रान्तमानसः ॥ दासदासी गोमहिषी नक्तं संग्रहतत्परः ॥ ३७ ॥ —
धनान्नवर्द्धि परमः प्रतिष्ठाकाम एव हि ॥ करोति विकृतं सर्वं वदत्यविकृतं सदा ॥ ३८ ॥ प्रतिष्ठाकाम एवासौ भिक्षुभ्योऽन्नं

८५

का. प्रपञ्चयति ॥ गृह्णाति बहुलोभेन ब्रह्मचर्चा विशारदः॥३९॥ वदत्यविरतं ब्रह्म स्मरत्यविरतं धनं ॥ करोत्यविरतं कर्म नैष्कर्म्यं सं र.

॥१३८॥ प्रदर्शयन् ॥४०॥ सर्वं धनादिकं मिथ्या कल्पितं विष्णुमायया ॥ त्यक्त्वा सुखमवाप्नोति शांतिं संतानवर्द्धनम् ॥४१॥ अशोकस्याहि २५

दौर्जन्यं कर्मबद्धस्य पश्यतः॥ शिवयोगिजने लोके वित्तं नार्थयते सकृत् ॥४२॥ धनस्य कार्यमेतद्धि यद्धि दत्त्वा त्क्रियेत वै

॥बन्धो धनकृतो नृणां धनं दत्त्वा विमुच्यते ॥४३॥ धनमेव मनुष्याणां कारणं बन्धमोक्षयोः ॥ धनमेव परं सौख्यमिति

बुध्यातु बंधकृत् ॥४४॥ इत्याद्युपदिशन् काश्यां सर्वस्ववसु सर्वधा ॥ गृह्णात्येव महाधूर्तो धर्मानुपदिशन् बहून् ॥४५

ब्रह्मज्ञानं वदन् स्तौति धनिनो धनकाम्यया ॥ क्वचिद्विभूतिधवलो रुद्राक्षपरिवेष्टितः ॥४६॥ क्वचिद्वैष्णवरूपेण प्रतार

यति मानवान् ॥ क्वचिच्छाक्तः क्वचित्सौरः क्वचिद्गाणेश एव च ॥४७॥ क्वचित्तपस्वी शास्त्रार्थवक्ता भवति जापकः ॥इ

त्यादि धनलोभेन करोति बहुधा बुधः ॥४८॥ दंभं प्रपंचयन् लोके शोकं संजनयन् मुहुः ॥ आमंत्रितः कदाचित्सव

ला दादर पूर्वकम् ॥४९॥ धनं गृहीत्वा च पुनर्भुक्त्वैव गृह दर्शकः॥ एवं काश्यां वसन् धूर्तः प्रतारयति मानवान् ॥५०॥

॥१३८॥

धनमीश्वरसात्कार्यमिति बुध्या विमुच्यते॥ स्वयं करोति धर्मात्मा न धनी च सुदीनकृत ॥ऊ.५

स्त्रीजितः स्त्रैण संबन्धी ब्रह्म ब्राह्मण दूषकः॥ कदाचिज्जृंभणं कुर्वन् वायुरूर्ध्वं गतोऽभवत् ॥५१॥ व्याकुलस्सोऽत्यजत्प्राणानवि
मुक्ते विमुक्तिदे॥ यातना देह आविश्य भैरवः पाप पूरुषम् ॥५२॥ पातयामास बहुधा पापं संस्मारयन् क्रुधा॥ त्रिंशत्वर्ष सहस्रा
णि त्रिंशत्वर्ष शतानि च ॥ ५३॥ पात्यमानोऽपि न बुबुधे दुःखैरात्मान मित्यपि ॥ यातनांते कालराजउवाच जगदार्त्तिहा ॥ ५४॥
भैरव उवाच ॥ हिरण्य गर्भ धन्योऽसि महापाशुपतः कृती॥ वर्णाश्रम समाचारः सम्यक्संपादितस्त्वया ॥५५॥ किंवर्णयामि देवस्या
विमुक्तस्य विचेष्टितम् ॥ अयुतत्रयं किंचिदधिकं कृतं येन महात्मना ॥५६॥ पापानुसारतो नैव कृतानिष्कृतिरादरात् ॥ तवपा
पस्य भोगस्तु कल्पैरपि न सिध्यति ॥५७॥ यत्त्वया काशिकायां च कृतं पापं विजानता॥ ज्ञात्वा काशिकां (यस्तु) पापं करोति हि
114 नराधमः॥ ५८॥ न तस्य निष्कृतिर्वेदे पुराणे परिपठ्यते ॥ इत्युक्त्वा भैरवो देवो महापातक नाशनः॥ ५९॥ दंडपाणिं समाहूय प्रो
वाच भगवान् भवः॥ दंडपाणे नयस्वैनं मोक्षदां मणिकर्णिकाम् ॥ ६०॥ तत्रा विमुक्त देवेशं विज्ञापय ममाज्ञया ॥ असौ पाशुप
तो दंभो मुक्तः पापात्सुदारुणात्॥ ६१॥ दिश्यतां सर्वतोभद्रं ब्रह्म तत्तारकं महत् ॥ इति श्रुत्वा दंडपाणि राज्ञां तां भैरवीं शुभाम्

६६

का॰

॥१३९॥

॥६२॥ हिरण्य गर्भं निष्पापं शंकराय न्यवेदयत् ॥ दृष्ट्वा तं देवदेवेश उवाच प्रहसन्स्वनैः ॥६३॥ शंकर उवाच ॥ अहो पाशुपतश्रेष्ठ सम्यक्काश्यां स्थितं त्वया ॥ एवमेव सदा कार्यो मुमुक्षुभि रयो ध्रमः ॥६४॥ धिक्कृतां पापसमाचारं दाम्भिकं धनलोलुपम् ॥ब्राह्मण्यं मानुषं प्राप्य तत्रापि हि तपस्विनाम् ॥६५॥ काश्यां धनार्थं यो मूढः क्लिश्यन् क्लेश्यः सदैव मे ॥ अहो जन्म सहस्राणां पापं यानाशयेद्ध्रुवम् ॥६६॥ तां प्राप्य ये धनाद्यर्थं प्रवृत्तास्ते त्वात्मघातिनः ॥ येषां युग सहस्राणि परमायुर्विनिश्चितम् ॥६७॥ तेऽपि काश्यां सावधानास्तिष्ठन्ति हि दिवानिशम् ॥ मशका मनुजाः पापा निमेषोत्पत्ति जीविनः ॥६८॥ कुर्वन्ति सततं पापं लभंते यातनां निशम् ॥ अहो साहस मत्युग्रं पश्यन्तु विबुधाः स्फुटम् ॥६९॥ वेष्णव्या मायया ग्रस्ता विचार विमुखा कृताः ॥ या काशी धर्मजननी या काशी मोक्ष दायिनी ॥७०॥ पापक्षयं या करोति तां काशीं द्रुसतेऽधमः ॥ इसद्युपकारं वै करोति मनुजोऽपि यः ॥ ७१॥ तस्य द्रोहात्कृतघ्नः स्यान्महानरक भाजनम् ॥ उपकार सहस्राणां जनित्री मुक्तिदातृतः ॥७२॥ तां द्रोग्धुमिच्छन्नरके पतेत्किं द्रुसतीति यः ॥ सूत उवाच ॥ ७३॥ इत्युक्त्वा भगवाञ्छम्भुर्दंडपाणिं प्रनोदय

र॰

॥१३९॥

त् ॥ अन्यालंकारविषये दिव्यं वपुरुपेयुषि ॥ ७४ ॥ दंडपाणिरलंकृत्य तेजोमयवपुर्धरम् ॥ दर्शयामास देवाय दीनानाथैकवन्धवे

॥ ७५ ॥ सचापि भगवान्देवः काशीनाथो महेश्वरः ॥ व्याचष्टे तारकं ब्रह्म यज्ज्ञात्वा ब्रह्मतां व्रजेत् ॥ ७६ ॥ एवं हिरण्यगर्भः स पा

खण्डखन तत्परः ॥ अनेकायुत कालञ्च यातनां प्राप्य मुक्तिभाक् ॥ ७७ ॥ अत एव द्विजाः काश्यां खनं देहपरायणाः ॥ पाप

संग्रह मासाद्य पच्यते यातनाऽग्निषु ॥ ७८ ॥ शिवविष्णुपरा ये च ये च दानरताः सदा ॥ पापस्य संग्रहस्तेषां न संभवति दा

रुणः ॥ ७९ ॥ स्वभत्यवत्ब्राह्मणा पश्यन्त्यानन्दकानने ॥ तस्य विष्णुः शिवो देवाः प्रसन्नाः काशिका तथा ॥ ८० ॥ जीवि

तं तरलं ज्ञात्वा धैर्यमालंब्य शास्त्रतः ॥ ज्ञात्वोग्रयातनां देवा ह्रीनास्तिष्ठन्ति साधवः ॥ ८१ ॥ विषयव्यसनतो धर्मादपराध

शतान्यपि ॥ क्षमते शंकरः शान्तः संग्रहादत्र कुप्यति ॥ ८२ ॥ दातव्यमिति काश्यां नो वक्तव्यं मनुजैः क्वचित् ॥ अहोरात्रमति

क्रम्य तद्दानं द्विगुणं भवेत् ॥ ८३ ॥ दशोत्तरं पर्वसु च शतं चन्द्रग्रहे भवेत् ॥ सूर्यग्रहे सहस्रं तु मरणे नन्तकं स्मृतम् ॥ ८४ ॥ तस्मा

द्दातव्यमित्युक्तं देयमेव न चान्यथा ॥ वृथैस्तदेव वक्तव्यं दातुं शक्यं यदेव हि ॥ ८५ ॥ उत्क्रान्तदीयते यद्धि यातनावहमेवत

८७ का॰ ॥१५०॥

त ॥ दानमेव कलौनॄणां प्रायश्चित्तं नचेतरत ॥ ८६॥ काश्यामपि कृतादोषः प्रनश्यन्ति सुदानतः॥ दातव्यमिति गोदानमुक्त्वा

थात्री प्रदोयथा ॥८७॥ प्रतारयति पापात्मा तस्यदान फलं वृथा ॥ तथान्येष्वपि दानेषु प्रतिकल्पोनथर्मदः ॥ ८८॥ धनि २५

नां कृपणानांच दांभिकानां दुरात्मनां ॥ दातव्य मिति योब्रूयान्नददात्याशु पामरः॥ ८९॥ तस्य तद्वचनं पुण्य नाशं पापं

करोतिच ॥ ऋषयऊचुः ॥ सूत काश्यामृणं कृत्वा काश्यामेव म्रियेतचेत ॥ ९०॥ कागति स्तस्य कथय ऋणान्नैव

मुच्यते ॥ ९१॥ सूतउवाच ॥ काश्यांमृतानां सर्वेषां मुक्तिरेव नसंशयः॥ बुद्धिपूर्व कृतं पापं दुःखायैवभवत्यलम् ॥ ९२

॥ शृण्वन्तु सु विचित्रार्थां कथां शुद्धि विधायिनीं ॥ यथाधर्मः पापभीतिरुत्पद्येत विचारतः ॥ ९३॥ काश्यामासीत्सदा

चारो वणिक् सत्याशिषः कृती ॥ तस्य पुत्र द्वयं चासीत्सुख संवर्द्धितं शनैः॥ ९४॥ एकः कल्याण नामान्यो धनप्रियउदा

हृतः॥ धनं विभज्यच पिता दत्वाकाशी मवापह ॥ ९५॥ कल्याणः स्वधनं भुंक्ते ददाति वसुयाचके॥ कालेनक्षीण

वित्तोभूदृणंकृत्वा सजीवति ॥ ९६॥ धनप्रियो द्वितीयस्तु पुत्रः पापमतिः शठः॥ पितुर्धनं विनश्याशु ऋणं बहुचका

॥१५०॥

रह ॥ वेश्या द्यूत मद्यपान रतः पाप मतिः सदा ॥ ९७ ॥ ऋण ग्रह गृहीतात्मा न वेद गति मात्मनः ॥ पुण्य पाप समाचारो
मृतौ काश्यां वणिक्सुतौ ॥ ९८ ॥ सद्यो मुक्तिं यातनां च प्राप्य ला च मतुं ययौ ॥ ऋषय ऊचुः ॥ ऋणं कृत्वापि कल्याणः क
थं मुक्ति मवाप्नुवान् ॥ धनप्रियोपि ऋणकृत् कथं मोक्षस्य भाजनम् ॥ ९९ ॥ सूत उवाच ॥ धार्मिको ऋणभीतो यो म्रि
येतत्रा प्रमादतः ॥ स सद्यो मुक्तिमाप्नोति ऋणी तस्य च शंकरः ॥ १०० ॥ ऋणं बहुगुणं तस्मै ददाति भगवान् हरः ॥ धार्मिक
१०१ स्य मतिः प्रान्ते जायते ऋणभीतितः ॥ १ ॥ विश्वेश प्रवणा चान्ते तेन विश्वाधिपो ऋणी ॥ स्वयमंगी कृत्य ऋणं तारकं
११६ प्रदिशत्यलम् ॥ १०२ २ ॥ तारक श्रवणा द्विप्रा विश्वेश मुख निःसृतात् ॥ जायते व्यापकः साक्षात्तस्माद्धर्मो हि रक्षति ॥ १०३ ३ ॥
कल्याणः प्राप्य कल्याणं काशी मरण मात्मनः ॥ निस्तीर्णो दान बलतः काश्यां काशी कृपाश्रयः ॥ १०४ ४ ॥ धनप्रियोऽपि कृत्यस्तु
कालराजेन यातनाः ॥ प्रापितो ऽमुतश्शः सर्व भोगार्थं ऋण कृत्स च ॥ १०५ ५ ॥ कुटुम्ब भोग कृत्यर्थं मृणं कृत्वा विमृत्यति ॥ स
पापात्मा शुद्ध तनु र्यातनाः प्रति पद्यते ॥ १०६ ६ ॥ अतः सर्वै रुपायै र्हि ऋण शुद्धिः समीरिता ॥ १०७ ॥ इति श्री ब्रह्मवैवर्ते तृतीयवि

भागे पंचविंशतितमोऽध्यायः॥ ऋषय ऊचुः॥ महाज्ञानमयी सूत श्राविता काशि सत्कथा॥ त्वया महानुभावेन महा
फल समृद्धिदा॥१॥ पुनः कांचित् स्थितिं ब्रूहि काश्यां निवसतां सतां॥ यया न मानवो याति यातनां कालभैरवीं॥२॥ सू *र.* *२६*
॥१४१॥ त उवाच॥ सतां प्रसंगैः श्रवणैः सुकीर्तनै र्निन्दा परद्वेष विवाद वर्जनैः॥ दानै र्व्रतै रिन्द्रिय निग्रहैश्च प्रतिग्रहस्या
त् विवर्जनैश्च॥३॥ भवंति लोकाः सुखिनो विरागाः कामारि वासे वृष राग युक्ताः॥ विशेषतो निंदन वर्जिताज
नाः जनार्द्दनं सानुनयं प्रकुर्वते॥४॥ वक्ता परुष वाक्यानां मन्तव्यो नरकागतः॥ संदेहो न मुनि श्रेष्ठाः पुनर्यास्यति
यातनाम्॥५॥ परापवादी पापात्मा सर्वपापकृद ध्रुवः॥ पच्यते नरके सोऽपि महापातकिभिः सह॥६॥ अत्रैवोदाहर
न्तीममितिहासं पुरातनम्॥ सद्यः फलप्रदा निन्दा दर्शिता विष्णु शर्मणे॥७॥ पुत्राय सुविनीतेन मुनिना यज्ञ
शर्मणा॥ विष्णुशर्मा पितुर्वेदान् सांगोपनिषदक्रमान्॥८॥ अधीत्य सर्व शास्त्राणि पुराणानि च सर्वशः॥
पप्रच्छ पितरं पुत्रो विष्णु शर्मा महाकविः॥९॥ अन्यत् द्य यदस्ति वक्तव्यं तद्ब्रूहि कृपया पितः॥१०॥ यज्ञशर्मोवाच
॥१४१॥

(6) १ पं.४ पाठान्तर- "निन्दकानां" — "निन्दितानां"

शृणु तात महाविद्या पुरुषार्थ फलप्रदा ।। यामाश्रित्य नरः सर्वो जायते मोक्षभोग भाक् ।। ११ ।। सर्वप्राणिषु विश्वात्मा परमात्मा
जनार्दनः ।। संस्थितस्तस्य पीडां वा निन्दां वाऽपि करोति यः ।। १२ ।। स याति नरकं घोरं विष्णु द्रोही शिवाज्ञया ।। ज्ञातं मुनिव
रैः सर्वैस्तपो विद्या विशारदैः ।। १३ ।। ततो न कस्यचिन्निंदां पीडां वाऽपि प्रकुर्वते ।। विष्णु शर्मोवाच ।। देहस्तु निन्दितः
सर्वैरात्मा निन्द्योन केनचित् ।। पीडा तु किं कृता लोके निन्दकानां सुदृश्यते ।। १४ ।। गुरुरुवाच ।। देहदेही समायोगा
दभिमानो भवत्यलम् ।। तन्निन्दनान्महद्दुःखं जायते विदुषामपि ।। १५ ।। अध्यास एव दुःखाय देहादौ प्राणिनां भवेत् ।।
117 तन्निन्दनान्महद्दुःखं जायते नात्र संशयः ।। १६ ।। तस्मान्निन्दा न कर्तव्या निन्दितस्य बुभूषार्थिना ।। निन्दनात्पितृभिः सा-
कं नरकं प्रति पच्यते ।। १७ ।। सत्ये निन्दा शीघ्र दुःख प्रदा स्या"त्त्रेतायां तापस मात्रेण दद्यात् ।। मासाद्वा द्वापरे दुःखदा
त्री"ति च्चे ज्ञाता सर्वदा पापरूपा ।। १८ ।। निन्दकानां सुखं धर्म स्तपः सत्यं दयाऽभयम् ।। तीर्थव्रततपो दानं विद्यादिच्च
निरर्थकम् ।। १९ ।। आत्मानं सद्गुणं मत्वा शास्त्राचरण संमतम् ।। ततोऽन्यस्य करोत्यज्ञो निंदां निन्दित एव सः ।। निन्द

का॰ यानदुःखे राजा शतक्रतु समोमहान् ॥ पातितः स्वर्गतो प्यर्वाङ् महाधर्मकृदप्यहो ॥२१॥ आत्मानं सर्वकुशलं मत्वैवपरनिन्दकः॥
॥१४२॥ भवत्यवश्यं पापात्माऽकुशलः स्वात्मघातकः॥२२॥ यस्यकश्चित्प्रियो देवः शिवो वा विष्णुरेववा॥ सकथं निन्दते जीवा र॰
न् सर्वात्मा राघवोनसः॥२३॥ प्रमादादपि यत्कर्णे श्रुति स्मृति समीरितम्॥ सर्वात्मा भगवान् विष्णुः पतितं वाक्यम्
त्तमम्॥२४॥ सकथं पामरः श्रुत्वा तत्र तत्र महत्सु च॥ निन्दां करिष्यते मोहात् परलोकदर्शिनरः॥२५॥ अतस्त्वत्वया
वत्स निंदकस्यापि देहिनः॥ न श्रोतव्या न कर्तव्या न स्थेयं तत्र यत्र सा॥२६॥ विष्णुशर्मोवाच ॥ उपदेशः समीचीनः
प्राप्तस्तात मयाऽधुना ॥ काश्यां स्थित्वापि सततं निन्दंत्यत्र निवासिनः॥२७॥ अभिमान महासर्प ग्रस्तानां पापक
र्मिणाम्॥ तेषां देवहतानांच कागतिस्तां वदस्व मे॥२८॥ यज्ञशर्मोवाच॥ रुद्रावासे महाक्षेत्रे रुद्रांस्थावर जंगमाः॥
स्थितानां प्राणिनां निन्दां कुर्वन्याति स्थस्ततः॥२९॥ यथेश्वरोऽहि यं जीवं प्रवर्तयति देहकृत्॥ तथा प्रवर्तते सोऽपि
नस्वतंत्रः कथंचन॥३०॥ स्वयं तथा विधोभूत्वा कथमन्यं विनिन्दयेत्॥ सर्वज्ञत्वं बुद्धि मत्वं धर्मिष्ठत्वं तथात्म

॥१४२॥

नि ॥३१॥ निन्दंति पापा आरोप्य स्वस्मिँल्लोकान् पृथग्विधान् ॥ काशीस्थ निन्दनपरान् परमादरेण काश्यांमृतान–
पिहि पातयते महात्मा ॥३२॥ श्रीकालराज इति यः प्रस्थितः परेशः [redacted] सोऽस्यावमन्य सुकृतं परिशिक्षयेच्च ॥ तस्मात्
काश्यां सर्व सत्वेषु बुद्धिः कर्तव्याते रुद्ररूपा सदादो ॥३३॥ पश्चादन्यधर्मजातं स्वशक्त्या कर्तव्यं ते पुत्र कल्याण
हेतोः ॥ विष्णुशर्मोवाच ॥ निंदाकृता महत्पापं कृतमस्माभिरादरात् ॥ मिथ्यानुवादिनां पापं श्रोतुमिच्छामि तत्वतः ॥३४॥
यज्ञशर्मोवाच ॥ मिथ्यावादा बहुविधाः संतिपुत्र सुविख्यातकाः ॥ न तेषु रमते प्राज्ञः सर्वधातिषु सर्वदा ॥३५॥ विहायवि
।।८ ष्णुमव्यक्तं मन्यन्मिथ्या प्रवक्ष्यते ॥ वेदाः सर्व पुराणानि शास्त्राणि सुजनास्तथा ॥३६॥ मिथ्यावादस्त्वयं मुख्यो गर्भ
वाससहस्रदः ॥ सत्यं विहाय मिथ्या च यस्य वागीन्द्रियं भवेत् ॥३७॥ तन्नाशयति पापिष्ठं यावदाभूत संप्लवम् ॥ लौकि
केषु च यः पापो मिथ्यावाग्जायते नरः ॥३८॥ तस्यापि निष्कृतिर्नास्ति मिथ्यावादानुसारतः ॥ धनाद्यर्थं तु यो मूढो
मिथ्यावादं करोति च ॥३९॥ तस्याशु सुकृतं याति नरकं प्रतिपद्यते ॥ देशाध्यर्थं प्रवदति यो नरोऽनृतमत्र हि ॥४०॥

७. सयाति रौरवं पापं न पुनः सत्यभाग्भवेत् ॥ अनृतानां न चांतोऽस्ति यातनानां च पुत्रक ॥ ४१ ॥ वक्तुं न शक्यते तात तारतम्य
का. मवान्तरम् ॥ न वाच्य मनृतं तात, न वाच्यं वाच्य मेव च ॥ ४२ ॥ इति निश्चित्य विचरे न्नतस्य भय मण्वपि ॥ ब्रह्मर्षयो राज- ८.
॥१४३॥ र्षयो वैश्याः शूद्रा स्तथान्त्यजाः ॥ ४३ ॥ अन्येऽपि देव यक्षाद्याः पतिता अनृतेन हि ॥ अनृतं न वदेत्प्राज्ञः प्राणैः कंठ २८
गतैरपि ॥ ४४ ॥ कौतुकेनापि हि महान् स्वैरतास्ये ह्यपि क्वचित् ॥ अनृतं सर्व पापानां पात्रं तस्मिन् हि संचितः ॥ ४५ ॥
पाप राशिस्तु सुमहान् जायते वर्द्धतेऽपि च ॥ बहुनात्र किमुक्तेन पापराशि रनन्तकः ॥ ४६ ॥ दुःख प्रदोऽनृतो भवति नानृ
तात्पातकं परम् ॥ पुराणेषु पृथग्गीतं नाना ख्यानै रनेकशः ॥ ४७ ॥ अनृतं नैव वक्तव्य मनृतात्सुकृतं क्षरेत् ॥ विष्णु
शर्मोवाच ॥ कति संति पुराणानि [illegible] व्यासोक्तानि महांति च ॥ ४८ ॥ अन्यान्युपपुराणानि संख्यावद मे पितः ॥
यज्ञशर्मोवाच ॥ ब्राह्मं पाद्मं वैष्णवञ्च शैवं लिंगञ्च गारुडम् ॥ ततो भागवतं प्रोक्तं भविष्याख्यञ्च वामनम् ॥ ४९ ॥
नारदीयं तथाऽऽग्नेयं मार्कण्डेयं च कूर्मकम् ॥ मात्स्यञ्च ब्रह्मवैवर्तं तथा वाराह मेव च ॥ ५० ॥ स्कान्दं च वाय ॥१४३॥

(७) ग्रंक्ति २ — लिंगञ्च —

श्रीयंच पुराणानि चतुस्त्रिंशत् ॥ पच्यक् [पृथक्] श्रोतृ नामानि मुख्यत्वे प्रथितानिहि ॥५१॥ तत्तन्नाम्ना तानि तानि विभक्ता
नि विशेषतः ॥ सर्वाः कथास्तु भगवानेकी कृत्य जनार्दनः ॥५२॥ कृष्णद्वैपायनश्चक्रे सप्तादश मितानिसः ॥ विष्णु
शर्मा पितुर्वक्ता [कृत्त्वा] च्छ्रुत्वा निन्दा मृषा फलम् ॥५३॥ असत्समागमांस्त्यक्त्वा पुराण परमोऽभवत् ॥ अतो धर्मकथानित्यं
शृण्वन्ति कथयन्तिच ॥५४॥ महानुभावाः सततं मिथ्यानिन्दा निवृत्तये ॥ ऋषय ऊचुः ॥ सूतान्यानि पुराणा
119 नि श्रुतान्यष्टादशैवतु ॥ तेषां नामानि नोब्रूहि कैः कृतानि मितिश्च का ॥ ५५॥ सूतउवाच ॥ आद्यं सनत्कुमारं
च नारदीयं द्वितीयकम् ॥ तृतीयं नारसिंहाख्यं शैव धर्मं चतुर्थकम् ॥५६॥ दौर्वासं पंचमं षष्ठं कापिलेय मतःप
रम् ॥ सप्तमं मानवं प्रोक्तं, शौक्रमष्ट ममेवच, ॥५७॥ वारुणं नवमं प्राहु, र्ब्रह्मांडं दशमं स्मृतम्, ॥ कालीयपुराण
न्तु ततएकादश मुच्यते, ॥५८॥ वासिष्ठलैङ्गं द्वादशं, माहेशान्तु त्रयोदशम्, ॥ सांवं चतुर्दशं प्रोक्तं, सौरं पंचदशं स्मृ
तम्, ॥५९॥ पराशर्यं षोडशमं, मारीचं तु ततः परम्, ॥ अष्टादशं भार्गवाख्यं सर्व धर्म प्रवर्त्तकम् ॥६०॥ एतान्युप

का॰ पुराणानि सर्ववेदमयानि च ॥ ऋषिभिः संप्रयुक्तानि पुरुषार्थफलानि च ॥ ६१॥ वेदधर्मः पृथक्कृत्य ज्ञायते सर्वकां
॥१५५॥ क्षिभिः ॥ न पुराणं विना विप्राः पुरुषार्थैः प्रवर्तते ॥ पुरुषार्थं विना कश्चिन् न सुखं सम्प्रगच्छति ॥ अन्यथा नरकं या र॰
ति श्रवणादि विवर्जितः ॥ ६३॥ शुभाशुभ विवेकश्च श्रवणादेव जायते ॥ पुराणेषु च सर्वेषु नामभेदेन कानिचि
न् ॥ ६५॥ व्यत्या संस्थानि तान्येव कालभेदेन कुत्रचित् ॥ अयमेव पुराणार्थो अयमेव परो वृषः ॥ इदमेव परं ज्ञा
नं यदात्मा मुच्यते भयात् ॥ तद्द्वयं न विना काशी प्राप्तिं नाविजानाति च ॥ ६६॥ विष्णोरियं कृपा मुख्या शिवस्य-
परमा दया ॥ धर्मयोगादि सद्वृत्त फलं काशी यदाप्यते ॥ ६७॥ काश्यां स्थित्वा देवदेवं शिवं च विष्णुं वा ये संं
यजन्ते मनुष्याः ॥ ते वै लक्ष्मी पार्वती कान्त भक्ता वित्ते धान्ये मोक्ष युक्ता भवन्ति ॥ ६८॥ तथापि पापाः पर
मार्तिं युक्ता दीनाः सुदीनाः सुखधैर्य वीर्यैः ॥ दीनान् भजन्ते निरपत्रपाः किं भवन्ति नो भ्रान्ति भाजः सदैव ॥ ऋ
षय ऊचुः ॥ सूतजीव महावृद्धे व्यास शिष्य हरिप्रिय ॥ त्वया काशि माहात्म्यं श्राविता ऋषयो ऽमलाः ॥ ७०॥

(क) १ पाठान्तर– "परं" – "पदं"
" २ " – "पुण्य संभार दुर्लभाम्" – "पुण्यभारे स्तु दुर्लभाम्"

स्वधर्मदान व्रतधर्म साधनै रन्यैश्च योगादि भिराप्यते यत् ॥ पुण्यं दृढं तेन भवेन्मतिः सतां काशीकथा श्रवणेमानवानाम् ॥७१॥
सूतउवाच ॥ इदमाख्यान मशेषपाप्मनां विनाशनं काशि निवास सौख्यदम् ॥ शृण्वन्ति गायन्ति महानुभावाः परंपदं
प्राप्य परं लभन्ते ॥७२॥ श्लोकार्द्धं श्लोक पादं वा नित्यं [illegible] काशि कथामृतम् ॥ पिबन्ति ये महाभागा स्तेषां भीति
र्न भैरवीह ॥७३॥ महापातक युक्तोऽपि शृणुयाच्चः कथामिमाम् ॥ सयुक्तो मुक्ति माप्नोति पुण्यसंभार दुर्लभाम् ॥७४॥
देवेषु च यथा विष्णु स्तीर्थे मुख्येषु काशिका ॥ व्रते ष्वेकादशी मुख्या पुराणेषु तथाप्यिदम् ॥७५॥ जगद्रसवि
120 वर्त्तं हि वदन्ति श्रुति मौलयः ॥ काशी ब्रह्मैव साक्षाद्धि विदुषां श्रुति चक्षुषाम् ॥७६॥ काशी कथा श्रवणतः का
शी कीर्तनतः स्मृतेः ॥ यत्फलं जायते नृणां न तद्योगादिभिः क्वचित् ॥७७॥ सर्वं सविघ्नं मोक्षस्य साधनं काशिकां
विना ॥ काशी निर्विघ्नजननी काशी मोक्षस्य सत्खनिः ॥७८॥ विष्णु विश्रामभूमिस्तु शिव विश्राम भूमिका ॥
त्रयो देव वर्यश्च यत्र विश्राम्य तद्गताः ॥७९॥ पूर्णा अपि रमन्तेऽत्र पंच क्रोशात्मके स्थले ॥ अपूर्णानां वराकानां

(क) पाठान्तर – "देहं गेहं" – "जीवं देहं"

७२ रतिरन्यत्र पापतः ॥ यैर्दृष्टा यैः श्रुता काशी यैः स्मृता कीर्तिता तथा ॥ त एव धन्याः पूज्याश्च कृतार्थां मुक्तिभागि
का॰ नः ॥८१॥ ऋषय ऊचुः ॥ वदन्ति योगिनो देहं काशीरूपं विमुक्तिदम् ॥ अन्तर्दृष्ट्या महात्मानस्तत्कथं सूतनन्दन रः
॥१४५॥ ॥८२॥ सूत उवाच ॥ आदौ काश्यां धर्ममार्गेण वासः पापत्यागः काशिमाहात्म्यदृष्टिः ॥ देहं गेहं पुत्रवित्तादि
यस्य सर्वं त्वच्छं सोधिकारी महात्मा ॥८३॥ देहं गेहं काशिकां कर्तुमिच्छन्कुर्यादेतन्नाति चित्रं नृणां हि ॥ देहः
काशी काशिका देहरूपा तस्य प्रोक्ता यो विरक्तः सदाऽऽस्ते ॥८४॥ तथापि मुनयो वच्मि गुह्याद्गुह्यतरं परम् ॥ लिं
गतीर्थान्यनेकानि यथा भान्ति शरीरके ॥८५॥ तथा शृणुध्व माश्चर्यं क्रमेरूः सर्षपोदरे ॥ आश्चर्यकारिमन
सां नानाख्यानैस्तथोत्तमैः ॥८६॥ स्थूलादपि स्थूलतरा काशिका ब्रह्मरूपिणी ॥ यथा मनुष्यदेहेस्मिन्शो
धिते भाति वस्तुतः ॥८७॥ तथा शृणुध्व माश्चर्यं क्रमेरूः सर्षपोदरे ॥ एतच्छ्रवणतः पुंसां सर्वत्र विजयो भवे
त ॥८८॥ सौभाग्यं चापि सर्वत्र प्राप्नुयान्निर्मलाशयः ॥ यस्य विश्वेश्वरस्तुष्टस्तस्य स्याच्छ्रवणे मतिः ॥

॥१४५॥

८९॥ जायते पुण्ययुक्तस्य महानिर्मलचेतसः ॥ सर्वेषां मंगलानांच मांगल्यं परमं स्मृतम् ॥ ९०॥ गृहेऽपि लिखितं

पूज्यं सर्व मंगल सिध्दये ॥ इति श्री ब्रह्म वैवर्त्ते तृतीय विभागे रहस्याति रहस्ये काशी माहात्म्ये षट्विंशोऽध्यायः॥२६

शुभं भूयादिति ॥ संवत् १९८९। माघ कृष्ण १० शनौ लिखितमिदं काशी माहात्म्यम् ॥ शिवार्पणमस्तु ॥ इति ॥

।२।

॥ इति काशीरहस्यम् ॥